

तपागणाधीश
आचार्यश्रीधर्मघोषसूरिरचितः
सवृत्तिः

# सड्ढ-जीयकप्पो

(श्राद्धजीतकल्पः)

संपादकः

पंन्यासश्री नयभद्रविजयगणिवर्य

णमोत्थु णं समणस्स भगवओ महावीरस्स

।। श्रीआत्म-कमल-वीर-दान-प्रेम-रामचन्द्र-भद्रङ्कर-कुन्दकुन्दसूरिसद्गुरुभ्यो नमः ।।

卐

तपागणाधीश–आचार्यश्रीधर्मघोषसूरिरचितः सवृत्तिः

# सड्ढ–जीयकप्पो

## (श्राद्धजीतकल्पः)

शतावधानी मुनिराजश्री लाभसागरगणिसंशोधितमुद्रितपुस्तकसहायेन

संपादकः

पूज्यपाद आचार्यदेवश्रीमद्विजय रामचन्द्र–भद्रंकर–कुंदकुंदसूरीश्वरजी महाराजाना

शिष्यरत्न वर्धमानतपोनिधि पूज्यपादपंन्यासप्रवरश्री.

नयभद्रविजयगणिवर्य

सङ्घ - जीयकप्पो

प्रथम संस्करणम्

प्रकाशक : परम धर्मः - अमदावादः

वि.सं. २०६९

प्रतयः ६००

प्राप्तिस्थान

परेश जे. शाह
ऐ/२, घनश्यामपार्क फ्लेट,
१७, आनंदनगर सोसायटी
भट्ठा, पालडी, अहमदाबाद - ७
मो. ०९८२५०७४८८९

मनीष जे. कोठारी
२/अे-३१, आर.अेम.अेल.नगर,
३०६, अेल.बी.अेस.मार्ग,
कुर्ला (वेस्ट), मुंबइ - ७०
मो. ९७०२४२४१८७

## પ્રસ્તુત પ્રકાશનના લાભાર્થી

સુવિશાલગચ્છાધિપતિ વ્યાખ્યાનવાચસ્પતિ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્વિજય રામચન્દ્રસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન અધ્યાત્મયોગી પૂજ્યપાદ પંન્યાસપ્રવર શ્રીભદ્રંકર વિજયજી ગણિવરના શિષ્યરત્ન હાલારદેશે સદ્ધર્મસંરક્ષક પૂજ્યપાદ આચાર્યદેવશ્રીમદ્વિજય કુંદકુંદસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન વર્ધમાનતપની ૧૦૦ + ૭૯ મી ઓળીના આરાધક **પૂજ્યપાદ પંન્યાસપ્રવરશ્રી નયભદ્ર વિજયજી ગણિવરની** શુભ પ્રેરણાથી વિ.સં. ૨૦૬૮માં શ્રીશત્રુંજયસામૂહિકચાતુર્માસ આરાધના સમિતિ (રાજેન્દ્રજૈનભવન ધર્મશાળા, પાલીતાણા) એ જ્ઞાનદ્રવ્યની ઊપજમાંથી સુંદર લાભ લીધો છે.

एतद्ग्रन्थस्वामित्व श्रीजैनश्वेताम्बरमूर्तिपूजक सङ्घस्यैव
एतद्ग्रन्थपठन पाठनाधिकारी
कृतयोगोद्वहनो गुर्वनुज्ञातः श्रमण एव

# પ્રસ્તાવના

જન્મ જરા અને મૃત્યુથી વ્યાપ્ત એવા ચતુર્ગતિમય સંસારમાં અનાદિકાળથી અનંત આત્માઓ પરિભ્રમણ કરી રહ્યા છે. પ્રત્યેક જીવો સુખની અપેક્ષાવાળા હોવા છતાં સૌથી વધુ દુઃખો ભોગવી રહ્યા છે. આ અનંત દુઃખમય સંસારથી મુક્ત થવા માટે અને આત્માના વાસ્તવિક સુખને અનુભૂતિનો વિષય બનાવવા માટે કરુણાના સાગર પરમતારક વીતરાગ પરમાત્માઓએ ધર્મતીર્થની સ્થાપના કરીને આપણા ઉપર મહાન ઉપકાર કરેલો છે. પરમ પુણ્યોદયે પ્રાપ્ત થયેલા દુર્લભ અને ઉત્તમ મનુષ્યજન્મને સફળ બનાવવા માટે સાધુધર્મ સિવાય બીજો કોઇ ઉપાય નથી અને સાધુજીવન પામ્યા પછી સાધુજીવનની નિર્મળ સાધના કરવા માટે ગુરુકુલવાસ, ગુરુકૃપા, શાસ્ત્રાભ્યાસ અત્યંત જરૂરી છે. પર્યાય અને પરિણતિ દ્વારા યોગ્યતા પ્રાપ્ત થયા બાદ યોગોદ્વહન કરવાપૂર્વક આગમનો અભ્યાસ કરવાનો હોય છે અને આગમના અભ્યાસ દ્વારા વિશુદ્ધ પરિણતિના સ્વામી બની આત્મવિકાસ સાધવાનો હોય છે. ઉત્સર્ગમાર્ગના આગમશાસ્ત્રનો અભ્યાસ કરનારા મહાત્માઓને છેદસૂત્રોનો અભ્યાસ ગુરુભગવંત યોગ્યતા જોઇને કરાવતા હોય છે. જૈન શાસનમાં છેદસૂત્રનું ઘણું મહત્ત્વ છે. દીક્ષાપર્યાય સાથે પરિણત હોય અને ગુર્વાજ્ઞામાં વ્યવસ્થિત હોય તેને જ અત્યંત ગંભીર એવા છેદસૂત્રનું અધ્યયન કરાવવામાં આવે છે. યોગ્ય અને પરિણત શિષ્યને અધ્યયન કરાવવામાં ન આવે તો ગુરુને ચતુર્ગુરુ પ્રાયશ્ચિત્ત આવે છે. અપાત્ર વગેરેને અધ્યયન કરાવવામાં આવે તો પણ ગુરુને ચતુર્ગુરુ પ્રાયશ્ચિત આવે છે. एतेषामप्राप्ताऽपात्राऽव्यक्तानां वाचनां–श्रुतपाठनरूपां यो ददाति उद्देशसमुद्देशानुज्ञां वा करोति तस्य चतुर्गुरवः। तथा प्राप्तपात्रव्यक्तानां च यो वाचनां न ददाति उद्देशादींश्च न करोति तस्यापि चतुर्गुरवः ।

કુલ ૪૫ આગમો વર્તમાનમાં છે. તેમાં છ છેદગ્રંથો છે. દશાશ્રુતસ્કંધ[૧], વ્યવહાર[૨], બૃહત્કલ્પ[૩], નિશીથ[૪], મહાનિશીથ[૫] અને જીતકલ્પ[૬]. કેટલાકના મતે પંચકલ્પ છેદસૂત્રોમાં ગણાય છે. પરંતુ તેનો લોપ થયા બાદ જીતકલ્પને છેદસૂત્રમાં માન્ય કરેલ છે. આ છ છેદસૂત્રોમાં બૃહત્કલ્પ, વ્યવહાર, નિશીથ આ ત્રણ છેદસૂત્રો આકર ગ્રંથો છે. મૂલસૂત્રો અને તેની નિર્યુક્તિઓ પર ભાષ્યો લગભગ લખાયાં છે. જ્યારે જીતકલ્પભાષ્ય ફક્ત મૂલસૂત્ર ઉપર છે. તેની ઉપર નિર્યુક્તિ લખાયેલી નથી. વર્તમાનમાં છેદસૂત્રો ઉપર લખાયેલાં ભાષ્યોમાં નિર્યુક્તિ અને ભાષ્ય બંને મળીને એક ગ્રંથરૂપ બની ગયા છે.નિશીથસૂત્રનો અભ્યાસ કરેલા મુનિવરો જઘન્ય ગીતાર્થ ગણાય છે અને તેનો અભ્યાસ કર્યા વિના સ્વતંત્ર વિહાર કરવાનો અધિકાર નથી. આવા ગંભીર અને ઉત્તમ શ્રુતનું અધ્યયન મુનિવરો સુંદર રીતે કરી શકે તે માટે પૂર્વના પૂજ્ય પુરુષોએ ખૂબ પ્રયત્ન કરેલો છે.

પરિણતિને વિશુદ્ધ બનાવવા માટે અને ચારિત્રમાં થયેલી સ્ખલનાને પ્રાયશ્ચિત્ત દ્વારા શુદ્ધ કરવા માટે છેદગ્રંથ અત્યંત ઉપયોગી છે. તેથી જ છેદસૂત્રને ઉત્તમશ્રુત તરીકે નિશીથભાષ્ય ગાથા - ૬૧૮૪ માં જણાવેલું છે.

छेदसुयं कम्हा उत्तमसुत्तं ? भण्णति-जम्हा एत्थ सपायच्छित्तो विधी भण्णति, जम्हा य तेण चरणविसुद्धी करेति, तम्हा तं उत्तमसुतं ।

છેદગ્રંથને રહસ્યસૂત્ર પણ કહે છે. જીતકલ્પ, સાધ્વાચારથી સંબંધિત સંક્ષિપ્ત અને મહત્ત્વપૂર્ણ ગ્રંથ છે. ૧૦૩ ગાથાઓમાં પૂ.શ્રી. જિનભદ્રગણિક્ષમાશ્રમણે જીતવ્યવહારથી સંબંધિત પ્રાયશ્ચિત્તોનું સંક્ષેપમાં વર્ણન કરેલું છે. મોક્ષનું કારણ ચારિત્ર છે અને ચારિત્રની શુદ્ધિ પ્રાયશ્ચિત્ત દ્વારા થાય છે. જીતકલ્પગ્રંથ ઉપર ભાષ્ય ૨૬૦૮ ગાથાપ્રમાણ છે. પૂ.શ્રી સિદ્ધસેનસૂરિ મ.એ જીતકલ્પ ઉપર 'જીયકપ્પ-ચુણ્ણી' રચી છે. આ 'જીયકપ્પ-ચુણ્ણી' ઉપર વિ.સં. ૧૨૨૭માં પૂ.શ્રી ચન્દ્રસૂરિ મ.એ 'જીતકલ્પબૃહચ્ચૂર્ણિવિષમપદવ્યાખ્યા' ની રચના કરી છે. જીતકલ્પ ઉપર વિ.સં. ૧૨૭૫ માં ૧૭૦૦ શ્લોકપ્રમાણ ટીકા પૂ. શ્રી શિવપ્રભસૂરિજીના શિષ્ય પૂ. શ્રી તિલકાચાર્યએ લખી છે. જિનરત્નકોશના અનુસારે તેની ઉપર અવચૂરિ પણ લખાયેલી છે. તે હજી સુધી પ્રગટ થઈ નથી.

જીતકલ્પ નામના ગ્રંથના કર્તા દુઃષમાન્ધકારગ્રસ્તપ્રવચનપ્રદીપસમ પુણ્યનામધેય પૂ.શ્રી જિનભદ્રગણિક્ષમાશ્રમણ છે. તેના આધારે અનેક જીતકલ્પો અને તેના ઉપવિભાગરૂપ જીતકલ્પો પણ રચાયા છે. જેમ કે – યતિજીતકલ્પ, શ્રાદ્ધજીતકલ્પ, લઘુશ્રાદ્ધજીતકલ્પ. અત્યારે સંવિગ્ન ગીતાર્થ મહાપુરુષો જેના દ્વારા જે કાંઇ પ્રાયશ્ચિત્ત આપે છે; તે અત્યંત મહત્ત્વના ગ્રંથો યતિજીતકલ્પ અને શ્રાદ્ધજીતકલ્પ છે. આ બંને ગ્રંથોને હસ્તલિખિત પ્રતો ઉપરથી પ.પૂ.ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય માણિક્યસાગરસૂરીશ્વરજી મહારાજાના શિષ્યરત્ન શતાવધાની પૂ.મુ.શ્રી લાભસાગરજીગણિવરે અત્યંત પરિશ્રમ કરવાપૂર્વક વિ.સં. ૨૦૨૮માં છપાવ્યા હતા. ત્યારબાદ તે બંને ગ્રંથોને સિદ્ધાંતમહોદધિ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મહારાજાના અંતિમ શિષ્યરત્ન વૈરાગ્યવારિધિ પૂ.આચાર્યદેવ શ્રીમદ્ વિજય કુલચન્દ્રસૂરીશ્વરજી મહારાજાએ વિ.સં. ૨૦૬૩માં ઓપસેટ પ્રીન્ટ કરાવ્યા.

વિ.સં. ૨૦૬૮માં પાલીતાણામાં ૪ મહિના (શેષકાળ)માં સમુદાયના યોગ્ય મુનિવરોને વર્તમાન ગચ્છાધિપતિ પ્રવચનપ્રદીપ પૂજ્યપાદ આચાર્યદેવ શ્રીમદ્ વિજય પુણ્યપાલસૂરીશ્વરજી મહારાજાની અનુમતિથી યતિજીતકલ્પ પોષ સુ.૧૩ થી વંચાવવાનો શરૂ કર્યો અને શેષકાળમાં જ આખો ગ્રંથ પૂર્ણ કર્યો. ત્યારે આ ગ્રંથમાં મુદ્રણાશુદ્ધિઓ જોવા મળી. તેનું શુદ્ધિકરણ કરવાપૂર્વક અને અન્ય ગ્રંથોમાં મળેલી ગાથાઓનું સૂચન કરવાપૂર્વક શ્રાદ્ધજીતકલ્પ અને યતિજીતકલ્પ

આ બંને ગ્રંથો આજે પ્રકાશિત થઇ રહ્યા છે. તેમાં ભારપૂર્વક જણાવવાનું કે - યોગ્ય મુનિવરો, પૂજ્ય ગીતાર્થ ગુરુભગવંતની આજ્ઞા પ્રાપ્ત કરીને જ આ ગ્રંથનો અભ્યાસ પૂજ્ય ગીતાર્થ ગુરુભગવંત પાસે કરે અને વિશુદ્ધ પરિણતિ ઉત્પન્ન કરી પરંપરાએ મુક્તિને પ્રાપ્ત કરનારા બને.

આ બંને ગ્રંથોનું મેટર તૈયાર થયે છતે પૂ. આચાર્યદેવ શ્રીમદ્ વિજય કુલચંદ્રસૂરીશ્વરજી મહારાજાએ પણ ઉદારતાથી તપાસી આપ્યું છે. તેમનો પણ અંતઃકરણપૂર્વક ઉપકાર માનું છું.

આ ગ્રંથમાં શુદ્ધિની કાળજી રાખવા છતાં પણ અજ્ઞાનતા તથા પ્રમાદાદિના કારણે કોઇપણ અશુદ્ધિ રહી ગઇ હોય તો ગીતાર્થ ગુરુભગવંતો શુદ્ધ કરે અને સૂચન જણાવે.

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ।।
सपरजाणणट्ठा विसोहिअं, विवरियं च जमिह मए ।
तं सोहंतु गीअत्था, अणभिनिवेसी अमच्छरिणो ।।

છેદ ગ્રંથોનું પ્રકાશન ઉચિત ગણાય? આ એક જટિલ પ્રશ્ન ઉપસ્થિત થાય છે. છેદગ્રંથો અને પ્રાયશ્ચિત્તના અધિકારો ઘણા ગૂઢ હોય છે. તેના અધિકારીઓ પણ બહુ ઓછા હોય છે. છતાં આવા મહાન ગ્રંથોનું અધ્યયન,અધ્યાપન યોગ્ય મુનિવરો સારી રીતે કરી શકે અને ગ્રંથ સુરક્ષિત રહી શકે એજ એક શુભ ભાવથી પ્રકાશન કરેલું છે. કોઇપણ વસ્તુ ગુપ્ત રાખવા યોગ્ય હોય તે બરાબર છે. પરંતુ ગુપ્ત રાખવા જતાં બિલકુલ અધ્યયન બંધ થઇ જાય અને યોગ્યને પણ ન મળે તે બરાબર નથી. જો કે આજે તો બધા જ છેદસૂત્રો પૂજ્ય મહાત્માઓ દ્વારા સંપાદિત થઈને સંબંધિત પ્રકાશકો તરફથી પ્રકાશિત થયેલાં છે.

આ બંને ગ્રંથોના પ્રૂફ વગેરે સર્વ કાર્યોમાં મારા શિષ્યો મુ.શ્રી નિર્મલયશ વિ., મુ.શ્રી અજિતયશ વિ., મુ.શ્રી પ્રશાંતયશ વિ., મુ.શ્રી શ્રમણયશ વિ., મુ.શ્રી જયંતયશ વિ. તથા મુ.શ્રી. જયંતપ્રભ વિ. સંપૂર્ણ રીતે સહાયક બન્યા છે.

પં.નયભદ્ર વિ. ગણિ
વિ.સં. ૨૦૬૯, કારતક સુદ - ૫
રાજેન્દ્રજૈનભવન, પાલિતાણા (સૌરાષ્ટ્ર)

# ગ્રંથપરિચય

સડ્ઢ–જીયકપ્પો (શ્રાદ્ધ–જીતકલ્પઃ) ગ્રંથ શ્રાવકના પ્રાયશ્ચિત્તને જણાવનારો છે. આ ગ્રંથ પ્રાકૃતભાષામાં ૧૪૨ ગાથાપ્રમાણ છે. છેદસૂત્રો, જીતકલ્પો વગેરે આગમિકસાહિત્યમાં સ્થાન પામતા ગ્રંથોમાં પ્રાયશ્ચિત્તનું વર્ણન મુખ્યતયા સાધુને આશ્રયીને હોય છે. ત્યારે આ ગ્રંથની વિશિષ્ટતા એ છે કે, તેમાં શ્રાવકને આશ્રયીને પ્રાયશ્ચિત્તનું વર્ણન કરવામાં આવ્યું છે. શ્રાવકજીવનમાં થયેલી સ્ખલનાઓનું પ્રાયશ્ચિત્ત જણાવનારો સ્વતંત્ર ગ્રંથ હોય તો આ એક જ ગ્રંથ છે. કર્તાએ ગ્રંથરચનામાં વ્યવહાર-નિશીથ-બૃહત્કલ્પસૂત્ર વગેરે ગ્રંથોનો આધાર લીધો છે. આ ગ્રંથના કર્તા પૂ. દેવેન્દ્રસૂરીશ્વરજી મહારાજાના શિષ્ય તપાગચ્છાધિપતિ પૂજ્ય આ.શ્રી. ધર્મઘોષસૂરિ મ. છે. વૃત્તિ સહિત આ ગ્રંથની રચના વિ.સં. ૧૩૨૩ થી ૧૩૨૭ ના ગાળામાં કરી છે.

આ ગ્રંથની શરૂઆતમાં જ કહ્યું છે કે,

> समस्तश्राद्धजीतकल्पानामुपनिषत्कल्पं कल्प–व्यवहार–निशीथ–यतिजीतकल्पानुसारेण श्राद्धजीतकल्पं कृतवन्तः। अयं च योग्यानामेव विनेयानां प्रदेयो नाऽयोग्यानाम् ।

## सड्ढ–जीयकप्पो तथा जइ-जीयकप्पोमां जणावेला ग्रंथोना
# संकेताक्षरसूचि

| | | |
|---|---|---|
| आ०ग्र०वि०प्र० | : | आलोचनाग्रहणविधिप्रकरणम् |
| आ०नि० | : | आवश्यकनिर्युक्तिः |
| ओ०नि०/ओघ०नि० | : | ओघनिर्युक्तिः |
| ओ०नि० भा०गा० | : | ओघनिर्युक्तिभाष्यगाथा |
| ग०प० | : | गच्छाचारपयन्ना |
| गु०वि० | : | गुरुतत्त्वविनिश्चयः |
| जी० भा० | : | जीतकल्पभाष्यम् |
| दश०/दशवै० | : | दशवैकालिकसूत्रम् |
| द०वै०नि० | : | दशवैकालिकनिर्युक्तिः |
| द्र०स० | : | द्रव्यसप्ततिका |
| नि० भा० | : | निशीथभाष्यम् |
| पञ्च०/पञ्चव०/प०व० | : | पञ्चवस्तुकम् |
| पंचा० | : | पञ्चाशक |
| पिं०नि० | : | पिण्डनिर्युक्तिः |
| पिं०वि० | : | पिण्डविशुद्धिः |
| पुष्पमा०(उप०) | : | पुष्पमाला (उपदेशमाला) |
| प्र०सा०/प्रव०सारो०/प्रवचनसारो | : | प्रवचनसारोद्धारः |
| बृ०क० | : | बृहत्कल्पसूत्रम् |
| म०प० | : | मरणसमाहिपयन्ना |
| लघु०प्र०सा० | : | लघुप्रवचनसारोद्धारः |
| वि०आ० भा० | : | विशेषावश्यकभाष्यम् |
| व्य०सू० | : | व्यवहारसूत्रम् |
| सं०प्र० | : | सम्बोधप्रकरणम् |
| सि०हे० | : | सिद्धहेमचन्द्रशब्दानुशासनम् |

# सङ्घ - जीयकप्पो
## विषयानुक्रमः


| विषयः | पृष्ठक्रमाङ्कः |
|---|---|
| पञ्चानां व्यवहाराणाम् वर्णनम् । | ०३ |
| आलोचनायाः विधिः । | ०५ |
| आलोचनायाः कालः । | ०७ |
| आलोचना कस्मै दातव्या । | ०८ |
| आलोचनाचार्यस्य विशेषगुणाः । | ०८ |
| आलोचनाऽर्थे समग्रगुणवतः गुरोः अयोगे अपवादः। | ०९ |
| आचार्योपाध्याय–प्रवर्ति–स्थविर-गीतार्थानाम् स्वरूपम् । | १२ |
| आलोचनां कः इव कुर्यात् । | १४ |
| आचार्यस्य षट्त्रिंशत् गुणाः । | १५ |
| आलोचनाकर्तुः दश गुणाः दश च दोषाः । | १६ |
| सम्यगालोचनायां गुणाः । | १९ |
| अगीतार्थस्य आलोचनादाने दोषाः । | २० |
| गीतार्थगुरोः आलोचनाऽदाने दोषाः दाने च गुणाः । | २२ |
| सम्यगालोचनाकर्तुः तथा अकर्तुः फलम् । | २४ |
| अतिचारापत्तिप्रकाराः । | २७ |
| प्रायश्चित्तानां भेदाः । | ३० |
| सम्प्रति प्रायश्चित्तानि तथा तद्दातारः न सन्ति इति कथयतः उत्तरम् । | ३१ |
| अनवस्थाप्य–पाराञ्चिकयोः स्वरूपम् । | ३३ |
| आलोचनाफलं तथा तत्सम्बन्धिराधावेधकस्य कथानकम् । | ३८ |
| ज्ञान–दर्शनातिचारेषु प्रायश्चित्तम् । | ४० |
| ३६३ परदर्शनिनः । | ४४ |
| भिक्षायाः दोषाः । | ४७ |
| आहारकरणे अकरणे च कारणानि । | ५८ |
| अशुद्धभक्तपानयोः ददतः प्रायश्चित्तम् । | ५९ |
| साधुसमीपे स्वं औषधादिकार्यं कारयतः श्रावकस्य प्रायश्चित्तम् । | ६१ |
| कारणे पासत्थादीनाम् अवन्दने प्रायश्चित्तम् । | ६२ |
| पासत्थादीनाम् स्वरूपम् । | ६२ |
| कन्यायाः फलग्रहणे शण्डविवाहे पुत्तलिकानां विवाहे, वृक्षारोपणे, बलिविधाने, नदीकुण्डयोः पित्रादीनाम् पिण्डदाने, श्राद्धकरणे, कुदेवतां नमने, मिथ्यादृष्टितीर्थेषु स्नानकरणे प्रायश्चित्तम् । | ६६ |
| पूजासमये हस्तात् जिनप्रतिमायाः पतने, श्वास-वस्त्राञ्चल-कलशादीनां स्पर्शने पादलगने, अविधिना पूजाकरणे प्रायश्चित्तम्, गुरूणां तथा तेषां संस्तारकासनादीनां पादलगने स्थापनाचार्यस्य पादलगने, हस्तात् पतने, प्रतिमायाः तथा पुस्तकादीनां भङ्गे–नाशे च प्रायश्चित्तम् । | ६७ |
| मुखवस्त्रिकाऽऽसनादि आहारादि गुरुद्रव्यं तथा नैवेद्य-वस्त्र-सुवर्णादिदेवद्रव्यं साधारणद्रव्यं च एतेषां परिभोगे प्रायश्चित्तम्। | ६८ |
| पृथिवीप्रभृतीनां सघट्टनादौ प्रायश्चित्तम् । | ६९ |
| द्वीन्द्रियतः पञ्चेन्द्रियपर्यन्तां संघट्टने, निर्गालितजलपाने, उष्णकरणे, तथा तेन स्नानकरणे वस्त्रधावनादौ, पीपीलिकाप्रभृतीनां गृहभङ्गे, चटकादीनां मालकस्य भङ्गे, अग्नौ अशोधितेन्धनक्षेपणे, गोमय-स्थापने, गोमयपुञ्जे अग्निदाने, त्रससंसक्तधान्यदलने घरटिक-चूल्हादीनाम–प्रमार्जने प्रायश्चित्तम् । | ७० |
| जनसमक्ष "अयश्चौरः" "अयम् अमुकं वस्तु अचोरयत्" तथा जारकलङ्कदाने मन्त्रभेदकरणे च प्रायश्चित्तम् । | ७४ |
| परवस्तुचोरणे, शुल्कचोरणे, विश्वासघाते प्रायश्चित्तम् । | ७५ |
| अष्टम्यादीनां नियमभङ्गे, कुमारी-विधवा-दासी-कूलधू–प्रभृति परस्त्रीगमने, अस्पृश्यजातिस्त्रीगमने, नपुंसकसेवने, हस्तकर्मादिकरणे, स्वप्ने नियमभङ्गे प्रायश्चित्तम् । | ७५ |
| जघन्यादिपरिग्रहस्य नियमभङ्गे प्रायश्चित्तम् । | ७८ |
| रात्रिभोजने, पञ्चोदुम्बरादि फलपुष्पानां, जानता–अजानता मद्य–मांस–मधु नवनीतानां नियमभङ्गे प्रायश्चित्तम् । | ७९ |

# सड्ढ - जीयकप्पो
## विषयानुक्रमः


**विषयः** — **पृष्ठक्रमाङ्कः**

अनन्तकायमूलकार्द्रकानां भक्षणे प्रायश्चित्तम् । — ८०

नियमे सति पौषध-सामायिकौ अकरणे, कृते सति न पारणे, पौषध-सामायिकयोः मुखवस्त्रिका-नमस्कारावलीनाशने, पौषधे द्विः वसतेः अप्रमार्जने तथा रात्रौ संस्तारभूमेः अप्रमार्जने चतुष्कालं स्वाध्यायस्य अकरणे, वसत्यादौ प्रवेशे नैषेधिकीं, वसत्यादेः निर्गमने आवश्यकीं अकथने, जलकायिकादि-परिष्ठापने हस्तशतादागमने वेर्यापथिकीं अप्रतिक्रमणे, उभयकालमुपधेः अप्रत्युपेक्षणे कपाटादीन् अप्रत्युपेक्ष्याऽ-प्रमृज्य उद्घाटने स्थगितकरणे च, अप्रमृज्य शरीरं कण्डूयने, काष्ठपीठफलकादिकमप्रमार्ज्य ग्रहणमोचने, उपविश्य प्रतिक्रमणं करणे, उभयकालमुपाश्रयप्रमार्जनानन्तरं पुञ्जं नोद्धरणे, पुरुषस्य सान्तरं निरन्तरं वा स्त्रीस्पर्शे स्त्रियः सान्तरं निरन्तरं वा पुरुषस्पर्शे, पृथ्वीकायादीनां सङ्घट्टने, वमने, अकालसञ्ज्ञायां, भोजनानन्तरं गुरुवन्दन-प्रत्याख्यानयोः अकरणे दिवा शयने, पौरुषीमभणित्वा शयने-इत्यादिपौषधव्रतातिचाराणां प्रायश्चित्तम् । — ८३

नियमे सति अकारणे अतिथिसंविभागमकरणे, पर्वतिथौ प्रत्याख्यानस्य नियमे सति प्रत्याख्यानस्याऽकरणे नियमे असत्यपि अतिथिसंविभागं तपश्च नमस्कारसहितादि अकरणे तपःकर्तुः निन्दा-विघ्नाऽ-न्तरायकरणे, पाक्षिकोपवासं, चातुर्मासिकषष्ठं, सांवत्सरिकाऽष्टममकरणे, ग्रन्थिसहितादि-नमस्कारसहितादीनाम् भङ्गे, दिवसचरिमप्रत्याख्यानस्याऽकरणे, अकारणे भङ्गे प्रायश्चित्तम् । — ८४

प्रतिक्रमणं कुर्वति सति, कायोत्सर्गे गुरोः पूर्वं कायोत्सर्गं पारयति सति गुरौ कायोत्सर्गकरणे पश्चात्कायोत्सर्गकरणे, घोटकादिदोषदुष्टं कायोत्सर्गकरणे, प्रमाणात् अल्पं अधिकं वा करणे, निद्राऽऽलस्यादिना कायोत्सर्गाऽकरणे, वन्दनकं गुरोः पूर्वं पश्चाद् वा दत्ते, अविधिना दत्ते प्रायश्चित्तम् । — ८५

कारणं विना प्रतिक्रमणं अकरणे, आलस्येन उपविष्टः(सन्) करणे, वन्दनकमदाने, नियमे सति, शक्तौ सत्यां प्रतिक्रमणं एकवारं कुर्यात्, सप्तक्षेत्रेषु दानं अर्पणे शक्तिं गोपयेत्, त्रिकाल पूजाकरणसामग्री सत्यां अल्पं एकवारं वा करोति, तपः-स्वाध्याय-संविभागान् शक्तौ सत्यां अल्पं अल्पं कुर्यात्, नियमे सति देवगुरून् न वन्देत, ज्ञानभणनगुणने आलस्यं कुर्यात्, दर्शने-साधर्मिकवात्सल्यं न कुर्यात्, चारित्रे-मूलोत्तरगुणेषु प्रमादं कुर्यात्, तपो-विनय-वैयावृत्यादि न कुर्यात्, द्रव्यादिनामभिग्रहग्रहणं न कुर्यात्, अभिग्रहे ग्रहणे सति तद्भङ्गे, एतेषु सर्वेषु प्रायश्चित्तम् । — ८६

द्रव्य-क्षेत्र-काल-भाव-पुरुष-प्रतिसेवनायाः भेदात् प्रायश्चित्तेषु भेदः । — ८७

द्रव्य-क्षेत्र-कालानाम् स्वरूपम् । — ८८

भाव-पूरुषयोः स्वरूपम् । — ८८

प्रतिसेवनायाः चतुष्प्रकाराः तथा कल्पस्य चतुर्विंशतिः भेदाः । — ९०

दान-तपः-काल प्रायश्चित्तानां द्वौ द्वौ भेदौ । — ९३

श्रुतव्यवहारं आश्रित्य नवविधं तपः । — ९३

नवधा आपत्तितपः । — ९४

गुरुपक्ष-लघुपक्ष-लघुकपक्षेषु नवधा दानतपः । — ९५

वर्षादिकालं आश्रित्य दानतपसाम् भेदाः । — ९६

दानतपसां एकाशीतिनां भेदानां यन्त्रः । — १००

कियद्भ्यः नमस्कारसहितादिप्रत्याख्यानेभ्यः उपवासो भवति ? ।

परिशिष्टम् – १ मूलगाथानाम् पूर्वार्धोत्तरार्धयोः अकारादिक्रमः । — १०२, १०४

परिशिष्टम् – २ अवान्तरगाथानाम् अकारादिक्रमः । — १०७

## तपागणाधीश–आचार्यश्रीधर्मघोषसूरिरचितः सवृत्तिः

# सड्ढ–जीयकप्पो

## (श्राद्धजीतकल्पः)

### शुद्धि-पत्रकम्

| पृष्ठः | पंक्तिः | अशुद्धः | शुद्धः |
|---|---|---|---|
| १ | १० | रुक्त्ता | रुक्ता |
| ३ | २ | षड्विधा | षड्विधा |
| ५ | २६ | सङ्क्षेपार्थः | सङ्क्षेपार्थः |
| १० | २९ | आचार्यदीनाम | आचार्यादीनाम |
| २९ | २३ | रुपेति | रुपैति |
| २३ | २४ | बुद्धया | बुद्ध्या |
| २७ | ७ | शुद्धया | शुद्ध्या |
| ३९ | १९ | वासकं | वासरं |
| ४१ | १३ | सूत्रेऽवन्त्य | सूत्रेऽऽवन्त्य |
| ४६ | ६ | पितॄणां | पितॄणां |
| ४७ | २३ | उद्दिष्टोदेशम् | उद्दिष्टोद्देशम् |
| ५१ | २३ | सचित्ताचित | सचित्ताचित्त |
| ५१ | १५ | वनस्पिति | वनस्पति |
| ५१ | १८ | तैरगर्हितैरचितैर | तैरगर्हितैरचित्तैर |
| ५७ | ५ | कुकुड्यण्डक | कुक्कुड्यण्डक |
| ५९ | २० | संसक्त्ताचित | संसक्त्ताचित्त |
| ६२ | १८ | अभिनिबोधि | आभिनिबोधि |
| ५८ | २२ | रसगृद्धया | रसगृद्ध्या |
| ७६ | २५ | पश्चातापिनोश्च | पश्चात्तापिनोश्च |
| ९८ | ११ | षाण्मासिकाख्यो | षाण्मासिक-<br>पञ्चमासिकाख्यो |
| ९८ | १६ | जघन्यमध्यम<br>-मेकाशनम् | मध्यमजघन्य<br>-मेकाशनम् |
| ९९ | २३ | । ५ अङ्का। | । अङ्का |

णमोत्थु णं समणस्स भगवओ महावीरस्स

।।श्री आत्म-कमल-वीर-दान-प्रेम-रामचन्द्र-भद्रंकर-कुंदकुंदसूरिसद्गुरुभ्यो नमः ।।

आचार्यश्रीधर्मघोषसूरिरचितः सवृत्तिः

# श्राद्ध – जीतकल्पः

**श्रीवीरं सगणधरं नत्वा श्रुतधरमुनीन् गुरूँश्च मुदा ।**
**श्राद्धजनजीतकल्पं विवृणोमि स्वपरहितकृतये ।।१।।**

इह श्रावकजनप्रायश्चित्तप्रतिपादका विविधसामाचार्यभिप्रायेणानल्पा जीतकल्पाः सन्ति । तेषु च क्वचिद्विस्तरेण क्वचित् सङ्क्षेपेण प्रायश्चित्तान्यभिधीयन्ते । तत्र (प्रायश्चित्तेषु) च पूर्वाचार्यपरम्परागताम्नायेन नानातिचारानाश्रित्य पुरुषाद्यौचित्येन काऽपि क्वाऽपि प्रायश्चित्तापत्तिरुक्ता । प्रतिदिनं च कस्य सामस्त्येन तदवगाहनसामर्थ्यं भवेत् ? ततः किं कुत्र तपो भवति ? कथं च सम्यक् शुद्धिर्भवतीति व्यामुह्यन्त्यन्तेवासिनः । अतस्तेषां सुखेन प्रायश्चित्तप्रतिपत्तये परमगुरुश्रीधर्मघोषसूरिपादाः समस्तश्राद्धजीतकल्पानामुपनिषत्कल्पं कल्पव्यवहारनिशीथयतिजीतकल्पानुसारेण श्राद्धजीतकल्पं कृतवन्तः । अयं च योग्यानामेव विनेयानां प्रदेयो नाऽयोग्यानाम् । तत्र योग्या ये रङ्गत्संवेगतरङ्गिणीतरङ्गप्रक्षालितान्तरमलाः समस्तसिद्धान्तार्णवपारीणाः परिणतवयसः सार्वपथीनप्रतिभाप्राग्भारसारस्वान्ताः सततमुत्सर्गापवादगोचराचारचतुराश्चिरप्रव्रजिताः । ये त्वेतद्विपरीताः तिंतिणिकादयश्च तेऽयोग्याः ।

यदुक्तम् —

**'तिंतिणिए चलचित्ते गाणंगणिए अ दुब्बलचरित्ते । रायणिअपारिभासी वामावट्टे अ पिसुणे अ'** ।।
**( बृ०क० ७६२, नि०भा० ६१९८ )**

**तिंतिणिको** मुहुर्मुहुर्मन्दमन्दस्वरं झसनशीलः, **चलचित्तो** भाषागत्यादिभिश्चञ्चलः, **गाणङ्गणिको** यः षण्मासान्तर्गणाद् गणं सङ्क्रामति स गाणङ्गणिकः, यो धृतिवीर्यपरिहीणो दर्शनज्ञानादिपुष्टालम्बनं विना मूलोत्तरगुणविषयानपराधान् प्रतिसेवते स **दुर्बलचरित्रः**, **रात्निको** रत्नाधिक आचार्यादिस्तं प्रत्यवज्ञावचनादिभिः परिभाषते यः स **रात्निकपरिभाषी**, **वामावर्त्त** आदिष्टकार्यविपरीतकारी, **पिशुनः** अलीकानीतराणि वा परदूषणानि भाषते यः स पिशुनः । एतेषामयं न दातव्यो, यतः—

**'आमे घडे निहित्तं जहा जलं तं घडं विणासेइ । इअ सिद्धंतरहस्सं अप्पाहारं विणासेइ'** ।।
**(नि०भा० ६२४३ )**

अतो योग्यानामेव दातव्यः ।

अथ च सर्वाण्यपि शास्त्राणि मङ्गलाभिधेयप्रयोजनसम्बन्धप्रतिपादनपुरस्सराण्येव प्रणीयन्त इति प्रस्तुतशास्त्रस्यादौ शास्त्रकृत् मङ्गलाभिधेयप्रयोजनानां साक्षादभिधानाय सम्बन्धस्य संसूचनाय चेमामादिगाथामाह—

**कयपवयणप्पणामो जीयगयं सङ्ढदाणपच्छित्तं ।**
**सपरहिअधारणट्ठा जहासुअं किंपि जंपेमि ।।१।।**

व्याख्या— **कृतप्रवचनप्रणामोऽहं जीतगतं श्राद्धदानप्रायश्चित्तं किमपि जल्पामीति** क्रियासम्बन्धः। **प्रकर्षेण** परसमयापेक्षया यथावस्थितभूरिभेदप्रभेदै**रुच्यन्ते** जीवाजीवादयः पदार्था अनेनास्मिन्वेति **प्रवचनम्** सामायिकादिबिन्दुसारपर्यन्तं मुख्यतः श्रुतज्ञानम् । उपचारात् तत्रोपयुक्तश्चतुर्विधः सङ्घोऽपि । **कृतः प्रवचनस्य,** मनसा तत्तद्गुणचिन्तनादिरूपो वाचा तदुच्चारणादिस्वरूपः कायेन भूमौ शिरोलगनादिलक्षणश्च **प्रणामो** येन स तथा । एतेन शास्त्रकृन्मङ्गलमभिदधे । **जीतगतं** जीतव्यवहारानुप्रविष्टं, **श्राद्धदानप्रायश्चित्तं** श्राद्धानां श्रमणोपासकानामतिचारौचित्येन दानयोग्यं पापं छिनत्तीति पापछित् । अथवा **प्रायः चित्तं** जीवं मनो वाऽतिचारमलमलिनं शोधयतीति प्रायश्चित्तम् । यदुक्तम् —

**'पावं छिंदइ जम्हा पायच्छित्तंति भण्णए तम्हा । पाएण वावि चित्तं विसोहए तेण पच्छित्तं'** ।।
(व्य०सू० ३५)

आर्षत्वात् प्राकृतेन **पच्छित्तं** । **किमपि** कियन्मात्रं, न सर्वं सामस्त्येन श्राद्धातिचारविशेष—प्रायश्चित्तानां प्रकाशनासामर्थ्यात् । **जल्पामि** प्रतिपादयामीत्येतेनाभिधेयमाह । प्रयोजनं द्वेधा— कर्त्तुः श्रोतुश्च । द्वयमपि द्विधा — अनन्तरं परम्परं च । तत्रानन्तराभिधित्सयाऽऽह — किमर्थं ? **'सपरहिअधारणट्ठ'** त्ति । स्वपरहितधारणार्थाय । स्वपरयोर्हितं तच्च अवबोधेन शुभोदर्क लक्षणे तद्धारणं चेति वा समासः। एतेन कर्त्तुः श्रोतुश्चानन्तरं प्रयोजनमुक्तम् । परम्परं पुनरुभयोरपि प्रायश्चित्तपदानां याथातथ्य—प्रवर्त्तनेन परम्परया निःश्रेयसावाप्तिर्भवतीति स्वयमभ्यूह्यम् । सम्बन्धस्तु प्रायश्चित्तपदज्ञानमुपेयमिदं शास्त्रं तस्योपाय इत्येवमुपायोपेयलक्षणः सामर्थ्यादवसेयः । कथम् ? **यथाश्रुतं** श्रुतस्य—निशीथादेरनेकश्राद्धजीतकल्पलक्षणस्य स्वगुरुसम्प्रदायागतस्य चानतिक्रमेण । यथा तेषूक्तं तथैव, न स्वमनीषिकयेति गाथाक्षरार्थः ।

इह प्रवचने पञ्च व्यवहाराः प्रोच्यन्ते, तेषु व्यवहारेषु जीतव्यवहारानुसारेणैवात्र प्रायश्चित्तपदानि कथयिष्यन्ते। ते चामी पञ्च व्यवहारा आगम—श्रुता—ऽऽज्ञा—धारणा—जीताख्याः ।

**'आगम–सुअ–आणा–धारणा य जीए अ पंच ववहारा'** इति वचनात् । एतेषां च परस्परमयं विशेषः। तथाहि–आगमव्यवहारिणस्तावत् षड्विधाः, तद्यथा–केवलिनो, मनःपर्यायज्ञानिनो–ऽवधिज्ञानिनश्चतुर्दशपूर्विणो, दशपूर्विणो नवपूर्विणश्च । **'केवल–मणो–हि–चउदस–दस–नवपुव्वाइं पढमित्थ'** इति वचनात् । अत्र यदा केवली प्राप्यते तदा तस्याऽग्रे प्रायश्चित्तं गृह्यते, तदभावे मनःपर्यवज्ञानिनः पार्श्वे, एवं पूर्वपूर्वाभावे उत्तरोत्तरस्यान्तिके प्रायश्चित्तमङ्गीक्रियते यावन्नवपूर्विणः पार्श्वे इति । ते च केवल्यादयो जानाना अप्यालोचकमुखेन तदपराधपदानि शृण्वन्ति, न तु स्वयमेव ज्ञात्वा प्रायश्चित्तं ददते। एवमेव मानभ्रंश – निर्मायता – ऽऽराधनादि–भावात् । ततो निर्मायितयाऽऽलोचिते प्रायश्चित्तं ददते । समायतया तु स्वापराधपदाऽनालोचने–ऽन्यस्य पार्श्वे आलोचयेति कथयन्ति । आलोचितेऽपि च सम्यग् प्रत्यावृत्तस्यैव प्रायश्चित्तं ददते, नाऽन्यस्य । विस्मृतं तु स्मारयति न तु गोपितं, निष्फलत्वादिति । वक्ष्यति च —

**'कहेहि सव्वं जो वुत्तो०'** (अस्य ग्रन्थस्य मूलगाथा २९)

**'न संभरेइ जे दोसे०'** (अस्य ग्रन्थस्य मूलगाथा ३०) इत्यादि । १ ।

श्रुतव्यवहारिणश्चाष्ट – सप्त – षट् – पञ्च – चतु – स्त्रि – द्व्येकार्द्धपूर्विण एकादशाङ्गधारिणो निशीथकल्पव्यवहारदशाश्रुतस्कन्धपञ्चकल्पाद्यशेषश्रुतसूत्रार्थाभिज्ञाश्च । श्रुतव्यवहारश्चा–चाराङ्गादीनामष्टमपूर्वान्तानामेव । यदुक्तम् – **'आयारपकप्पाई सेसं सव्वं सुअं विणिद्दिट्ठं'** मिति ।

अत्राह कश्चिद् – कथमष्टमपूर्वान्तमेव श्रुतं नवमपूर्वादीनामश्रुतत्वम् ? अत्रोच्यते–आगम्यन्ते– परिच्छिद्यन्तेऽतीन्द्रियाः पदार्था येन स आगम इति व्युत्पत्तेर्नवमपूर्वादीनां श्रुतत्वाविशेषेऽपि केवलज्ञानादिवदतीन्द्रियार्थेषु विशिष्टज्ञानहेतुत्वेन सातिशयत्वादागमत्वेनैव व्यपदेशः । शेषश्रुतस्य तु नातीन्द्रियार्थेषु तथाविधोऽवबोधस्ततोऽस्मिन् श्रुतव्यवहारः । ते च श्रुतव्यवहारिणोऽपराधपदानि शृण्वन्तो मयाऽनाभोगादिना सम्यग् न श्रुतं पुनरालोचये–त्याद्युक्त्वा त्रिरालोचनां दापयन्ति । सदृगालोचनेऽपराधनिष्पन्नं प्रायश्चित्तं ददतेऽन्यथा मायानिष्पन्नमपराधनिष्पन्नं च प्रायश्चित्तद्वयं ददते । इदानीं चागमव्यवहारिणामभावे समयानुसारेणोत्कृष्टतमश्रुतानां श्रुतव्यवहारिणां सन्निधावालोच्यते । २ ।

आज्ञाव्यवहारस्तु कावपि गीतार्थाचार्यौ सम्यगधिगताशेषसूत्रार्थौ क्षीणजङ्घाबलौ दवीयोदेशवासिनौ परस्परेणोपान्तमागन्तुमक्षमौ तयोरेकः प्रायश्चित्तं जिघृक्षुरगीतार्थं मतिधारणाकुशलं सन्दिष्टवस्तुनयनसमर्थमागमभाषया गूढान्यपराधपदानि कथयित्वा मन्दमेधसं पुनः शिष्यं तानि लिखित्वा वा समर्प्य द्वितीयाचार्यसमीपे प्रस्थापयति । सोऽपि गूढपदैः प्रायश्चित्तं कथयित्वा लिखित्वा वा समर्प्य प्रेषयति । एष आज्ञालक्षणस्तृतीयो व्यवहारस्तदुक्तं– **'देसंतरठियाणं गूढपयालोयणा आण'** त्ति । ३ ।

धारणाव्यवहारस्तु संविग्नेन गीतार्थेनाचार्येण द्रव्यक्षेत्रकालभावपुरुषप्रतिसेवना अवलोक्य यत्रापराधे यत् प्रायश्चित्तं दत्तं तद्दृष्ट्वाऽन्योऽपि तेष्वेव द्रव्यादिषु तादृशे वाऽपराधे तदेव प्रायश्चित्तं दत्ते एष धारणाव्यवहारः । अथवा वैयावृत्त्यकरस्य गच्छोपग्रहकारिणः स्पर्द्धकपतेर्वा प्रवर्त्तकस्य संविग्नस्य देशदर्शनसहायस्य वाऽनेकशः कृतकार्यस्य समस्तछेदश्रुतदानाऽयोग्यस्य सानुग्रहो गुरुः कानिचिदुद्धृतानि प्रायश्चित्तपदानि कथयति । स तान्यवधार्योद्धृतपदालोचनां ददाति, स धारणाव्यवहारस्तदुक्तम्—

**'गीयत्थेणं दिन्नं सुद्धिं अवधारिऊण तह चेव । दिंतस्स धारणा तह उद्धिअपयधरणरूवा य'** ।।

**(पुष्पमाला (उपदेशमाला) ३६१, प्रवचन सारो० ८५८)**।४।

पञ्चमस्तु जीतव्यवहारः । येष्वपराधेषु पूर्वमहर्षयो बहुना तपःप्रकारेण शुद्धिं कृतवन्तस्तेष्वपराधेषु साम्प्रतं द्रव्यक्षेत्रकालभावान् विचिन्त्य संहननादीनां च हानिमासाद्य तदुचितेन केनचित्तपःप्रकारेण गीतार्थाः शुद्धिं निर्दिशन्ति तत्समयभाषया जीतमुच्यते । अथवा यद्यत्र गच्छे सूत्रातिरिक्तं न्यूनं वा कारणतः प्रायश्चित्तं प्रवर्त्तितं तज्जीतं तस्य व्यवहारो जीतव्यवहारस्तदुक्तम्—

**'दव्वाइं चिंतिऊणं संघयणाईण हाणिमासज्ज। पायच्छित्तं जीअं रूढं वा जं जहिं गच्छे'** ।।१।।

तथा— **'वत्तणुवत्तपवत्तो बहुसो आसेविओ महाणेणं । एसो अ जीअकप्पो पंचमओ होइ नायव्वो'** ।।२।।

**(व्य०सू० ४५०२, जी०भा० ६७५)**

**वृत्तः** पात्रबन्ध—ग्रन्थिदानादिक एकदा नवो जातः, ततोऽ**नुवृत्तः** पुरुषान्तरं यावत्, ततः **प्रवृत्तः** पुरुषप्रवाहेणात **एवासेवितो महाजनेन** बहुश्रुतनिवहेन । भाष्यकृताऽप्युक्तम्—

**'वत्तो नामं इक्कसि अणुवत्तो जो पुणो बिइअवारं । तइअवारं पवत्तो सुपरिग्गहिओ महाणेणं'** ।।

**(व्य०सू० ४५०३)**

**'बहुसो बहुस्सुएहिं जो वत्तो न य निवारिओ होइ । वत्तणुवत्तपमाणं जीएण कयं हवइ एयं'** ।।

**(व्य०सू० ४५२३)**

एष जीतकल्पः पञ्चमो व्यवहारो भवति ज्ञातव्यः ।५। इह पञ्चसु व्यवहारेषु सत्सु आगमव्यवहारिभ्य एव प्रायश्चित्तमादेयम् । आगमव्यवहारिणो ह्यतिशयिनः संक्लिश्यमानं विशुद्ध्यमानमवस्थितपरिणामं वा ज्ञात्वा श्रुतादधिकं हीनं तन्मात्रं वा तावद्ददति यावता शुद्ध्यति, न श्रुतमनुरुध्यन्ते ।

तदभावे श्रुतव्यवहारिभ्यो ग्राह्यं, ते हि श्रुतमनुवर्त्तमाना इङ्गिताकारनेत्रवक्त्रवचनविकारै—र्भावसंवेगाद्यमुपलक्ष्य त्रीन् वारानालोचनां कारयित्वा परिकुञ्चितमपरिकुञ्चितं वा ज्ञात्वा श्रुतोक्तं प्रायश्चित्तं ददति । तथाविधासन्नश्रुतधराभावे आज्ञाव्यवहारेण दूरस्थानामपि गीतार्थाचार्याणां पार्श्वात् प्रायश्चित्तमानायितव्यम् । तेषामप्यभावे श्रुतधरपार्श्वावधारितप्रायश्चित्तपदेभ्यो धारणाव्यवहारिभ्यो ग्राह्यम् । ते च द्वयेऽपि श्रुतोक्तप्रदत्वात् श्रुतव्यवहारकल्पा एव । सर्वेषां चैषामप्राप्तौ जीतेन व्यवहारः । जीतं—श्रुतोक्तापत्तितो हीनमधिकं वा परम्परयाऽऽचीर्णं तेन व्यवहारः । अयं च यावत्तीर्थं भवतीति । अस्य च जीतकल्पस्य विवरणं सङ्क्षेपेण च विधास्यते।

ततोऽत्र गाथानामक्षरार्थ एव ज्ञातव्यः । शब्दव्युत्पत्तिः संस्कारश्च स्वयमेव ज्ञातव्यौ, केवलस्य समुदायार्थमात्रस्यात्र कथनात् । तथा सूत्रे सामस्त्येन साक्षादनुक्तमपि चशब्दादिसूचितं किञ्चित् विशेषार्थजातं भणिष्यते । यतो भवति हि क्वचित् सूत्रे साक्षादनुक्तस्यान्यथोक्तस्य वाऽर्थविशेषस्य प्रतिपत्तिः प्राकृतत्वात् ।१। क्वापि सूचामात्रकृतत्वात् सूत्रस्य ।२। क्वाप्युपलक्षणव्याख्यानात् ।३। पदैकदेशे पदसमुदायोपचारात् ।४। विभक्तिव्यत्ययात् ।५। वचनव्यत्ययात् ।६। लिङ्गव्यत्ययात् ।७। विभक्तेर्लोपात् ।८। क्रियाध्याहारात् ।९। सम्भवच्चशब्दाध्याहारात् ।१०।ह्रस्वा ।११। ऽनुस्वार ।१२। द्विर्भावानां यथौचित्येन भावाभावाभ्यां ।१३। बहुवचनप्रयोगेऽपि द्विवचनस्य करणात् ।१४। षष्ठीस्थानेऽपि चतुर्थ्या व्याख्यानात् ।१५। अकारप्रश्लेषात् ।१६। एवमन्येभ्योऽपि **'प्राकृतं बहुल'**' मितिवचनाल्लब्धेभ्यः पूर्वविद्वज्जनप्रतिपादितेभ्योऽविशेषलक्षणेभ्यः सूत्रे साक्षादनभिहितापि विवक्षितार्थसङ्गतिर्विधेयेति । तथा श्रीमदुत्तराध्ययनबृहद्वृत्तावप्युक्तम्— **'क्वचित् सौत्र्या शैल्या क्वचिदधिकृतप्राकृतवशात्, क्वचिच्चार्थापत्त्या क्वचिदपि समारोपविधिना । क्वचिच्चाध्याहारात् क्वचिदविकलप्रक्रमबलादियं व्याख्या ज्ञेया क्वचिदपि तथाऽऽम्नायवशत'** ।।१।। इति । अथ ग्रन्थकृत् प्रतिज्ञातनिर्वाहणाय सकलग्रन्थवक्तव्यार्थसङ्ग्रहपरां द्वारगाथामाह —

**आलोअण दिज्ज कया कस्स कहं केण क इह दोसगुणा ।**
**दाणादाणे वा किं आलोअणिअं पच्छित्त—फलं ।।२।।**

व्याख्या—आलोचनादीनि द्वादश द्वाराणि भवन्तीति क्रियासम्बन्धः । **'आलोअण'** त्ति । पूर्वमालोचना स्वापराधप्रकाशनरूपा येन विधिना विधीयते, यथा च सम्यगनालोचकस्य सशल्यत्वेन न शुद्धिः तद्विपरीतस्य च शुद्धिस्तद्वक्तव्यम् ।१। तथा **कदा** कस्मिन् कियति वा काले आलोचनां **दद्यात्** ।२। तथा **कस्य** कीदृशस्य गुरोः पार्श्वे ।३। तथा **कथं** केन प्रकारेण, ऋजुत्वादिना ।४। तथा **केन** कीदृशेन शिष्येणालोचना प्रदातव्येति च वाच्यम् ।५। तथा **के** इहालोचनायां **दोषाः** ।६। **के गुणा** इति चाभिधातव्यम् ।७। तथाऽगीतार्थस्य पार्श्वे आलोचनाया **दाने** ये दोषा भवन्ति ते वक्ष्यन्ते ।८। तथा गीतार्थस्यापि पुरतो लज्जादिभिः सम्यगालोचनाया **अदाने** ये दोषाः सम्यग् दाने च ये गुणास्ते अभिधास्यन्ते ।९। **किं** **वाऽऽलोचनीयं**—मूलोत्तरगुणादिविषयमपराधजातमिति वाच्यम् ।१०। तथा प्रायश्चित्तमतिचारानुरूपं तपःप्रदानम् । **'पच्छित्त'** त्ति प्राकृतत्वात् इष्टरूपसिद्धिः ।११। **फलं** सम्यगालोचितातिचारानुरूपप्रायश्चित्तप्रतिपत्त्यादिना परमार्थप्रसिद्धिरूपं चेति द्वादशं द्वारं वक्तव्यम् ।१२। अयं च द्वारगाथासङ्क्षेपार्थः । विस्तरार्थस्तु यथास्थानमभिधास्यते ।।२।। अथ **'यथोद्देशं निर्देश'** इति प्रथमालोचनाद्वारमुच्यते । तत्र येन विधिनाऽऽलोचना प्रदीयते तामाह —

**आलोयणा सपक्खे चउकन्ना इह छकन्न परपक्खे ।**
**संविग्गभाविएणं दायव्व विहीइ जं भणिअं ।।३।।**

व्याख्या—**आलोचना** स्वापराधप्रकाशनरूपा गुरोः पुरतः पुरुषादिना दातव्येति सम्बन्धः। कथम्भूता ? इत्याह— **'सपक्खे चउकन्न'** त्ति । पुरुषः पुरुषस्यालोचनां ददाति स्त्री स्त्रियाश्च तदा स्वपक्षस्तस्मिन् स्वपक्षे पुरुषादौ गुरौ पुरुषादिकमालोचनादायकमाश्रित्य चतुष्कर्णा—द्वौ गुरोः कर्णौ द्वौ चालोचनादायकस्येति चतुर्णामेव कर्णानां भावात् । पुनः कथम्भूता ? इत्याह— **'इह छकन्न परपक्खे'** त्ति । इह प्रवचने—श्रीजिनागमे, न तु परतीर्थिकग्रन्थेषु, यत एवंरूपस्य—वक्ष्यमाणसूक्ष्मदोषपरिहारप्रावीण्यस्य तेष्वसद्भावात् । यदा स्त्री पुरुषस्यालोचनां ददाति, पुरुषः स्त्रिया वा तदा परपक्षस्तस्मिन् परपक्षे पुरुषादौ गुरौ स्त्र्यादिकमालोचनादायकमाश्रित्य **षट्कर्णा** द्वौ गुरोः कर्णौ द्वयोः स्त्र्यादिकयोरालोचकयोश्चत्वार इति षण्णामेव कर्णानां सद्भावात् । यतः सूत्रे तज्जातीयद्वितीययुक्तस्यैव योषिदादेरालोचनादानमनुज्ञातं, न त्वेकाकिनः तथात्मपरोभयसमुद्भवदोषसम्भवात् अज्ञातस्वरूपाणां किमेतौ प्रच्छन्नमालोचयत इति शङ्काभावाच्च । कीदृशेन शिष्येण दातव्या ? इत्याह— **'संविग्गभाविएणं'** ति । **संविग्नो** मोक्षाभिलाषी **भावितः** श्रीजिनागमवासितान्तःकरणः, संविग्नश्चासौ भावितश्चेति विग्रहः तेन । कथमित्याह—विधिना ऋजुत्वादिना चतुर्थद्वारे—**'जह बालो जंपंतो'** **(अस्य ग्रन्थस्य मूलगाथा १३)** इत्यादिवक्ष्यमाणलक्षणेन ईर्यापथिकीप्रतिक्रमणशोधिसन्देशनाद्यर्थ—मुखवस्त्रिकाप्रतिलेखनवन्दनकप्रदानादिलक्षणेन शास्त्रान्तरप्रसिद्धेन वा । यस्तु विधिना नालोचयति किन्तु लज्जादिभिः स्वपापानि गोपायति तस्य शुद्धिर्न भवति । **'जं भणिअं'** ति । यतः कारणाद् **भणितं** सूत्रे च वक्ष्यमाणमेवं रूपं प्रतिपादितं विद्यते ।।३।।

किं तद् भणितमित्याह —

**न हु सुज्झई ससल्लो जह भणिअं सासणे धुअरयाणं ।**
**उद्धरिअसव्वसल्लो सुज्झइ जीवो धुअकिलेसो ।।४।।**

**(व्य०सू० २२९)**

व्याख्या—हुशब्दस्यैवकारार्थत्वात् **न हु** नैव **शुद्ध्यति** अतिचारमलसमुद्भवकालुष्यविरहितो न भवत्येव । क ? इत्याह —**सशल्यः** संयमशरीरोपघातकारित्वात् शल्यमिव शल्यम्—अतिचारजातं ततो लज्जादिभिरनालोचितेन शल्येन सह वर्त्तत इति सशल्यो, जीव इति गम्यते । कुत एवमुच्यत ? इत्याह— **यथा** येन हेतुना **भणितं** प्रतिपादितं **शासने** प्रवचने, केषाम् ? इत्याह **धूतरजसां** विधूतसमस्तकर्मणां जिनेन्द्राणामित्यर्थः । किं भणितम् ? इत्याह— **उद्धृतसर्वशल्यो** ज्ञानादिविषयाऽशेषसूक्ष्मबादरातिचारप्रकटनेन समुत्खाताऽखिलभावशल्यः **शुद्ध्यति** सकलापराधपदोद्भूतकालुष्यापनयनेन निर्मलो भवति जीवः । विशेषणद्वारेण हेतुमाह— **धूतक्लेशो** विधूतकषाय इत्यर्थः । कषाया हि कर्मोपादानस्याविकलं कारणं तेषु च सत्सु न कथञ्चनाप्यात्मनः सम्यग् निःशल्यता शुद्धिश्च स्यादिति गाथार्थः ।।४।।

एवं सति यद्विधेयं तदाह—

**तं न खमं खु पमाओ मुहुत्तमवि चिट्ठिउं ससल्लेणं ।**
**आयरिअपायमूले गंतूण समुद्धरे सल्लं ।।५।।**
**(नि०भा०६३०९)**

व्याख्या — **'तं'** ति । तस्माद्धेतोर्न **क्षमं**—न युज्यते **'पमाओ'** त्ति । दकारलोपात् **प्रमादतः** प्रमत्ततावशात् न तु तादृग्गुर्वप्राप्त्यादिना, **मुहूर्त्तमपि** क्षणमपि **स्थातुं सशल्येन** अनालोचि—तातिचारपदेन किन्तु तत्काल**मेवाचार्यपादमूले गत्वा समुद्धरेत्** स्वमनःकोटरात् कर्षयेत् प्रकाशयेदित्यर्थः । किमित्याह—**शल्यं** प्रबलरागद्वेषादिकृतं स्वकर्म, निःशल्यो भवेदिति भावः ।।५।।

अथ कदा दद्याद् ? इति द्वितीयद्वारमाह —

**पक्खिय चाउम्मासे वरिसे वुक्कोसओ अ बारसहिं ।**
**निअमा आलोइज्जा गीआइगुणस्स भणिअं च ।।६।।**

व्याख्या—**पाक्षिके चतुर्मासके वार्षिके वा** पर्वणि तावद्यावद**दुत्कर्षतो द्वादशभिर्वर्षैर्वा निश्चयेनाऽऽलोचयेत् गीतादिगुणयुक्तस्य** सूत्रार्थवेत्तृत्वादिगुणगणगरिष्ठस्य असाधारणविशेषणाद् गुरोः पार्श्वे इति गाथाक्षरगमनिका।

अयमत्र भावः — **'गीअत्थो कडजोगी'** (**अस्य ग्रन्थस्य मूलगाथा - ८**) इत्यादि—गाथावक्ष्यमाणासाधारणगीतार्थादिगुणयुक्तगुरुसामग्र्यां पाक्षिके आलोचयेत् । तत्र गुरुसामग्र्यभावादिना केनचित् कारणेनाऽऽलोचनाया अप्रदाने चतुर्मासके, तत्राऽपि तददाने वार्षिके वा पर्वणि आलोचनीयम् । एवं तावद्यावदुत्कर्षतो द्वादशभिर्वर्षैः — उत्कर्षतो द्वादश वर्षाणि प्रतीक्ष्य गीतार्थगुरोः पुरत आलोचनीयं, न पुनर्गीतार्थादिगुणरहितस्य पार्श्वे आलोचनादानं युक्तम् । तत्र प्रत्युतापायसम्भवात् बहुनापि कालेन बहुतरक्षेत्रगमनेनापि च सद्गुणगुरोः समीप एवाऽऽलोचनादानस्याऽनुज्ञातत्वात् । **भणितं** चैतदर्थप्रकाशन—सूत्रे ।।६।।

किं भणितम् ? इत्याह —

**सल्लुद्धरणनिमित्तं खित्तंमि य सत्त जोयणसयाइं ।**
**काले बारस वरिसा गीअत्थगवेसणं कुज्जा ।।७।।**

व्याख्या—**शल्योद्धरणनिमित्तं** पूर्वोक्तस्वरूपस्य शल्यस्य प्रकाशनाय, **क्षेत्रे** इत्यत्र पञ्चम्यर्थे सप्तमी । ततः **क्षेत्रतः** क्षेत्रमाश्रित्य **सप्त योजनशतानि** । **काले** इत्यत्रापि सप्तम्याः पञ्चम्यर्थ—व्याख्यानात् **कालतः** कालमाश्रित्य **द्वादश वर्षाणि गीतार्थस्य** छेदग्रन्थसूत्रार्थाभिज्ञस्य, उपलक्षणत्वात् संविग्नादिगुणस्य गुरो**र्गवेषणम्** अन्वेषणं **कुर्यात्** इति गाथार्थः ।

भावार्थस्त्वयं—सम्यगात्मनः शुद्धिं कर्तुकामेन गीतार्थादिगुणोपेतस्यैव गुरोरालोचना प्रदातव्या । तादृशश्चेद् गुरुस्तत्र क्षेत्रे प्रत्यासन्नक्षेत्रे वा नाप्यते तदा तादृग्गुरुनिमित्तं दूरं दूरतरं

वा तावद् गन्तव्यं यावत् सप्त योजनशतानि । तथा पाक्षिके चतुर्मासके वार्षिके वा गीतार्थादिगुणान्वितस्य गुरोरालोचना प्रदातव्या । वार्षिकेऽपि यदि तादृशो गुरुर्न प्राप्यते तदा तावत्कालं प्रतीक्षणीयं यावता सद्गुरोरवाप्तिः स्यादुत्कर्षतो द्वादशाऽपि वर्षाणि प्रतीक्षेत । न च तथाऽप्यगीतार्थस्यान्तिके आलोचनां दद्यात् कस्यचनापि गुणस्याभावात् प्रत्युतानर्थसम्भवात् । यदुक्तम् —

**'नासेइ अगीअत्थो चउरंगं सव्वलोअसारंगं । नट्ठंमि चउरंगे न हु सुलहं होइ चउरंग' मिति ।।**
**(व्य०सू० १७०७)**

अथ कस्येति तृतीयद्वारमभिधित्सुराह —

**गीअत्थो कडजोगी चारित्ती तह य गाहणाकुसलो ।**
**खेअन्नो अविसाई भणिओ आलोयणायरिओ ।।८।।**

व्याख्या— गीतार्थादिगुणयुक्त **आलोचनाऽऽचार्य** आलोचनाप्रदानयोग्यो गुरुर्भवतीति क्रियासम्बन्धः । **गीतार्थः** अधीताचारप्रकल्पनिशीथादिश्रुतसूत्रार्थः । यदुक्तम् —

**'गीअं भन्नइ सुत्तं अत्थो पुण होइ तस्स वक्खाणं । गीएण य अत्थेण य संजुत्तो होइ गीअत्थो' ।।**
**(गाथासहस्री २४७)**

इति । **कृतयोगी** नाम सूत्रोपदेशेन मोक्षाविरोधी कृतः अभ्यस्तो यो **योगो** मनोवाक्कायव्यापारात्मको विविधषष्ठाष्टमादितपोध्यानादिरूपो वा स **कृतयोगः**, स यस्याऽस्तीति स **कृतयोगी** विविध-शुभध्यानतपोविशेषैः परिकर्मितात्मशरीर इत्यर्थः । **चारित्रीति** निरतिचारचारित्रवान् । तथा **ग्राहणाकुशलः ग्राहणा** नाम बह्वीभिर्युक्तिभिरालोचनादायकानां विविधप्रायश्चित्तादिविधेरङ्गीकरणं तत्र **कुशलः** । **खेदज्ञः** खेदो नाम प्रायश्चित्तादिविधिविषयः परिश्रमोऽभ्यास इति यावत् तं जानातीति खेदज्ञः प्रायश्चित्तविधेः सम्यग् ज्ञातेत्यर्थः । **अविषादी** महत्यप्यालोचकस्य दोषे श्रुते न विषादवान् प्रत्युतालोचनादायकस्य तत्तन्निदर्शनगर्भवैराग्यवचनैरुत्साहक इत्यर्थः ।।८।।

पुनरालोचनाचार्यस्यैव विशेषगुणस्वरूपमाह —

**आयारवमाहारव ववहारुव्वीलए पकुव्वी अ ।**
**अपरिस्सावी निज्जव अवायदंसी गुरू भणिओ ।।९।। (व्य०सू० ५२०)**

व्याख्या—**आचारवान्** आचारो ज्ञानाचारादिरूपः पञ्चप्रकारः सोऽस्यास्तीत्याचारवान् १, **आधारवान्** आलोचितापराधानामासामस्त्येन धारणमाधारः सोऽस्यास्तीत्याधारवान्, आलोचकेनालोच्यमानं यः सर्वमवधारयति स आधारवानित्यर्थः २, **व्यवहारवान्** प्ररूपणादिप्रकारेण व्यवह्रियतेऽपराधजातं प्रायश्चित्तप्रदानतो येन स **व्यवहारः** आगमादिकः पञ्चप्रकारः पूर्वोक्तस्वरूपः सोऽस्यास्तीति **व्यवहारवान्**, यः सम्यगागमादिव्यवहारं जानाति, ज्ञात्वा च सम्यक् प्रायश्चित्तप्रदानतो व्यवहरति स व्यवहारवानित्यर्थः ३, **अपव्रीडकः** अपगता व्रीडाऽस्येत्यपव्रीडः, अपव्रीडं कुरुतेऽपव्रीडयति, **अपव्रीडयति** लज्जां मोचयतीत्यपव्रीडकः। आलोचकं लज्जयाऽतिचारान् सम्यगनालोचयन्तं सर्वथा गोपायन्तं वा यो विचित्रमधुरादिवचनप्रयोगैः परमसंवेगसारैस्तथा कथञ्चनापि वक्ति यथा स लज्जामपहाय

सम्यगेवालोचयति सोऽपव्रीडकः ४, **प्रकुर्वी** 'कुर्व'' इत्यागमप्रसिद्धो धातुरस्ति यस्य विकुर्वणेति प्रयोगः । प्रकुर्वतीत्येवंशीलः प्रकुर्वी । किमुक्तं भवति—आलोचकेनालोचितेष्वपराधेषु यः सम्यक् प्रायश्चित्तप्रदानत आलोचकस्य विशुद्धिमुपजनयति स **प्रकुर्वीति** विशुद्धिं कारयितुं समर्थ इत्यर्थः ५, **अपरिस्रावी** न परिस्रवतीत्येवंशीलोऽपरिस्रावी—गोप्यमगोप्यं वाऽऽलोचकेनालोचितमतिचारजातं योऽन्यस्मै न कथयति सोऽपरिस्रावीति भावः ६, **'निज्जव'** ' त्ति । **निर्यापो**—निश्चितं यापयति प्रायश्चित्तविधिषु याप्यमालोचकं करोति—निर्वाहयतीति यावदिति निर्यापः । अच्प्रत्ययः । अपराधकारी यथोक्तप्रायश्चित्तं कर्तुमसमर्थो यथा निर्वहति तथा प्रायस्तदुचितप्रायश्चित्तप्रदानतः प्रायश्चित्तं कारयति स निर्यापक इति भावः ७, तथा **अपायदर्शी** इहलोकापायान् परलोकापायाँश्च दर्शयतीत्येवंशीलोऽपायदर्शी । किमुक्तं भवति—यः सम्यग् नालोचयति प्रतिकुञ्चितं वाऽऽलोचयति दत्तं वा प्रायश्चित्तं सम्यग् न करोति तस्य यदि त्वं सम्यग् नालोचयिष्यसि प्रतिकुञ्चितं वा करिष्यसि दत्तं वा प्रायश्चित्तं सम्यग् न पूरयिष्यसि ततस्ते भूयान् मासिकादिको दण्डो भविष्यतीत्येवमिहलोकापायान् तथा संसारे जन्ममरणादिकं प्रभूतमनुभवितव्यं दुर्लभबोधिता च तव भविष्यतीत्येवं परलोकापायाँश्च दर्शयति सोऽपायदर्शीति भावः ।८।

एवं प्रकाराऽष्टविधगुणयुक्त एव **'गुरू भणिओ'** ' त्ति गुरुर्भणितः—कथित आलोचनादानयोग्यः । आगम इति शेषः । यदाह चाऽऽगमः—

**'अट्ठहिं ठाणेहिं संपन्ने अणगारे अरहति आलोयणं पडिच्छित्तए, तं जहा—आयारवं १, आधारवं २, ववहारवं ३, उव्वीलए ४, पकुव्वए ५, अपरिस्सावी ६, निज्जवए ७, अवायदंसी ८'** इति (**भगवतीसूत्रं, शतकः २५, उद्देशकः ७, सूत्रं ७९९**) ।।९।।

*अथ यदा समग्रगुणालङ्कृतो गुरुर्न प्राप्यते तदा किं विधेयम् ? इत्याह —*

**सुगुरूण अलाभंमि आलोइज्ज सुसंजए ।**
**संविग्गपक्खिआणं तु गीअत्थाणं च अंतिए ।।१०।।**

व्याख्या— **'सल्लुद्धरणनिमित्त'** (**अस्य ग्रन्थस्य मूलगाथा** ७) मित्यादिगाथोक्तप्रकारेण गवेषणायां कृतायामपि सुगुरूणां **'गीअत्थो कडजोगी'** ' (**अस्य ग्रन्थस्य मूलगाथा** ८) इत्यादि—गाथोक्तासाधारणगुणयुक्तानामलाभे असम्प्राप्तावालोचनां दद्यात् । कः ? इत्याह— **'सुसंजए'** ' सुसंयत उपलक्षणत्वात् श्रमणोपासकोऽपि । केषामन्तिके ? इत्याह— **'संविग्नपाक्षिकाणां'** ' **संविग्नाश्चारित्रिणस्तेषां पक्षं** पक्षपातं साहाय्यं कुर्वन्तीति **संविग्नपाक्षिकाः** ।

**'सुद्धं सुसाहुधम्मं, कहेइ निंदइ य निययमायारं । सुतस्सियाण पुरओ, होइ य सव्वोभरायणीओ'** ' ।।
(**उपदेशमाला ५१५**)

**'वंदइ न य वंदावइ, कियकम्मं कुणइ कारवे नेय । अत्तट्ठा न वि दिक्खइ, देइ सुसाहूण बोहेउं'** ' ।।
(**उपदेशमाला ५१६**)

इत्याद्युपदेशमालादिशास्त्रान्तरोक्तस्वरूपास्तेषां, कीदृशानाम्? इत्याह—**गीतार्थानां** चशब्दस्यैवकारार्थत्वेन व्यवच्छेदफलत्वान्नागीतार्थानाम**न्तिके** समीपे ।

अयमर्थः— सप्तयोजनशत्यां द्वादशभिर्वर्षैश्च यदि तादृग्गुरुर्न प्राप्यते तदा संविग्न—पाक्षिकाणामन्तिके आलोचयेन्न पुनरनालोचितातिचार एवावतिष्ठते, सशल्यस्यानाराधकत्वात् । गवेषणं कुर्वाणस्त्वन्तराऽपि मृत आराधक एव । यद्वक्ष्यति —

**'आलोयणापरिणओ, सम्मं संपत्थितो गुरुसगासं । जइ अंतरा उ कालं, करेइ आराहओ सो उ'** ।।

(व्य०सू० २३२, नि०भा० ६३१२)

अधिकपदमधिकाक्षरं वाऽधिकार्थसंसूचकं भवतीति **'संविग्गपक्खिआणं तु'** इत्यत्र तुशब्दस्तदभावे पश्चात्कृत—सारूपि—प्रभृतीनां पार्श्वेऽप्यालोचनां दद्यादिति वक्ष्यमाणगाथोक्तश्लोकार्थक्रमसूचनार्थ इति गाथार्थः ।।१०।।

अथ संविग्नपाक्षिकाद्यभावे किं कर्तव्यम्? इत्याह —

**तयभावम्मि आलोए सिद्धे काऊण माणसे ।**
**आराहणा ससल्लस्स जओ नत्थित्ति आगमे ।।११।।**

व्याख्या—**तेषां** संविग्नपाक्षिकादीनामप्य**भावे**ऽप्राप्ता**वालोचयेत्** स्वापराधपदानि प्रकाशयेत् । किं कृत्वा ? इत्याह— **सिद्धान्** ज्ञानसङ्क्रान्ताशेषत्रिभुवनवस्तून् **मानसे कृत्वा** सिद्धसमक्षमित्यर्थः । कुतः कारणादेवं विधीयते ? इत्याह—**आराधना** आ—सामस्त्येन राधना—ज्ञानादिमोक्षमार्गस्य संसिद्धिः—प्रतिपालना, **सशल्यस्य** अनालोचितातिचारजातस्य **यतः** कारणा**न्नास्ति** न भवत्येवे**त्यागमे**, भणितमितिशेषः । इति गाथार्थः ।।११।।

अथ सुगुरूणामप्राप्तौ पूर्वगाथास्थतु[१]शब्दसंसूचितेन येन क्रमेण येषामन्तिके आलोचना प्रदीयते तं क्रमं स्पष्टयन्नाह —

**आयरियाइ सगच्छे संभोइय—इअरगीअपासत्थे ।**
**सारूवी—पच्छाकड—देवयपडिमा—अरिह—सिद्धे ।।१२।।**

**(आलोचनाग्रहण विधि प्रकरणम् ४८, द्र०स० ५० )**

व्याख्या—**स्वगच्छे आचार्यादौ** आचार्यसमीपे, आदिशब्दादुपाध्यायादीनां वा पार्श्वे आलोचना देया । इयमत्र भावना — प्रायश्चित्तस्थानमापन्नेन साधुना श्राद्धेन वा नियमतः प्रथमस्वकीयानामाचार्याणां समीपे आलोचयितव्यम् । तेषामभावे उपाध्यायस्य, तस्याप्यभावे प्रवर्तिनः, तस्याप्यभावे स्थविरस्य, तस्याप्यभावे गणावच्छेदिनो वा समीपे आलोचना देया । अथ स्वगच्छे पञ्चानामप्यभावस्तर्हि किं कार्यम्? इत्याह— **'संभोइय'** त्ति । स्वगच्छे आचार्यदीनामभावेऽन्यस्मिन् **साम्भोगिके** एकसामाचार्यादिवति गन्तव्यम् । तत्राप्याचार्यादि—क्रमेणालोचयितव्यम् । साम्भोगिकगच्छेऽपि पञ्चानामाचार्यादीनामभावे **'इयर'** त्ति ।

१. मूलगाथा - १० **'संविग्गपक्खिआणं तु'** इति पदं द्रष्टव्यम् ।

इतरोऽसाम्भोगिकः संविग्न इति तस्मिन् गन्तव्यम् । तत्राऽप्याचार्यादिक्रमेणैवालो–चयितव्यम् । संविग्नाऽसाम्भोगिके गच्छे पञ्चानामभावे **'गीय'** ' त्ति । पदैकदेशे पदसमुदा–योपचाराद् **गीतार्थः** । एतच्च विशेषणं **पार्श्वस्थ–सारूप्य–पश्चात्कृतानां** त्रयाणामपि योज्यम् ।

ततश्चायमर्थः— पार्श्वस्थस्य गीतार्थस्य समीपे आलोचयितव्यम् । तस्मिन्नपि गीतार्थे पार्श्वस्थे असति गीतार्थस्य सारूपिकस्य पार्श्वे संयतवेषस्य गृहस्थस्य लिङ्गमात्रधारिण इत्यर्थः । तस्मिन्नपि गीतार्थसारूपिके असति पश्चात्कृतस्य गीतार्थस्य पार्श्वे आलोचयितव्यम्। पश्चात्कृतचरणस्य–परित्यक्तचारित्रवेषस्य गृहस्थस्य पार्श्वे इतियावत् । पार्श्वस्थादीनां च मध्ये यस्य पुरत आलोचना दातुमिष्यते तमभ्युत्थाप्य तस्य पुरत आलोचयितव्यम् । अभ्युत्थापनं नाम वन्दनकप्रतीच्छनादिकं प्रत्यभ्युपगमकारापणा । अभ्युत्थिते वन्दनाप्रतीच्छनादिकं प्रति कृताभ्युपगमे प्रतिक्रान्तो भवेन्नान्यथा विनयमूलत्वाद्धर्मस्य । यदुक्तम् – **'विणओ सासणे मूल'** (आ०नि० १२१६) मित्यादि । अथ ते पार्श्वस्थादय आत्मानं हीनगुणं पश्यन्तो नाभ्युत्तिष्ठन्ति तदा पार्श्वस्थादीनां निषद्यामारचय्य प्रणाममात्रं कृत्वाऽऽलोचनीयम्। पश्चात्कृतस्य इत्वरसामायिकारोपणं लिङ्गप्रदानं च कृत्वा यथाविधि तदन्तिके आलोचनीयम् । यदि पार्श्वस्थादिकोऽभ्युत्तिष्ठति तदा तेनाऽन्यत्र गन्तव्यम् । येन प्रवचनलाघवं न भवति । तत्र च गत्वा तमापन्नप्रायश्चित्तं शुद्धतपो वाहयति मासादिकमुत्कर्षतः षण्मासपर्यवसानम् । अथ स नाभ्युत्तिष्ठति शुद्धं च तपस्तेन प्रायश्चित्ततया दत्तं ततस्तत्रैव तपो वहतीति । पार्श्वस्थादीनामप्यभावे यत्र कोरण्टकादौ गुणशीलादौ वा भगवान् मुनिसुव्रतस्वाम्यादिः श्रीवर्द्धमानस्वाम्यादिर्वा समवसृतस्तत्र तीर्थकरैर्गणधरैर्बहूनां बहूनि प्रायश्चित्तानि दत्तानि तानि च दीयमानानि तत्र तया देवतया दृष्टानि, ततस्तत्र गत्वा तत्र च सम्यक्त्वभावितदेवताराधनार्थमष्टमं कृत्वा तत्र सम्यगाकम्पिताया देवतायाः पुरतो यथोचितप्रतिपत्तिपुरस्सरमालोचयति । सा च प्रयच्छति यथार्हं प्रायश्चित्तम् । अथ सा देवता कदाचित् च्युता भवेत् पश्चादन्या समुत्पन्ना तया च न दृष्टस्तीर्थकरस्ततः साऽष्टमेनाऽऽकम्पिता ब्रूते महाविदेहे तीर्थंकरमापृच्छ्य समागच्छामि । ततः सा तेनानुज्ञाता महाविदेहे गत्वा तीर्थकरं पृच्छति पृष्ट्वा च समागत्य साध्वादिभ्यः प्रायश्चित्तं कथयति । तासामपि देवतानामभावे **अर्हत्प्रतिमानां** पुरतः स्वप्रायश्चित्तदानपरिज्ञानकुशल आलोचयति । ततश्च स्वयमेव प्रतिपद्यते प्रायश्चित्तम् । तासामप्यभावे प्राचीनादिदिगभिमुखोऽर्हतः सिद्धानभिसमीक्ष्य जानन् प्रायश्चित्तदानविधिविद्वाना–लोचयति । आलोच्य च स्वयमेव प्रायश्चित्तं प्रत्तिपद्यते । स च तथाप्रतिपद्यमानः शुद्ध एव, सूत्रोक्तविधिना प्रवृत्तेः । यदपि च विराधितं तत्रापि शुद्धः प्रायश्चित्तप्रतिपत्तेरिति ।

अथ पञ्चानामाचार्यादीनां प्रागुक्तानां किञ्चित्स्वरूपं व्यवहारभाष्यगाथाभिरेव स्पष्टीक्रियते। तत्र प्रथममाचार्यस्वरूपमाह —

**'सुत्तत्थतदुभएहि उवउत्ता नाणदंसणचरित्ते । गणतत्तिविप्पमुक्का एरिसया हुंति आयरिया'** ' ।।
**( व्य०सू० १४४ )**

व्याख्या—ये **सूत्रार्थतदुभयै**रुपेता इति गम्यते । तथा **ज्ञानं च दर्शनं च चारित्रं** चेति समाहारो द्वन्द्वस्तेषु सतत**मुपयुक्ताः** कृतोपयोगाः । तथा **गणस्य** गच्छस्य या **तप्तिः** सारा तया **विप्रमुक्ता** गणावच्छेदप्रभृतीनां तत्तप्तेः समर्पितत्वात्, उपलक्षणमेतत् शुभलक्षणोपेताश्च । ये **एतादृशा** एवंविधगुणोपेता **भवन्ति** ते **आचार्याः** । ते चार्थमेव केवलं भाषन्ते, न तु सूत्रमपि वाचयन्ति। तथा चोक्तम् —

**'सुत्तत्थविऊ लक्खणजुत्तो गच्छस्स मेढिभूओ य । गणतत्तिविप्पमुक्को अत्थं भासेइ आयरिओ'** ।।१।।
**(गाथासहस्री ६३८)**

अथ किं कारणमाचार्याः स्वयं सूत्रं न वाचयन्ति ? तत आह—

**एगग्गया य झाणे वुड्ढी तित्थयर अणुगिई गुरुया । आणाथिज्जमिइ गुरू कयरिणमुक्खो न वाएइ** ।।
**(व्य०सू० १४५)**

व्याख्या—सूत्रवाचनप्रदानपरिहारेणार्थमेव केवलं व्याख्यानयत आचार्य**स्यैकाग्रता** एकाग्रमनस्कता **ध्याने** अर्थचिन्तनात्मके भवति । यदि पुनः सूत्रमपि वाचयेत् तदा बहुव्यग्रत्वादर्थचिन्तायामेकाग्रता न स्यात् । एकाग्रतयाऽपि को गुणः ? इत्यत आह — **'वृद्धिः'** ' एकाग्रस्य हि सतोऽर्थचिन्तयतः सूत्रार्थस्य तत्र सूक्ष्मार्थोन्मीलनाद् वृद्धिरुपजायते । तथा **तीर्थकरानुकृति**रेवं कृता भवति । तथाहि—तीर्थकृतो भगवन्तः किलार्थमेव केवलं भाषन्ते, न तु सूत्रं नापि गणतप्तिं कुर्वन्ति । एवमाचार्या अपि तथावर्त्तमानास्तीर्थकरानुकारिणो भवन्ति । सूत्रवाचनां तु प्रयच्छतामाचार्याणां लाघवमप्युपजायते । तद्वाचनायास्ततोऽधस्तनपदवृत्तिभिः क्रियमाणत्वाद् । एवं च तस्य तथावर्त्तमानस्य लोके राज्ञ इव महती **गुरुता** प्रादुर्भवति । यद्गुरुतायां च प्रवचनप्रभावना । तथा आज्ञायां **स्थैर्यमाज्ञास्थैर्यं** कृतं भवति । तीर्थकृतामेवमाज्ञा पालिता भवतीत्यर्थः । इयं हि तीर्थकृतामाज्ञा यथोक्तप्रकारेण ममानुकारिणा आचार्येण भवितव्यमिति । इत्यस्माद्धेतुकलापाद् **गुरु**राचार्यः कृतः ऋणमोक्षो येन स **कृतऋणमोक्षः**, तेन हि सामान्यावस्थायामनेके साधवः सूत्रमध्यापितास्तत ऋणमोक्षस्य कृतत्वात् **सूत्रं न वाचयति** ।

उक्तमाचार्यस्वरूपमिदानीमुपाध्यायस्वरूपमाह —

**सुत्तत्थतदुभयविऊ उज्जुत्ता नाणदंसणचरित्ते । निप्फायग सीसाणं एरिसया हुंति उज्झाया** ।।
**( व्य०सू० १४६ )**

व्याख्या—ये **सूत्रार्थतदुभयविदो ज्ञानदर्शनचारित्रेषूद्युक्ता** उपयुक्तास्तथा **शिष्याणां** सूत्रवाचनादिना **निष्पादका एतादृशा भवन्त्युपाध्यायाः** । उक्तं च —

**'सम्मत्तनाणसंजमजुत्तो सुत्तत्थतदुभयविहिन्नू । आयरियठाणजुग्गो सुत्तं वाएइ उवज्झाओ'** ।।
(सं०प्र० ६९२)

अथ कस्मात् सूत्रमुपाध्यायो वाचयति ? उच्यते—अनेकगुणसम्भवात् । तानेवाह—

**'सुत्तत्थेसु थिरत्तं रिणमुक्खो आयई अपडिबंधो । पाडिच्छा मोहजओ सुत्तं वाएइ उवज्झाओ'** ।।
(व्य०सू० १४७)

व्याख्या—उपाध्यायः शिष्येभ्यः सूत्रवाचनां प्रयच्छन् स्वयमर्थमपि परिभावयति **सूत्रेऽर्थे** च तस्य **स्थिरत्वमुपजायते** । तथा अन्येभ्यः सूत्रवाचनाप्रदानेन सूत्रलक्षणस्य **ऋणस्य मोक्षः** कृतो भवति । तथा **आयत्यामागामिनि** काले आचार्यपदाध्यासे**ऽप्रतिबन्धो**ऽत्यन्ताभ्यस्ततया यथावस्थतया स्वरूपस्य सूत्रस्यानुवर्त्तनं भवति । तथा **'पाडिच्छे'** त्ति । येऽन्यतो गच्छान्तरादागत्य साधवस्तत्रोपसम्पदं गृह्णते ते **प्रतीच्छका** उच्यन्ते । ते च सूत्रवाचनाप्रदानेनानुगृहीता भवन्तीति वाक्यशेषः । तथा **मोहजयः** कृतो भवति, सूत्रवाचनादानव्यग्रस्य सतः प्रायश्चित्तविस्रोतसिकाया अभावात् । यत एवं गुणास्तस्मा**दुपाध्यायः सूत्रं वाचयेत्** ।।

उक्तमुपाध्यायस्वरूपमधुना प्रवर्तिनः स्वरूपमाह—

**'तवनियमविणयगुणनिहिपवत्तया नाणदंसणचरित्ते । संगहुवग्गहकुसला पवत्ति एआरिसा हुंति'** ।।
(व्य०सू० १४८)

व्याख्या—**तपो** द्वादशप्रभेदम्, **नियमा** विचित्रा द्रव्याद्यभिग्रहाः, **विनयो** ज्ञानादिविनयः । ततश्च तपोनियमविनयानां **गुणानां निधय** इव **तपोनियमविनयगुणनिधयस्तेषां प्रवर्त्तकाः** । तथा **ज्ञानदर्शनचारित्रेषूद्युक्ताः** सततोपयोगवन्त इति वाक्यशेषः । तथा **सङ्ग्रहः** शिष्याणां सङ्ग्रहणम् । **उपग्रहः** तेषामेव ज्ञानादिषु सीदतामुपष्टम्भकरणं तयोः **सङ्ग्रहोपग्रहयोः कुशलाः एतादृशा** एवंरूपाः **प्रवर्त्तिनो** भवन्ति । यथोचितं प्रशस्तयोगेषु सीदतः साधून् प्रवर्त्तयन्तीत्येवंशीलाः प्रवर्त्तिन इति व्युत्पत्तेः । तथा चाह —

**'संजमतवनियमेसुं जो जुग्गो तत्थ तं पवत्तेंति । असहू अ नियत्तंती गणतत्तील्लो पवत्तिओ'** ।।
(व्य०सू० १४९)

व्याख्या—तपःसंयमयोगेषु मध्ये **यो यत्र योग्यस्तं तत्र प्रवर्त्तयन्ति** । **असहाँश्चासमर्थांश्च निवर्त्तयन्ति** । एवं **गणतप्तिप्रवृत्ताः प्रवर्तिनः** ।।

उक्तं प्रवर्त्तिस्वरूपम् । सम्प्रति स्थविरस्वरूपमाह —

**'संविग्गो मद्दविओ पियधम्मो नाणदंसणचरित्ते । जे अट्ठे परिहायइ ते सारिंतो हवइ थेरो'** ।।
( व्य०सू० १५० )

व्याख्या—यः **संविग्नो** मोक्षाभिलाषी, **मार्द्दवितः** संजातमार्दवः, **प्रियधर्मा** एकान्तवल्लभ—संयमानुष्ठानो यो **ज्ञानदर्शनचारित्रेषु** मध्ये **यान् अर्थान्** उपादेयान् अनुष्ठानविशेषान् **परिहापयति** हानिं नयति तं तान् **संस्मारयन् भवति स्थविरः** । सीदमानान् साधून् ऐहिकामुष्मिकापायप्रदर्शनतो मोक्षमार्गे स्थिरीकरोतीति स्थविर इति व्युत्पत्तेस्तथा चाह —

**'थिरकरणा पुण थेरो, पवत्तिवावारिएसु अत्थेसु । जे जत्थ सीयइ जइ, संतबलो तं पचोएइ'** ।।

**(व्य०सू० ९५१)**

व्याख्या—**प्रवर्त्तिव्यापारितेष्वर्थेषु यो यत्र यतिः सीदति,** (तं) सद्विद्यमानं बलं यस्य स **सद्बलस्तथा**भूतः सन् यस्तं **प्रचोदयति**—प्रकर्षेण शिक्षयति स **स्थिरकरणात् स्थविर** इति ।

उक्तं स्थविरस्य स्वरूपम् । अधुना गीतार्थस्वरूपमाह —

**'उद्धावणा—पहावण—खित्तोवहिमग्गणासु अविसाई । सुत्तत्थतदुभयविऊ गीयत्था एरिसा हुंति'** ।।

**(व्य०सू० ९५२)**

व्याख्या—उत्—प्राबल्येन धावन**मुद्धावनं** प्राकृतत्वाच्च स्त्रीत्वनिर्देशः । किमुक्तं भवति—तथाविधे गच्छप्रयोजने समुत्पन्ने आचार्येण सन्दिष्टोऽसन्दिष्टो वा आचार्यान् विज्ञप्य यथैतत्कार्यमहं करिष्यामीति तस्य कार्यस्यात्मानुग्रहबुद्ध्या करण**मुद्धावनं**, शीघ्रं तस्य कार्यस्य निष्पादनं **प्रधावनं, क्षेत्रमार्गणा** क्षेत्रप्रत्युपेक्षणा, **(उपधिमार्गणा)** उपधेरुत्पादनम् एतासु येऽ—**विषादिनो** विषादं न गच्छन्ति । तथा **सूत्रार्थतदुभयविदः**, अन्यथा हेयोपादेयपरिज्ञानायोगात् ते **एतादृशा** एवंविधा **गीतार्था** गणावच्छेदिन इत्यर्थः । इत्यलं प्रसङ्गेनेति गाथार्थः ।।१२।।

अथ कथमिति चतुर्थं द्वारमभिधित्सुराह —

**जह बालो जंपंतो कज्जमकज्जं च उज्जुयं भणइ ।**
**तं तह आलोइज्जा मायामयविप्पमुक्को य ।।१३।।**

**(व्य०सू० ४२७९, ३१६, नि०भा० ३८६३, ६३९२, ओघ०नि० ८०२)**

व्याख्या—**यथा** येन प्रकारेण **बालो**ऽव्यक्तचैतन्यः शिशुर्मातापित्रोः पुरस्ताज्जल्पन् **कार्यं** सभ्यं कथनार्हम्, **अकार्यं** चासभ्यं कथनानर्हमपि **ऋजुकं** लज्जाभयादिभिरवक्रीकृतं **भणति** व्याहरति। ततः किमित्याह — **'तं'** ति । तत्कार्यं च स्वकृतं **'तह'** त्ति । एवकारस्य गम्यमानत्वात् **तथैव** बालकप्रकारे**णैवालोचयेत्** प्रकटयेदालोचक इति गम्यते । किंविशिष्टः सन् ? इत्याह—**मायामदविप्रमुक्तश्च**शब्दाल्लज्जादिरहितश्चेति गाथार्थः ।।१३।।

किं कृत्वाऽऽलोचयेद् ? इत्याह —

**गंतूण गुरुसमीवं काऊणं अंजलिं विणयमूलं ।**
**जह अप्पणो तह परे जाणाविज्जत्ति उवएसो ।।१४।। (ओ०नि० ७९८)**

व्याख्या—**गुरुसमीपं गत्वा कृत्वा च विनयमूलं** विनयपूर्वकमञ्जलिं **'जह अप्पणो'** त्ति विभक्तिव्यत्ययादात्मना **यथा** जानाति **तथा परान्** गुरूनपि **ज्ञापयेत्** स्वकीयदुष्कृतानीति गम्यते । इत्युपदेशस्तीर्थकरगणधरादीनामिति गाथार्थः ।।१४।।

अथ सम्यग् प्रायश्चित्तदानविधिज्ञेनापि परसमक्षमेवालोचनीयमिति दृष्टान्तद्वारेणाह—

**जह सुकुसलो वि विज्जो अन्नस्स कहेइ अप्पणो वाहिं ।**
**एवं जाणंतस्सवि सल्लुद्धरणं परसगासे ।।१५।।**
**(ओ०नि० ७९६, गच्छाचार पयन्ना १३)**

व्याख्या—**यथा सुकुशलश्चिकित्सायामतिनिपुणोऽपि वैद्योऽन्यस्य** वैद्यस्य **कथयत्यात्मनो व्याधिम्** । **एवं जानतोऽप्यतिचारानुरूपेण** सम्यग् प्रायश्चित्तपदान्यवगच्छतोऽपि गीतार्थस्यापीति भावः । अपिशब्दादजानतः किं वाच्यम् । **शल्योद्धरणं परसकाश** एव कर्त्तुं युज्यत इति गम्यत इति गाथार्थः ।।१५।।

नन्वियमालोचनात्मसाक्षिक्यपि केनापि विधेया उत परसाक्षिक्येव ? उच्यते—परसाक्षिक्येव । एतदेवाह—

**छत्तीसगुणसमन्ना—गएणवि (गएण तेण वि) अवस्स कायव्वा ।**
**परसक्खिया विसोही सुटठुवि ववहारकुसलेणं ।।१६।।**
**(ओ०नि० ७९५, जी०भा० ४११, नि०भा० ३८६२, व्य०सू० ४२७८)**

व्याख्या—**षट्त्रिंशद्गुणैः** शास्त्रान्तरप्रसिद्धैः **समन्वागतेन** संयुक्तेन **तेनाऽप्यशेषमहर्षिजनाति-**शायितया प्रसिद्धेनाप्याचार्येणेति गम्यते । **अवश्यमितिपदस्यावधारणार्थत्वाद्** भिन्नक्रमत्वाच्च **परसाक्षिक्येव विशोधिः** अतिचारालोचनेन निःशल्यता कर्त्तव्या । कीदृशेन ? इत्याह— **'सुट्ठुवि ववहारकुशलेणं'** ति । **सुष्ठ्वपि** पूर्वोक्तपञ्चव्यवहारनिपुणेनेति गाथाक्षरार्थः । षट्त्रिंशद् गुणास्त्वमी—

**देस—कुल—जाइ—रूवी संघयणी धिइजुओ अणासंसी । अविकत्थणो अमाई थिरपरिवाडी गहियवक्को ।।१।।**
**जियपरिसो जियनिद्दो मज्झत्थो देशकालभावन्नू । आसन्न—लद्ध—पइभो नाणाविहदेसभासन्नू ।।२।।**
**पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिन्नू । आहरण—हेउ—कारण—नयनिउणो गाहणाकुसलो ।।३।।**
**ससमय—परसमयविऊ गंभीरो दित्तिमं सिवो सोमो । गुणसयकलिओ जुत्तो पवयणसारं परिकहेउं ।।४।।**
**(सं०प्र० ६०० तः ६०३, द०वै०नि० ५—टीका)**

एतासां गाथानां किञ्चिद् व्याख्या — आर्यदेशोद्भूतः सुखावबोधवचनो भवतीत्यतो देशग्रहणम्। ।१। पैतृकं कुलमिक्ष्वाक्वादिज्ञातकुलश्च यथोत्क्षिप्तभारवहने न श्राम्यतीति ।२। मातृकी जातिस्तत्सम्पन्नो विनयादिगुणवान् भवति ।३। यत्राकृतिस्तत्र गुणा वसन्तीति

रूपग्रहणम् ।४। **संहनन–धृतियुक्तो** व्याख्यानादिषु न खेदमेति ।५–६। **अनाशंसी** श्रोतृभ्यो न वस्त्राद्याकाङ्क्षति ।७। **अविकत्थनो** हितमितभाषी ।८। **अमायी** सर्वत्र विश्वस्यः ।९। **स्थिरपरि–पाटिः** स्थिरपरिचितग्रन्थस्य सूत्रार्थगलनाऽसम्भवात् । १०। **ग्राह्यवाक्यः** सर्वत्रास्खलिताज्ञः ।११। **जितपर्षद्** राजादिसदसि न क्षोभमुपयाति ।१२। **जितनिद्रश्चा**ऽयमप्रमत्तत्वान्निद्राप्रमादिनः शिष्यान् सुखेनैव प्रबोधयति ।१३। **मध्यस्थः** शिष्येषु समचित्तो भवति ।१४। **देशकालभावज्ञः**सुखेनैव गुणवद्देशादौ विहरिष्यति ।१५–१६–१७। **आसन्नलब्धप्रतिभो** द्राक् परवाद्युत्तरदानसमर्थो भवति ।१८। **नानादेशभाषाविधिज्ञस्य** नानादेशजाः शिष्याः व्याख्यानं सुखमवभोत्स्यन्ते ।१९। **ज्ञानाद्याचारपञ्चकयुक्तः** श्रद्धेयवचनो भवति । २०–२१–२२–२३–२४ । **सूत्रार्थतदुभयविधिज्ञ** उत्सर्गापवादप्रपञ्चं यथावत् ज्ञापयिष्यति ।२५। **हेतूदाहरणनिमित्तनयप्रपञ्चज्ञो**ऽनाकुलो हेत्वादीनाचष्टे ।२६–२७–२८–२९। **ग्राहणाकुशलो** बह्वीभिर्युक्तिभिः शिष्यान् बोधयति ।३०। **स्वसमयपरसमयज्ञः** सुखेनैव तत्स्थापनोच्छेदौ करिष्यति ।३१–३२। **गम्भीरः** खेदसहः ।३३। **दीप्तिमान्** पराऽधृष्यः ।३४। शिवहेतुत्वात् **शिवस्त**दधिष्ठितदेशे मार्याद्युपशमात् ।३५। **सौम्यः** सर्वजनमनोरमणीयः ।३६। **गुणशतकलितः** प्रश्रयादिगुणोपेतः एवंविधः सूरिः **प्रवचनानुयोगे योग्यो** भवतीति गाथाचतुष्टयार्थः। यद्वा —

**[१]संविग्गो [२]मज्झत्थो [३]संतो [४]मउओ [५]रिऊ [६]सुसंतुट्ठो। [७]गीयत्थो [८]कडजोगी [९]भावन्नू [१०]लद्धिसंपन्नो ।।१।।**
**[११]देसन्नू [१२]आदेओ [१३]मइमं [१४]विन्नाणिओ [१५]कवी [१६]वाई। [१७]नेमित्ती [१८]ओअंसी [१९]उवयारी [२०]धारणाबलिओ ।।२।।**
**[२१]बहुदिट्ठो [२२]नयनिउणो [२३]पियंवओ [२४]सुस्सरो [२५]तवे निरओ। [२६]सुसरीरो [२७]सुप्पइभो [२८]चाई [२९]आणंदओ [३०]दक्खो ।।३।।**
**[३१]गंभीरो [३२]अणुवत्ती [३३]पडिवन्नपालओ [३४]थिरो [३५]धीरो। [३६]उचियन्नू सूरीणं छत्तीसगुणा इमे हुंति ।।४।।**

एतासां व्याख्या शास्त्रान्तरतो ज्ञेया। यद्वा —

**'अट्ठविहा गणिसंपय, चउग्गुणा नवरि हुंति बत्तीसं। विणओ य चउब्भेओ, छत्तीस गुणा इमे गुरुणो'** ।।

**(प्रव०सारो० ५४०)**

इत्यादिनानाप्रकारैरुक्ता अनेकधा सूरीणां षट्त्रिंशद् गुणा भवन्तीत्यलं विस्तरेण ।।१६।।

अथ केनेति पञ्चमद्वाराभिधित्सयालोचकस्य दश गुणानाह —

**जाइकुलविणयउवसम–इंदिअजयनाणदंसणसमग्गा ।**
**अणणुत्तावि अमाई चरणजुयालोअगा भणिआ ।।१७।।**
**(आलोचनाग्रहणविधिप्रक० २२, पुष्पमा०(उप०) ३६६)**

व्याख्या—**जात्या** विप्रादिकया मातृपक्षेण वा ।१। **कुलेनो**ग्रादिकेन पितृपक्षेण वा ।२। **विनयेन** द्विपञ्चाशद्भेदेन ।३। **उपशमेन** क्रोधादिपरित्यागरूपेण ।४। **पञ्चेन्द्रियजयेन** ।५। **ज्ञानेन** श्रुतज्ञानादिरूपेण ।६। **दर्शनेन** श्रद्धानलक्षणेन च **समग्राः** सहिताः ।७। **'अणणुत्तावि'** त्ति । आलोचनान्तरं पश्चात्तापरहिताः ।८। **अमायिनो** मायारहिताः ।९। **चरणयुताः** चारित्रवन्तः।१०। **'आलोअगा भणिअ'** त्ति । उत्कर्षतो दशैतद्गुणविशिष्टा **आलोचका** आलोचनादानयोग्या **भणिता** आगमे इतिशेषः । यदुक्तमागमे —

**दसहिं ठाणेहिं संपण्णे अणगारे अरहति अत्तदोसं आलोइत्तए । तं० जातिसंपण्णे१ कुलसंपण्णे२ विणयसंपण्णे३ णाणसंपण्णे४ दंसणसंपण्णे५ चरित्तसंपण्णे६ खंते७ दंते८ अमायी९ पच्छाणणुतावी१०** इति । तत्राऽऽलोचकानां शिष्याणां किमेतावान् गुणकलापोऽन्विष्यते ? इत्युच्यते—**जातिसम्पन्ना**स्तावत् प्रायोऽकृत्यं न कुर्वन्ति कृतं च सम्यगालोचयन्ति **कुलसम्पन्नाः** प्रतिपन्नप्रायश्चित्तनिर्वाहका भवन्ति। **विनयसम्पन्नाः** वन्दनादिकाया आलोचनासामाचार्याः सम्यक् प्रयोक्तारो भवन्ति । **उपशमसमग्रा(सम्पन्ना)** गुरूपालम्भादितर्जिता अपि न कुप्यन्ति । **इन्द्रियजयसमग्रा(सम्पन्ना)**स्तपः सम्यक् कुर्वन्ति । **ज्ञानसम्पन्नाः** श्रुतानुसारेण सम्यगालोचयन्ति अमुकश्रुतेन मे दत्तं प्रायश्चित्तमतः शुद्धोऽहमिति च जानते । **दर्शनसमग्रा(सम्पन्ना)**ः प्रायश्चित्ताच्छुद्धिं श्रद्दधते । **अननुतापिनो** नाम ये पश्चात्परितापं न कुर्वन्ति — हा ! दुष्टं कृतं मया यदालोचितमिदानीं प्रायश्चित्ततपः कथं करिष्यामीति । प्रत्युतैवं मन्यन्ते—धन्योऽहं यत् प्रायश्चित्तं प्रतिपन्नवानिति । **अमायिनो**ऽप्रतिकुञ्चितं निर्मायमालोचयन्ति । **चरणयुताः** पुनरतिचारं प्रायो न कुर्वन्ति अनालोचिते वा चारित्रं मे न शुद्ध्यतीति सम्यगालोचयन्तीति गाथाभावार्थः ।।१७।।

उक्तगुणस्यालोचकस्यालोचना निर्जराफला भवति । उक्तगुणरहितस्य त्वालोचनायाः प्रायः प्रयासमात्रफलत्वादित्यत एतदर्जने यतनीयं निर्जरार्थिनेति ।

अथेह के दोषाः ? इति षष्ठं द्वारं व्याचिख्यासुरालोचकस्य दश दोषानाह —

**आकम्पइत्ता अणुमाणइत्ता जं दिट्ठं बायरं व सुहुमं वा ।**
**छन्नं सद्दाउलयं बहुजण अवत्त तस्सेवी ।।१८।।**

**(भगवतीसूत्रम् ७९९, व्य०सू० ५२३)**

व्याख्या— **'आकम्प्ये'** ति । अयं गुरुर्वैयावृत्त्यकरणादिभिरावर्जितः सन् मम महत्यप्यपराधे यथा लघीयांसं प्रायश्चित्तं दण्डं ददातीत्यभिप्रायेणाऽऽलोचनाचार्यमावर्ज्य यदालोचयति स प्रथम आलोचनादोषो भवतीतिक्रियासम्बन्धो वाच्यः १ ।

तथा **अनुमान्य** अनुमानं कृत्वा लघुतरापराधनिवेदनादिना मृदुदण्डप्रदायकत्वादिस्वरूप-मालोचनाचार्यस्याकलय्यालोचयति । अथवा गुरुप्रायश्चित्तार्हमपराधजातं वचनप्रकारेण लघुप्रायश्चित्तार्हं कृत्वाऽऽलोचयति । यद्वा—अमुकेनामुकमालोचितं तस्येदं प्रायश्चित्तमायात-महमपि तदनुसारेणालोचयामि यथा तावतैव प्रायश्चित्तेन मुक्तो भवामि नाऽधिकं कर्तुं क्षमोऽहमित्याभिप्रायेणेति द्वितीय आलोचनादोषः । यद् **दृष्टं** गुरुभिरन्येन वा साधुना गृहस्थादिना वाऽनाचरणीयमाचर्यमाणं तदेवाऽऽलोचयति न पुनरदृष्टमिति तृतीयः । **'बायरं व'** त्ति । वाशब्दस्य विकल्पार्थत्वाद् बादरं वा बादरमतिचारजातमालोचयति न तु सूक्ष्मं तत्रावज्ञा-परत्वादिति चतुर्थः । **'सुहुमं व'** त्ति । अत्रापि वाशब्दस्य विकल्पार्थत्वात् सूक्ष्मं वा तृणादिग्रहण-रूपमालोचयति न तु बादरं, यः किल सूक्ष्ममप्यालोचयति स कथं बादरं स्वर्णमाणिक्यादिग्रहणरूपं सन्नालोचयेदित्येवंरूपभावसम्पादनायाचार्यस्येति पञ्चमः । **छन्नं** मन्दस्वरमालोचयति लज्जालुता-मुपदर्श्य यथा स्वयमेव शृणोति न गुरुस्तथैवाव्यक्तवचनेनालोचयतीत्यर्थ इति षष्ठः । **शब्दाकुलं** यथा स्यात्तथाऽऽलोचयति यथा गुरुरकृत्यं सम्यग् नावगच्छति, सम्यगनवगतापराधश्च गुरुर्मे स्वल्पं प्रायश्चित्तं दद्यादिति भाववान् । यद्वा **शब्दाकुलं** बृहच्छब्दं यथा भवत्येवमालोचयति अगीतार्थादीनपि श्रावयतीत्यर्थः इति सप्तमः। **'बहुजण'** त्ति । बहुजनेभ्यः स्वकृतमपराधं कथयति न तु गुरुपुरत एव । अथवा **बहवो जना** आलोचनागुरवो यत्र तद् **बहुजनमा**लोचनम् एकस्याप्यपराधस्य बहुभ्यो निवेदनमित्यर्थ इत्यष्टमः । **'अवत्त'** त्ति । **अव्यक्तम्** अव्यक्तस्यानवगतछेदग्रन्थरहस्यस्य गुरोः पुरतो यदालोचनं तदप्युपचारादव्यक्तमिति नवमः । **'तस्सेवि'** त्ति । तदेवापराधपदं स्वकृतापराधसदृशं यो गुरुः सेवते स **तत्सेवी**, तत्सकाशे शुद्धिं याचते । एष ममातिचारेण तुल्यस्ततो न किमपि प्रायश्चित्तं दास्यति, अल्पं वा दास्यति, न च मां खरण्टयिष्यति—यथा विरूपं कृतं त्वयेत्यादिमनः-परिणामवानिति दशमः । एतेषां दशानामप्यालोचनादोषाणां स्वरूपमवेत्यालोचकेनामी सम्यग् वर्जनीया मोक्षार्थिनेति भावार्थः ।।१८।।

अथ सम्यगालोचने के गुणाः ? इति सप्तमद्वारमाह —

**लहुआ ह्लाईजणणं अप्पपरनिअत्ति अज्जवं सोही ।**
**दुक्करकरणं आणा (विणओ) निस्सल्लत्तं च सोहिगुणा ।।१९।।**

**(व्य०सू० ३१७, नि०भा० ६३९१)**

व्याख्या—**लघुता** यथा भारवाही अपहृतभारो लघुर्भवति तथा आलोचकोऽप्युद्धृतमनःशल्यः पापभारापगमादेकान्तलघुर्भवति । यद्वक्ष्यति— **'कयपावोवि मणूसो'** ' (अस्य ग्रन्थस्य मूलगाथा २८) इत्यादि । तथा **'ह्लाईजणणं'** ' ति । ह्लादिजननं **'ह्लादैङ् सुखे चे'** ' ति भौवादिको धातुस्ततः ह्लादनं ह्लादिरौणादिक इप्रत्ययः प्रह्लति प्रह्लादिः तस्या जननं **ह्लादिजननं** प्रमोदोत्पाद इतियावत् । भवति हि संविग्नानां परममुनीनां पापशल्यापगमतो महान् प्रमोद इति । **'अप्पपरनिअत्ति'** ' त्ति । **आत्मपरनिवृत्तिर्दोषेभ्य** इतिशेषः । आलोचनाप्रदानतः स्वयमात्मनो दोषेभ्यो निवृत्तिः कृता, तं च दृष्ट्वाऽन्येऽप्यालोचनाभिमुखा भवन्ति इत्यन्येषामपि दोषेभ्यो निवर्त्तनमिति । तथा **'अज्जवं'** ' ति । यदतिचारजातं प्रतिसेवितं तत्परस्मै प्रकटयता स्वयमात्मन **आर्जवं** सम्यग् भावितं भवति । आर्जवं नाम अमायाविता। तथा **शोधिः** अतिचारपङ्कमलिनस्यात्मनश्चरणस्य वा प्रायश्चित्तजलेनातिचारपङ्कप्रक्षालनतो निर्मलता । तथा **दुष्करकरणं** दुष्करकारिता तथाहि—यत् प्रतिसेवनं तन्न दुष्करमनादिभवाभ्यस्तत्वात्, यत् पुनरालोचयति तद्दुष्करं प्रबलमोक्षानुयायिवीर्योल्लासविशेषेणैव तस्य कर्त्तुं शक्यत्वात् तस्य करणं दुष्करकरणं, तत एव मासक्षपणादिभ्योऽपि सम्यगालोचनाङ्गीकारस्याऽभ्यन्तरतपोभेदत्वेन दुष्करत्वं लक्ष्मणार्यादीनां तथाश्रवणात् । तथाचाऽऽज्ञा तीर्थकृतामाराधिता भवति। **'विणओ'** ' त्ति पाठे तु आलोचयता चारित्रविनयः सम्यगुपपादितो भवति । **निःशल्यत्वं** च प्रागुक्तशल्याभावश्च प्रतिपद्यत इति । यदुक्तं **श्रीमदुत्तराध्ययने** —

**'आलोअणयाए णं भंते ! जीवे किं जणयइ ?, आलोअणयाए णं मायानियाणमिच्छादरिसणसल्लाणं मुक्खमग्गविग्घाणं अणंतसंसारवड्ढणाणं उद्धरणं करेइ । उज्जुभावं च णं जणयइ। उज्जुभावपडिवण्णे य णं जीवे अमाई इत्थीवेअं नपुंसगवेअं च न बंधइ, पुव्वबद्धं च णं निज्जरेइ'** ' त्ति । **'सोहिगुण'** ' त्ति । शुद्धेः आलोचनाया अमी उक्तस्वरूपा इहापि भवे **गुणा** अवगन्तव्या इति गाथार्थः ।।१९।।

अथागीतार्थस्य पार्श्वे आलोचनाया दाने दोषा भवन्तीत्यष्टमं द्वारमाह —

**अग्गीओ न वियाणइ सोहिं चरणस्स देइ ऊणहियं ।**

**तो अप्पाणं आलोअगं च पाडेइ संसारे ।।२०।।**

व्याख्या— **'अग्गीओ'** त्ति पदैकदेशे पदसमुदायोपचारादगीतार्थः छेदश्रुतसूत्रार्थानभिज्ञो **न विजानाति शुद्धिं** शुद्धिप्रकारं **चरणस्य** सर्वविरतिरूपस्य देशविरतिरूपस्य वा चारित्रस्यातिचारमलमलिनस्य । इयता प्रायश्चित्तजातेन इयतः सर्वविरतेर्देशविरतेर्वाऽतिचारस्य शुद्धिर्भवतीत्यादिरूपं शोधनप्रकारमगीतार्थो न जानातीत्यर्थः । अत एव सूत्रोक्तादू**नमधिकं वा प्रायश्चित्तं ददाति** । एवं च को दोषः ? इत्याह— **'तो'** त्ति ततो न्यूनाधिकप्रायश्चित्तप्रदानत **आत्मानमुत्सूत्राचरणप्रवृत्तत्वादालोचकं च** तद्दत्तप्रायश्चित्तेनातिचारकालुष्यानपगमात् **पातयति संसारे** चतुर्गतिलक्षणे इति गाथार्थः ।।२०।।

कुत एवं ? यत आह —

**जो अमुणंतो सुद्धिं अपच्छित्ते य देइ पच्छित्तं ।**
**पच्छित्ते अइमत्तं आसायण तस्स महई उ ।।२१।।**

व्याख्या—**यः** कश्चिदगीतार्थादिः छेदश्रुतानभिज्ञत्वेन **'अमुणंतो'** त्ति । **अमन्वानोऽजानन् शुद्धिं** शुद्धिप्रकारं द्रव्य—क्षेत्र—काल—भाव—पुरुषप्रतिसेवनाद्यौचित्येन प्रायश्चित्तप्रदानलक्षणाम् । किं करोति ? इत्याह—**अप्रायश्चित्ते** प्रायश्चित्तानुचिते आलोचितेऽतिचारं विनैवेत्यर्थः, **ददाति प्रायश्चित्तम्** । चशब्दो व्यवहितसम्बन्धत्वात् **'पच्छित्ते'** इत्यत्र पुरस्ताद्योजयिष्यते । तथा **'पच्छित्ते'** त्ति । प्रायश्चित्तार्हे चालोचिते**ऽतिमात्रं** सूत्रोक्तादतिरिक्तं प्रायश्चित्तं ददाति । तस्य किं स्यादित्याह—**आशातना**—ज्ञानाद्यायशाटस्वरूपा **तस्या**ऽविधिप्रायश्चित्तप्रदायकस्य तुशब्दस्यावधारणार्थत्वेन **महत्येव** भवत्यनन्तसंसारवर्द्धकत्वादिति । तथा चोक्तम्—

**'अपच्छित्ते अ पच्छित्तं पच्छित्ते अइमत्तया । धम्मस्सासायणा तिव्वा मग्गस्स य विराहणा'** इति गाथार्थः ।।२१।। एवं च सति किं स्याद् ? इत्याह —

**आसायण मिच्छत्तं आसायणवज्जणा उ सम्मत्तं ।**
**आसायणानिमित्तं कुव्वइ दीहं च संसारं ।।२२।।**

**(उपदेशमाला - ४१०, सुमिणसित्तरि ४६)**

व्याख्या—**आशातना** मिथ्यात्वहेतुत्वान्**मिथ्यात्वम्** । यद्वा—**आशातनैव** साक्षान्मिथ्यात्वं, द्वयोरपि ज्ञानादिशाटरूपस्वरूपस्याविशेषात् । **आशातनावर्जना तु** साक्षात्**सम्यक्त्वम्** ।

तद्वर्जनपरिणामस्य सम्यक्त्वरूपत्वात् । अत एवागीतार्थोऽविधिप्रवृत्तेराशातनानिमित्तम् आशातनाप्रत्ययं आशातनया हेतुभूतयेत्यर्थः । **करोति दीर्घं** प्रभूतकालानुभवनीयं, चशब्दादसातवेदनीयं बहुलं **संसारं** भवभ्रमणमिति गाथार्थः ।।२२।।

एवं चागीतार्थस्य पुरत आलोचनाप्रदानमपायपरम्पराहेतुर्भवतीत्युक्तम् । अथ गीतार्थोऽपि सारणादिरहितः परिहार्य एव भवतीत्येतदर्थख्यापनार्थमाह —

**जह सरणमुवगयाणं जीवाणं निकिंतए सिरे जो उ ।**
**एवं सारणियाणं आयरिय असारओ गीओ ।।२३।।**

(नि० भा० ६६१५, व्य०सू० ५७०, गु०वि० ३/४)

व्याख्या—**'यथे'** 'त्युपदर्शने । यथा **शरणं** भयार्त्तत्राणलक्षण**मुपगतानां** सामीप्येन प्राप्तानां जीवानां शिरांसि **निकृन्तति** छिनत्ति **यः** पापीयान् । **तुः** सम्भावने । सम्भाव्येतैवंविधः कोऽपि क्लिष्टकर्मा विश्वस्तघातकः । एवमनेनैवोपमानेन **सारणीयानां** सारणायोग्यानां संयमयोगेषु प्रमादच्यावनेन प्रवर्त्तनीयानां स्मारणीयानां वाऽज्ञानप्रमादादिना विस्मृतेषु करणीययोगेषु स्मारणार्हाणां शरणमुपगतानां, साधूनामपीति शेषः । **आचार्योऽसारकोऽस्मारको** वा भावनीयः । सोऽपि शरणोपगतशिरोनिकर्त्तक इवैकान्तेनाहितकारीति भावः । शरणमुपगतानां संसारापारपारावारे निरनुकम्पं प्रक्षेपणात् । स च तादृश इहपरलोकार्थिना परित्याज्यः । यस्तु खरपरुषभणनेनापि संयमयोगेषु सीदतः **सारयति** प्रवर्त्तयति स संसारनिस्तारकत्वादेकान्तेन हितकारीत्याश्रयणीयः । यदुक्तम् —

**'जीहाए विलिहंतो न भद्दओ जत्थ सारणा नत्थि । दंडेणवि ताडिंतो स भद्दओ सारणा जत्थ'** ।।

(नि० भा० ६६१४, व्य०सू० ५६९)

उपलक्षणत्वादविधिप्रवृत्तादीनां वारणाद्यकर्त्ता । तथाचोक्तं सारणादिस्वरूपम् —

**'पम्हट्ठे सारणा वुत्ता अणायारस्स वारणा । चुक्काणं चोयणा भुज्जो निट्ठुरं पडिचोयणा'** ।।

**(गाथासहस्री ८०, विचारसारः २३८)**

इत्यादि । किंस्वरूप ? इत्याह— **'गीओ'** 'त्ति पदैकदेशे पदसमुदायोपचाराद् गीतार्थोऽपीति गाथार्थः । गीतार्थस्याप्याचार्यस्य स्मारणाद्यकर्त्तु (रालोचना न दातव्येति तात्पर्यार्थः) रालोचनायाश्च दाने दोषाः, एवमगीतार्थस्यास्मारकगीतार्थस्यापि च पुर आलोचनाप्रदाने ये दोषा भवन्ति, तद्दोषप्रतिपादकमष्टमं द्वारमुक्तम् ।

अथ गीतार्थादिगुणान्वितगुरोरालोचनाया अदाने दोषा दाने च गुणा भवन्तीत्येवंरूपं नवमं द्वारं व्याचिख्यासुराह —

**लज्जाइ गारवेण य बहुस्सुअमएण वावि दुच्चरिअं ।**
**जे न कहंति गुरूणं न हु ते आराहगा भणिआ ।।२४।।**

**(सम्बोध प्रकरणम् १४९४, गुरुस्थापना शतकम् ४८)**

व्याख्या—लज्जया व्रीडया **'गारवेण य'** ' त्ति । वचनव्यत्ययस्य प्राकृतत्वाद् **गारवैश्च** हेतुभूतै रसादिगारवप्रतिबद्धत्वेन तपोऽचिकीर्षुतयेत्यर्थः । **बहुश्रुतमदेन** वा बहुश्रुतोऽहमित्यभिमानेन, **वा**शब्दो विकल्पार्थे । **अपि**शब्दादपमान—प्रायश्चित्तभीरुत्वादिना च **दुश्चरितं** विरूद्धमासेवितं **ये** केचन मन्दबुद्धयः सत्त्वा **न कथयन्ति** नाऽऽलोचयन्ति **गुरूणां** पुरतः । हुशब्दस्यैवकारार्थत्वान्**नैव ते** दुश्चरितानालोचका **आराधका** ज्ञानादिमोक्षमार्गस्य **भणिता**स्तीर्थकरगणधरादिभिरिति गाथार्थः ।।२४।।

अथैनमेवार्थं दृष्टान्तपूर्वकं प्रकारान्तरेणाह —

**अप्पंपि भावसल्लं अणुद्धिअं रायवणिअतणएहिं ।**
**जायं कडुयविवागं किं पुण बहुआइं पावाइं ।।२५।।**

व्याख्या—इह शल्यं द्विधा—द्रव्यतो भावतश्च । तत्र द्रव्यतः शल्यं कण्टक—तोमरादि, परमाण्वादि द्रव्यनिष्पन्नत्वात्तस्य । भावतः शल्यं जीववध—मृषावादाद्यतिचारजातम् । भावोऽन्तरङ्गः परिणामः तमाश्रित्य शल्यमिव शल्यमात्मनोऽनन्तसंसारित्वादिविधायकत्वेन दुरन्तदुःखदायित्वात् । तदप्यल्पबहुत्वभेदतो द्विधा । **तत्राल्पमपि** पूर्वभवप्रव्रज्यानन्तरं स्वजायासाध्वीसानुरागावलोकनमात्रत्वेन स्तोकमपि भावशल्यं **'अनुद्धृतं'** ' गुरुभ्योऽनिवेदितं **राजवणिक्तनयाभ्यां**—यथाक्रममार्द्रकुमारेणेलापुत्रेण च **जातं कटुकविपाकं** दारुणायतिफलम्, तयोरेव सम्यक् संयमासन्नीकृतमोक्षयोरपि धर्मविच्युतिनीचकुलाऽऽगमनादिना दारुणपरिणामं बभूवेत्यर्थः। **किं पुनर्बहूनि** प्रभूतानि **पापा**न्यतिचारपदान्यनुद्धृतानीतिशेषः । तानि हि भावशुद्ध्याऽनालोचितान्यनन्तात्यन्तदारुणसंसारफलानि जन्तूनां भवन्तीति भावः ।।२५।।

एवं सति यद्विधीयते तद् गाथाद्वयेनाह —

**ता सहसन्नाणेण व भीएण व पिल्लिएण व परेणं ।**
**वसणेण पमाएण व मूढेण व रागदोसेणं ।।२६।।**
**जं किंचि कयमकज्जं न हु तं लब्भा पुणो समायरिउं ।**
**तं तह पडिक्कमियव्वं न हु तं हियएण वोढव्वं ।।२७।।**

**(ओ०नि० ८००, ८०१)**

व्याख्या—यतः कारणात् पापान्यनालोचितानि कटुविपाकानि भवन्ति, **ततः कारणात्** सहसाकारादिभिर्यत् किञ्चित्कृतमकार्यं नैव तत् पुनः समाचरितुं लभ्यमिति क्रियासम्बन्धः। **'सहस' त्ति । सहसाकारोऽ**विमृश्यकरणं, यथा पूर्वमदृष्ट्वा पदक्षेपे पश्चाज्जीवदर्शने पदस्य निवर्त्तयितुमशक्यता । यदुक्तम्—

**'पुव्वं अपासिऊणं छूढे पाये कुलिंगि जं पासे । न य तरइ निअत्तेउं जोगं सहसाकरणमेअं'** ।। ति
**(नि०भा० ९७, व्य०सू० ४०३६, जि०भा० १३५)**

'कुलिंगि' त्ति। कुत्सितमनिष्टं लिङ्गमिन्द्रियं यस्य स तथा। यद्वा—कुत्सितान्यसम्पूर्णानि लिङ्गानीन्द्रियाणि यस्य स तथा । उभयत्रापि द्वीन्द्रियादिरिति । **अज्ञानेन वा** पञ्चधा प्रमादविरहेऽपीर्यादिष्वनुपयोगेन। तथा चोक्तम्—

**'अन्नयरपमाएणं असंपउत्तस्स नोवउत्तस्स । इरियासु भूयत्थेसु अवट्टओ एवमन्नाणं''** ।।
**(नि०भा० ९६, व्य०सू० ४०३७, जि०भा० १३६)**

**निद्राद्यन्यतरप्रमादेनासम्प्रयुक्तस्य 'नोवउत्तस्स इरियासु भूयत्थेसु'' त्ति नो** निषेधे । भूतार्थो नाम विचार—विहार—संस्तार—भिक्षादिका संयमसाधिका क्रिया । धावन—वल्गन—डेपनादिकोऽ—भूतार्थस्तत **ईर्यासमित्यादिषु भूतार्थेष्वनुपयुक्तस्य 'अवट्टओ''** त्ति । **व्याख्यानतो विशेषार्थप्रतिपत्तिर्भवती—**तिन्यायतः प्राणातिपाते**ऽवर्त्तमानस्य** यद् भवनम् । **'एवमन्नाण''** त्ति । **एवंस्वरूपमज्ञानं** भवतीति। तथा **भीतेन** अभियोगभयेन पलायमानेन यत्कृतं प्राणव्यपरोपणादि । **'पिल्लिएण व परेणं''** ति । **परेण प्रेरितेन** द्वीन्द्रियादयः प्रेरिताः । तथा **व्यसनेन** द्यूतादिना, **प्रमादेन** मद्यविषयकषायनिद्राविकथालक्षणपञ्चविधप्रमादेन । **'आयंकेण व'** त्ति पाठे **आतङ्केन** ज्वराद्युपसर्गेण, **मोहेन** मिथ्यात्वभावनारूपेण, **रागद्वेषौ** प्रतीतौ । यदुक्तम्—

**'जूआइ होए वसणं पंचविहो खलु भवे पमाओ अ । मिच्छत्तभावणाओ मोहो तह रागदोसो अ'** ।।
**(व्य०सू० ४०३९, जि०भा० १३८)**

इति प्रथमगाथार्थः । **'जं किंचि''** त्ति । एतैः सहसाकारादिभिरुक्तलक्षणैर्हेतुभि**र्यत् किञ्चिन्**महत् सूक्ष्मं वा **कृतमकार्यम**कृत्यं प्राणिवधादि भवति, **नैव तदकार्यं 'लब्भ''** त्ति **लभ्यं** योग्यं **पुनः समाचरितुम्** एकश एवालोचयिष्यामीत्यादिबुद्ध्या भूयः कर्त्तुं नैव युक्तमित्यर्थः । 'लब्भा' इति तु आकारः प्राकृतत्वात् । पूर्वकृतस्य तु किम् ? इत्याह— **'तं''** ति । सहसाकारादिहेतुभिः कृतं **तदकार्यं तथैव** कृतप्रकारेणैव **प्रतिक्रमितव्यम्** । प्रतिक्रमणालोचनादिप्रायश्चित्तविषयं विधेयमितिभावः । **'न हु''** त्ति । **नैव तदकृत्यं** लज्जाभयादिभि**र्हृदयेन वोढव्यम्** । किन्तु तत्कालमेवालोचनीयमिति द्वितीयगाथार्थः ।।२६-२७।।

एवं च को गुणः ? इत्याह —

**कयपावो वि मणूसो आलोइअनिंदिअ गुरुसगासे ।**
**होइ अइरेगलहुओ ओहरियभरुव्व भारवहो ।।२८।।**
**(ओ०नि० ८०७)**

व्याख्या—**कृतपापोऽपि** विहितप्राणिवधाद्यकृत्योऽपि **मनुष्यः** पुरुषः **आलोचितानि** वाचा गुरोः पुरतः प्रकाशितानि, **निन्दितानि** हा ! मया दुष्ठु कृतं दुष्ठु कारितं दुष्ठु अनुमोदितं चेत्याद्यात्मगर्हात्मिकया निन्दया गुरोः पुरत एवं जुगुप्सितानि, **सूचकत्वात्सूत्रस्य** स्वकृतपापानि येन स **आलोचितनिन्दितः** । आलोचना गुरुं विना न स्यात् निंदा तु गुरुं विनापि स्यादिति तद्व्यवच्छेदार्थमाह—कस्मिन् ? **'गुरुसगासे''** त्ति । **गुरुसकाशे** गुरोः पुरतः । एवंविधः पुमान् **भवत्यतिरेकलघुको**ऽतिशयेन लाघववान् भवति पापभारापगमादिति शेषः । क इव ? **अपहृतभार इव भारवाहकः** । यथा कोऽपि भारवाहकः पुमान् लोहादिभारावतारणानन्तर—मात्मानमतिशयेन लघुकं मन्यते । तथाऽऽलोचकोऽप्यालोचितातिचार इति गाथार्थः ।।२८।।

अतः सर्वाण्यपि पापानि निर्मायतयाऽऽलोचनीयानि शुद्ध्यर्थिना । यतो मायाविनः कुतोऽपि शुद्धिर्न भवतीत्याह —

**कहेहि सव्वं जो वुत्तो जाणमाणो निगूहई ।**
**न तस्स दिंति पच्छित्तं बिंति अन्नत्थ सोहय ।।२९।।**
**(व्य०सू० ४०४६, जी०भा० १४५)**

व्याख्या—**'कहेहि सव्वं'** ति । **कथय सर्वमालोच्यजातं 'जो वुत्तो'** त्ति । इति **यः** कश्चिन्मन्दबुद्धिरालोचनाग्राही **उक्तः** सन् **जानन्** स्मरन्नपि स्वपापानि **निगूहति** कानिचिद् गोपयति । **तस्य** मायाविन आलोचकस्य **न ददति प्रायश्चित्तमागमव्यवहारिण** इति गम्यते । किन्तु **'बिंति''** त्ति । **ब्रुवन्ति** च तं प्रति— **'अन्यत्र शोधय''** इति । **अन्येषां पार्श्वे** गत्वाऽऽ**लोचये**ति । मायावितयाऽतिचारान् गोपयन्तं न स्मारयतीति भावः ।।२९।।

अथ यः स्मृत्यभावान्नालोचयति तस्य किम् ? इत्याह —

**न संभरेइ जे दोसे सब्भावा न य मायओ ।**
**पच्चक्खी साहए ते उ माइणो उ न साहए ।।३०।।**
**(व्य०सू० ४०४७, जी०भा० १४६)**

व्याख्या— यः कश्चनाप्यालोचनां ददानो **न स्मरति यान् दोषान्** स्वापराधान् **सद्भावाद्** अकौटिल्यभावात्। **न च मायातः** मायातोऽपि हि कश्चित् क्लिष्टकर्माऽऽलोचकः स्मरन्नपि निजाकृत्यान्यस्मरन्तमिवात्मानं दर्शयति, तस्य सद्भावादस्मरणेनाऽनालोचकस्य **प्रत्यक्षज्ञानी** अतिशयज्ञानी आगमव्यवहारीति यावत् **'साहए''** त्ति । **साधयति** कथयति **'ते उ'** त्ति । **तांस्तु** विस्मृतदोषान् यथा चामी दोषा विस्मृताः सन्ति तानालोचयेति । **मायाविनः पुनर्दोषस्मृतावप्यनालोचकस्य न कथयति** यदमुकानमुकानपराधानालोचयेति गाथार्थः।।३०।।

अथ मायाविनो दोषविशेषमाह —

**पावं काऊण सयं अप्पाणं सुद्धमेव वाहरइ ।**
**दुगुणं करेइ पावं बीअं बालस्स मंदत्तं ।।३१।।**

व्याख्या—**पापं** प्राणिवधादिकं **स्वयमात्मना** कृत्वाऽऽत्मानं **'शुद्धमेव'** **व्याहरति**— 'शुद्धोऽहं मया न पापं कृतमि' ति वक्ति । तथा च स मायावी **द्विगुणं पापं करोति**, द्विगुणप्रायश्चित्तशोध्यत्वात् । एकमपराधनिष्पन्नमेकं च मायानिष्पन्नं च प्रायश्चित्तं प्राप्नोतीत्यर्थः । **द्वितीयमेतद् बालस्य** मूर्खस्य **मन्दत्वम्** अपायानभिज्ञत्वम् । एकं पापकरणं द्वितीयं पापापलाप इति गाथार्थः ।।३१।।

ततः किं कुर्याद् ? इत्याह —

**मायाइदोसरहिओ पइसमयं वड्ढमाणसंवेगो ।**
**आलोइज्ज अकज्जं न पुणो काहंति निच्छयओ ।।३२।।**

(सं०प्र० १४९७)

व्याख्या—**मायया** आदिशब्दाल्लज्जाकम्पनादिभिश्च **दोषै रहितः प्रतिसमयं** प्रतिक्षणं **वर्द्धमान—संवेग आलोचयेदकार्यं** करणानर्हत्वादकार्यं पापं, **न पुनरेतदकृत्यं करिष्यामीति निश्चयादन्यथा** तत्प्रदानस्य **वैयर्थ्यप्रसङ्गादिति** गाथार्थः ।।३२।।

यथोक्तप्रकारेणालोचिताऽऽलोच्यपदानामालोचकानां फलमाह —

**निट्ठवियपावपंका सम्मं आलोइउं गुरुसगासे ।**
**पत्ता अणंतसत्ता सासयसुक्खं अणाबाहं ।।३३।।**

(सं०प्र० १५०४)

व्याख्या—**सम्यग्** निर्मायतया **गुरुसकाशे** स्वातिचारानिति गम्यते, **आलोच्य 'निट्ठवियपावपंक'** त्ति । **क्षपितसकलकर्मांशमलाः** सन्तोऽनन्तकालेनानन्तसङ्ख्याया अपि लभ्यमानत्वाद**नन्ताः सत्त्वाः** प्राणिनः **प्राप्ता** गताः, किमित्याह—**शाश्वतं** साद्यनन्तत्वात् **सौख्यं** मुक्तावस्थालक्षण**मना—बाधं** क्षुदादिबाधाऽभावात् । उपलक्षणत्वाद् यास्यन्त्यनन्ता इति गाथार्थः ।।३३।।

अनालोचकानां फलव्यतिरेकमाह—

**मरिउं ससल्लमरणं संसाराडविमहाकडिल्लंमि ।**
**सुइरं भमंति जीवा अणोरपारंमि ओइन्ना ।।३४।।**

(व्य०सू० १००५)

व्याख्या—**सशल्यमरणं** यथा भवति एवं **मृत्वा संसार एवाटवीमहाकडिल्लम्** अटवीमहागहनम् तत्र, कीदृशे ? इत्याह—**अणोरपारंमि** ति । **अनर्वाक्पारे अवतीर्णाः** प्राप्ताः सन्तः **सुचिरं** प्रभूततरकालं **भ्रमन्ति** नैरयिकाद्यपरापरपर्यायत्वेनोत्पद्यमाना तिष्ठन्ति **जीवा** इति गाथार्थः ।।३४।।

अथ सशल्यस्य तपसोऽपि व्यर्थतामाह —

**ससल्लो जइवि कट्ठुग्गं घोरं वीरं तवं चरे ।**
**दिव्वं वाससहस्सं उ तओवि तं तस्स निप्फलं ।।३५।। अविय -**

(सं०प्र० १४९०)

व्याख्या—**सशल्यो** मिथ्यादर्शनादिशल्यसंयुक्तः पुमान् **यद्यपि कष्टं** कष्टकारित्वात् **उग्रं** मन्दसत्त्वैरनाश्रयणीयत्वात् **घोरं** दुर्धरत्वात् **वीरं** वीरजनसाध्यत्वात् **तपो** बाह्यान्तरभेदं **चरेत्** कुर्यात् । कियन्मितं कालमित्याह— **'दिव्वं'** ति । लोकप्रसिद्ध्या देवसम्बन्धि **वर्षसहस्रम्** । तदुक्तम्—

**'भवेत्पैत्रं त्वहोरात्रं मासेनाब्देन दैवतम् । दैवे युगसहस्रे द्वे ब्राह्म्यकल्पौ तु ते नृणाम्'** ।।१।। इत्यादि । **ततोऽपि तत्तपस्तस्य निष्फलं** विशेषफलासाधकं सशल्यत्वादेवेति गाथार्थः ।।३५।।

**'अविय'** त्ति । **अपिचेति** समुच्चयार्थः । शल्यस्य अनुद्धृतस्य सर्वेभ्योऽप्यनर्थकारि—वस्तुभ्योऽधिकतां गाथाद्वयेनाह —

**नवि तं सत्थं व विसं व दुप्पउत्तो व कुणइ वेयालो ।**
**जंतं व दुप्पउत्तं सप्पुव्व पमाइणो कुद्धो ।।३६।।**
**(सं०प्र० १४९९, ओ०नि० ८०४)**

**जं कुणइ भावसल्लं अणुद्धिअं इत्थ सव्वदुहमूलं ।**
**दुल्लहबोहीअत्तं अणंतसंसारियत्तं च ।।३७।।**
**(सं०प्र० १५००, ओ०नि० ८०५, पंचा०७३२)**

व्याख्या — **नैव तदर्थ**जातमात्मनः करोतीति सम्बन्धः । **शस्त्रं** खड्गादि, **विषं** द्विधा—स्थावरं कालकूटादि, जङ्गमं सर्पादि, **दुष्प्रयुक्तो** वा द्रव्यक्षेत्रकालाद्यनौचित्येन व्यापारितो मन्त्रपूजोपहारादिना विराधितो **वैतालो** दुष्टव्यन्तरः, **यन्त्रं** शतघ्न्यादि **दुष्प्रयुक्तं** विरुद्धप्रकारव्यापारितं **सर्पो** वा **प्रमादिनः** कुतूहलादिना कलिञ्चादिघट्टनप्रमादवतः **क्रुद्धः** सन् **'जं कुणइ'** त्ति । **यदनर्थजातं करोति भावशल्यं** मिथ्यादर्शनादि **अनुद्धृतम**निष्काशितम् (निष्कासितम् वा) **'इत्थ'** इह संसारे **सर्वदुःखानां** शारीरमानसाद्यशेषकष्टानां **मूलं** मूलहेतुः । किंरूपं तदनर्थजातं ? इत्याह—**दुर्लभबोधिकत्वम्** । **'बोहीयत्तमि'** त्यत्रार्षत्वादिकारस्य ईकारः । तत **एवानन्तसंसारिकत्वं चेति** गाथाद्वयार्थः ।। ३६—३७ ।।

अतस्तत्त्वज्ञा यत् कुर्वन्ति, तदाह —

**तो उद्धरंति गारवरहिआ मूलं पुणब्भवलयाणं ।**
**मिच्छादंसणसल्लं मायासल्लं नियाणं च ।।३८।।**
**(ओ०नि० ८०६)**

व्याख्या—**तत्** तस्माद्धेतोरुद्धरन्ति हृदयान्निष्काशयन्ति **गारवरहिता** ऋद्ध्यादिगारववियुक्ता विवेकिन इति गम्यते । **मूलं** कन्दभूतं **पुनर्भवलतानां—पुनर्भवः** संसारः स एव **लता** वल्लयः तासां बहुवचनमुपमेयस्य गुपिलत्वख्यापनार्थम् , किं तदित्याह—**मिथ्यादर्शनमेव शल्यं** तीव्रतरदुःखहेतुत्वात् मिथ्यादर्शनशल्यम् । तथा **मायाशल्यं** माययाऽनुद्धृतमतिचारजातमुपचारान्मायोच्यते, ततो मायैव शल्यं मायाशल्यमतिचाराणां गुरोः पुरतोऽप्रकाशनरूपं भावशल्यमित्यर्थः । तथा **'निदानमि'** ति । **निदानशल्यं** विषयाभिष्वङ्गादिना प्रार्थनारूपम् । तच्च नवधा तथाच —

**निव १ सिट्ठि २ इत्थि ३ पुरिसे ४ परपविआरे सुरे ५ सपविआरे ६ । अप्परयसुर ७ दरिद्दे ८ सड्ढे ९ हुज्जा नव निआणा ।।**
**(सं०प्र० ७८९, १२५९ )**

इति गाथार्थः ।।३८।।

शल्योद्धारश्च गीतार्थादिगुणान्वितस्य गुरोरन्तिके विधेयः । स च गुरुश्चेदासन्नो नाऽवाप्यते तदा तन्निमित्तं सप्त योजनशतान्यपि यावद् गन्तव्यमिति पूर्वमुक्तम् । तथा गच्छतश्चेदायुःपरिसमाप्तिर्भवेत्तदा किमित्याह —

**आलोअणापरिणओ सम्मं संपट्ठिओ गुरुसगासे ।**
**जइ अंतरावि कालं करिज्ज आराहगो तहवि ।।३९।।**
**(नि०भा० ६३१२, व्य०सू० २३२, संवेगरंगशाला० २१३५)**

व्याख्या— **आलोचनापरिणत** एकान्तेनालोचनाप्रदानपरिणामः **सम्यग्** मनःशुद्ध्या, न पुनर्बहिर्वृत्तिमात्रेण **गुरुसकाशे** गीतार्थगुरुसमीपे गन्तुकामः **सम्प्रस्थितः** प्रचलितः सन् **यदि** कदाचिद**न्तरापि** मार्गेऽपि गुरुष्वमीलितेष्वपीति भावः । **कालं कुर्या**न्मरणमासादयेत् **तथा**प्यनालोचितातिचारोऽप्या**राधक** एव ज्ञानादिमोक्षमार्गस्य, न विराधकः शुद्धचित्तत्वेन विधिप्रवृत्तत्वादिति गाथार्थः ।।३९।।

अथ किमालोचनीयम्? इति दशमद्वारमभिधातुकाम आह —

**नाणाइसु मूलुत्तरगुणेसु कोहाइपावठाणाई ।**
**दव्वाइ य सहसाईहिं सेविअं जं तमालोए ।।४०।।**

व्याख्या—**ज्ञानादिषु** ज्ञानदर्शनचारित्रेषु तथा **मूलगुणेषु** —
**'वय[५]–समणधम्म[१०] संजम[१७] वेयावच्चं[१०] च बंभगुत्तीओ । नाणाइतियं[३] तव[१२] कोहनिग्गहाई[४] चरणमेअं' ।।**
**(ओ०नि०भा०गा० २)**

इति गाथोक्तेषु प्राणातिपातविरमणादिषु, **उत्तरगुणेषु** —
**'पिंडविसोही[४] समिई[५] भावण[१२] पडिमा[१२] य इंदियनिरोहो[५] । पडिलेहण[२५] गुत्तीओ[३] अभिग्गहा[४] चेव करणं तु।।**
**(ओ०नि०भा०गा० ३)**

इति गाथोक्तेषु पिण्डविशुद्ध्यादिषु, ज्ञानादीनां मूलगुणान्तर्गतत्वेऽपि पृथगुपादानं प्राधान्यख्यापनार्थम् । यद्वा—प्रायः प्रथमं ज्ञानादिविषया अतिचारा आलोचनीया इति ज्ञापनार्थम्। **'सेविअं जं'** ति । **सेवितं यत्** कालविनयादिहीनश्रुताध्ययनादि प्राणातिपातादि च **'तमालोए'** त्ति । **तदालोचयेदि**तिसम्बन्धः । तथा **'कोहाइपावठाणाइ'** त्ति । प्राणातिपातादीनां पञ्च पापस्थानानां मूलगुणविषयप्रतिसेवितेऽन्तर्भावाच्छेषमिति पदस्य गम्यत्वाच्छेषं **यत्क्रोधादि पापस्थानम्**, आदिशब्दात् कृत्याकरणादि **'दव्वाइ'** ' त्ति । तथाविध**द्रव्य—क्षेत्र— काल—भावा**नासाद्येति शेषः । **सहसाकारादिभिर्वक्ष्यमाणलक्षणैर्यदासेवितं तत्** सर्वमप्यालोचयेदिति गाथार्थः ।।४०।।

अथ के ते सहसाकारादयः ? इत्याह —

**सहसाऽणाभोगाउर–आवय–संकिअ–पओस–वीमंसा ।**
**भय–दप्प–पमायतिअं पडिसेवा दसह अहवेसा ।।४१।।**

व्याख्या—इह सर्वत्र प्रत्येकं तृतीयायोगः कार्यः ततः **'सहस'** त्ति । **सहसाकारेण**, सहसाकारो—ऽविमृश्यकरणमाकस्मिकक्रियेत्यर्थः । तथा— **अनाभोगेन** अत्यन्तविस्मृत्या अज्ञानेनेतियावत् । तथा **'आउर'** ' त्ति । भावप्रधानत्वान्निर्देशस्य, **आतुरत्वेन** आतुरत्वं नाम क्षुत्पिपासाद्यैः पीडितत्वम्। तथा **आपद्भिस्तत्र** आपच्चतुष्प्रकारा—द्रव्य—क्षेत्र—काल—भावभेदात् । तत्र द्रव्यापत् कल्पनीयाशनपानादिद्रव्यदुर्लभता १ । क्षेत्राऽऽपत् कान्तारादिषु प्रत्यासन्नग्रामादिरहितत्वं क्षेत्रमल्पं वा २। कालापद् दुर्भिक्षादिः कालः ३।

भावापद् ग्लानत्वादिः ४। तथा **शङ्कितत्वेन** सन्देहेन यदतिचारजातं कृतमकृतं वेति निश्चेतुमशक्यतादिरूपेण। यद्वा—**शङ्कितेन** आधाकर्मादिदोषत्वेन शङ्कितभक्तपानादिविषयेन। अत्र निशीथपाठे **'तिंतिणे'** ' त्ति पठ्यते । तत्र **तिन्तिणत्वं** नाम आहाराद्यलाभे सखेदं वचनम् । तथा प्रद्वेषेण—क्रोधादिकषायरूपेण। तथा **विमर्शेन** शैक्षकादिपरिणामपरिज्ञानार्थं परीक्षया । तथा **'भय—दप्प—पमायतिअं'** ' ति । **भयदर्पप्रमादत्रिकेन** च । तत्र **भयं** सप्तविधम् इहपरलोकादानाकस्मादाजीवमरणाश्लोकरूपम्। **दर्पो** धावनवल्गनादिः । **प्रमादः** कषायविषयविकथादिस्तेषां **त्रिकं भयदर्पप्रमादत्रिकं** तेन । **'पडिसेवा दसह'** ' त्ति । एवं सहसाकारादिभिः **सप्तभिर्भयदर्पप्रमादत्रिकेन च प्रतिसेवा** । अतिचारापत्तिर्दशप्रकारा भवतीति योगः । **'अहवेस'** ' त्ति । **अथवेति** प्रकारान्तरेण **एषा** वक्ष्यमाणरूपा प्रकारान्तरतो दशधा प्रतिसेवा भवतीतिशेष इति गाथार्थः ।।४१।।

तामेवाह —

**दप्प अकप्प निरालंब—चिअत्ते अप्पसत्थ—वीसत्थे ।**
**अपरिच्छि अकडजोगी निरणुत्तावी अ निस्संको ।।४२।।**

**(नि०भा० ४६३, व्य०सू० ४४४२, गु०वि० २—१९)**

व्याख्या—**दर्पः** धावनडेपनादिः । तत्र धावनं निष्कारणमतित्वरितमविश्रामं गमनम्, डेपनं गर्त्तवरण्डादीनां रयेणोल्लङ्घनम् । आदिशब्दात् मल्लवद् बाहुयुद्धकरण — लकुटादिभ्रमण — वल्गनादिग्रहः १। **अकल्पः** अपरिणतपृथ्वीकायादिग्रहणानन्तकाय—बहुबीज—प्रतिषिद्धसचित्त—फलाद्यभ्यवहारादिः अनधीतपिण्डैषणाध्ययनसाध्वानीतोपधिशय्याद्युपभोगादिर्वा २। **निरालम्बो** ज्ञानाद्यालम्बनं विनापि निष्कारणमकल्पिकासेवनकारी । यद्वा—अमुकेनामुकमाचरितमतोऽहमप्याचरामीति ३। **'चियत्ते'** ' त्ति । **त्यक्तकृत्यः** त्यक्तचारित्रः, अपवादेनासंस्तरे ग्लानादिकारणे वा यदकल्प्यमासेवितं पुनस्तदेव संस्तरेऽपि निवृत्तरोगोऽप्यासेवते ४। **अप्रशस्तः** अप्रशस्तेन भावेन कामादिवृद्ध्याद्यर्थं कल्प्यमपि भुञानः किं पुनरकल्प्यम् ५। **विश्वस्तः** प्राणातिपाताद्यकृत्यं सेवमानः स्वपक्षतः साधुश्रावकादेः परपक्षतो मिथ्यादृष्ट्यादेर्न बिभेति । यद्वा—अकृत्यं सेवमानः संसारादभीरुर्वा **विश्वस्तः** ६। **'अपरिच्छि'** ' त्ति । **अपरीक्षी** युक्तायुक्तविवेकविकलः, यद्वा—उत्सर्गापवादयोरायव्ययावनालोच्य प्रतिसेवनाकारी ७। **अकृतयोगी** अगीतार्थो ग्लानादिकार्ये त्रीन् वारान् कल्प्यमेषणीयं वाऽपरिभाव्य प्रथमवेलायामेव यथा तथाऽकल्प्यानेषणीयग्राही ८। **'निरणुत्तावी अ'** ' त्ति । **निरनुतापी** अपश्चात्तापी योऽपवादेनाप्यकृत्यं कृत्वा नानुतप्यते, यथा मया दुष्कृतं कृतमिति, यस्तु दर्पेणासेव्य नानुतप्यते किं तस्योच्यते ? ९। **निःशङ्को** निरपेक्षः अकार्यं कुर्वन् कस्याप्याचार्यादेर्न शङ्कते, नेहलोकस्यापि बिभेतीत्यर्थः। यद्वा—**निश्शङ्को** निर्दय इहपरलोकापायशङ्कारहितः १०। एवं दर्पाकल्पयोः सप्तमीयोगाद्दर्पेऽकल्पे च सति, निरालम्बादिषु त्वाधारे आधेयोपचाराच्च । अयमर्थः—

आधारे— प्रतिसेवावति पुरुषे आधेयोपचाराच्चैषापि दशधा प्रतिसेवा भवतीति गाथार्थः ।।४२।।
अथ प्रतिसेवनापदेषु प्रभूतेष्वेकमप्यनालोचितं महतेऽनर्थाय भवतीति । तथा च श्रीभगवद्वचः—

**पायच्छित्तस्स ठाणाइं संखाइयाइं गोयमा ! ।**
**अणालोइअं तु इक्कंपि ससल्लं मरणं मरइ ।।४३।।**

**(आलोचनाग्रहण विधि प्रकरणम् ४२)**

व्याख्या—**प्रायश्चित्त**मतिचारविशुद्ध्यर्थं गुरुदत्तं तपः, **तस्य स्थानानि** अतिचारा येषु प्रायश्चित्तं दीयत इत्यर्थः । **सङ्ख्यातीतानि** सन्तीति भगवान् वीरः श्रीगौतमं प्रति प्राहेतिसम्बन्धः । **'अणालोइयं तु इक्कंपि'** त्ति । इहाऽग्रतश्च विभक्तिव्यत्ययः प्राकृतत्वात् । **तु**शब्दः पुनरर्थे । ततस्तु—**पुनरनालोचितेनैकेनापि** प्रायश्चित्तस्थानेन **सशल्येन मरणेन म्रियते** सशल्य एव म्रियते इत्यर्थः ।।४३।।
अतः सम्यगालोच्य यत् कार्यं तदाह —

**ता तस्स पायच्छित्तं जं मग्गविऊ गुरू उवइसंति ।**
**तं तह आयरियव्वं अणवत्थपसंगभीएणं ।।४४।।**

**(ओ०नि० ८०३)**

व्याख्या— **'त'** त्ति, यत एवं ततस्तस्यापराधस्य **प्रायश्चित्तं** तपः **'जं'** त्ति । **यत्** यावन्मात्रं **'मग्गविऊ'** त्ति, **मार्गविदः** । तत्र मार्गो द्विधा द्रव्यतो भावतश्च । द्रव्यतो नगरग्रामादिपन्थाः भावतस्तु मोक्षमार्गः । स च द्विधा—श्रुतरूपश्चारित्ररूपश्च । अत्र तु भावमार्गेणाधिकारस्तस्य विदः—श्रुतवन्तः क्रियावन्तश्चेत्यर्थः । **'गुरू'** त्ति, **गुरव उपदिशन्ति** कथयन्ति, **तत्** प्रायश्चित्तं **तथा** गुरुदत्तप्रकारेणा**चरितव्यं** कर्त्तव्यं साध्वादिनाऽऽलोचकेनेति गम्यते, न तु प्रमादावहीलने कार्ये इत्यर्थः । कीदृशेन ? इत्याह— **'अनवस्थाप्रसङ्गभीतेन'** तं दृष्ट्वाऽन्योऽपि तथा करोतीत्यनवस्थाप्रसङ्गः । यद्वा— अवस्थानमवस्था न अवस्था **अनवस्था** अवस्थानाभाव इति यावत् । अयमर्थः— प्रथमं परिणामस्य तथाविधदारुणत्वाभावेनालोचनार्हमपराधमासेव्य पश्चाल्लज्जादिना गुरोः पुरतोऽनालोचकत्वेन परिणामदारुणत्ववृद्ध्या प्रतिक्रमणाद्यं प्राप्नोति प्रायश्चित्तं, तावद्वाच्यं यावत् पाराञ्चिकमपि प्राप्नोति । एवं प्रायश्चित्ते**ष्वनवस्थिति**रूपेति तस्याः **प्रसङ्ग** इति गाथार्थः ।।४४।।

लघुप्रायश्चित्तशोध्यं स्थानं भावविशेषाद् गुरुप्रायश्चित्तशोध्यं स्यात्तथा गुरुप्रायश्चित्तशोध्यं भावविशेषाल्लघुप्रायश्चित्तशोध्यं भवतीति भावस्यैव प्रायश्चित्तापत्त्यविकलहेतुत्वज्ञापनार्थं प्रायश्चित्तापत्तिवैचित्र्यमाह —

**जह मन्ने पढमं सेविऊण निग्गच्छई उ चरिमेणं ।**
**तह मन्ने चरिमं सेविऊण निग्गच्छई पढमे ।।४५।।**

व्याख्या—**मन्ये** सम्भावये, **यथा** येन पूर्वोक्तप्रकारेण **प्रथमं** प्रथमालोचनाप्रायश्चित्तशोध्यं पदमासेव्यातिसङ्क्लिष्टाध्यवसायत्वाच्चरिमेण **निर्गच्छति** पाराञ्चिकप्रायश्चित्तेन शुद्ध्यतीत्यर्थः । तुशब्दादनवस्थाप्यादिभिरपि । **तथा मन्ये, चरिमं** पाराञ्चिकोचितं पद**मासेव्य** ज्ञानाद्यालम्बनमपेक्ष्य सम्यग् यतनया प्रवृत्तत्वेन **'निग्गच्छइ पढमे'** ' त्ति । **प्रथमालोचनाप्रायश्चित्तेनैव** शुद्ध्यतीति भावः । यस्मादेवं तस्माद्यद् गुरव उपदिशन्ति प्रायश्चित्तं तत्तथैव समाचरितव्यमनवस्थाप्रसङ्गादिदोषभीतेन जन्तुनेति पूर्वगाथया सह सम्बन्धः ।।

अथ प्रायश्चित्तभेदानाह —

**तं दसविहमालोयण—पडिकमणोभय—विवेगमुस्सग्गे ।**
**तव—छेय—मूल—अणवट्ठया य पारंचिए चेव ।।४६।।**

व्याख्या— **'तं'** ' ति । **तत्** प्रस्तुतं प्रायश्चित्तं **दशविधं** दशप्रकारं भवतीतिक्रियासम्बन्धः। के ते दश प्रकारा ? इत्याह— **'आलोयण'** ' त्ति । **आलोचनम्** आ—मर्यादया **'जह बालो जंपंतो'** (अत्रग्रन्थेमूलगाथा १३) इत्यादिरूपया लोचनं—गुरोः पुरतः प्रकाशनमालोचनं, वचसा प्रकटीकरणमिति भावः। तावन्मात्रेणैव यस्य पापस्य शुद्धिस्तदालोचनार्हं, तद्विशोधकं प्रायश्चित्तमुपचारादालोचनार्हम् । एवं सर्वेष्वपि उपचारो द्रष्टव्यः ।१। **प्रतिक्रमणं** सहसाऽनुपयुक्तेन यदि श्लेष्मादि प्रक्षिप्तं भवति, न च हिंसादिकं दोषमापन्न इत्यादिकमन्यदपि यद् मिथ्यादुष्कृतमात्रेणैव शुद्ध्यति, न गुरोः पुरत आलोच्यते तत् प्रतिक्रमणार्हम् ।२। **उभयम्** आलोचनाप्रतिक्रमणरूपम् । यच्च प्रतिसेव्य गुरोः पुरत आलोच्यते गुरूपदेशेन च विशुद्ध्यर्थं मिथ्यादुष्कृतं दीयते तत् तदुभयार्हम् ।३। **विवेकः** त्यागः, यस्य चानेषणीयादेः गृहीतभक्तपानादेर्विधिना परित्यागेनैव शुद्धिस्तद्विवेकार्हम् ।४। **व्युत्सर्गः** कायोत्सर्गः, यत्र कायचेष्टानिरोधरूपकायोत्सर्गोपयोगमात्रेणैव दुःस्वप्नादिकमिव शुद्ध्यति तद् व्युत्सर्गार्हम् ।५। **तपः** यत्र प्रतिसेविते निर्विकृत्यादि षण्मासिकान्तं तपो दीयते तत् तपोऽर्हम् ।६। **छेदः** यथा शेषाङ्गरक्षार्थं व्याधिदूषितमङ्गं छिद्यते, एवं व्रतशेषपर्यायरक्षार्थमतिचारानुमानेन दूषितः पर्यायो यत्र छिद्यते तच्छेदार्हम् ।७। **मूलं** यस्यां चासेवनायां सर्वपर्यायमपनीय पुनर्महाव्रतारोपणं क्रियते तन्मूलार्हम् ।८। **अनवस्थाप्यः** यत्र प्रतिसेविते उपस्थापनाया अप्ययोग्यत्वेन यावदनाचीर्णविशिष्टतपास्तावदनवस्थाप्यः क्रियते, पश्चादाचीर्णतपाः पुनर्महाव्रतेषु स्थाप्यते तदनवस्थाप्यमेतदुपाध्यायादेर्भवति ।९।

**पाराञ्चिकः** लिङ्गक्षेत्रकालतपोभिर्बहिष्कृतस्तपसाऽपराधस्य पारं तीरमञ्चतीत्येवं साधुकारी ततो दीक्ष्यते यः स पाराञ्ची, पाराञ्च्येव पाराञ्चिकः । येन कर्मणा पाराञ्चिकः क्रियते, तत्पाराञ्चिकार्हम् । एतदाचार्यस्यैव भवति ।१०। इत्थं तत्प्रायश्चित्तं दशधा भवतीति योग इति गाथार्थः ।।४६।।

नन्विदानीं प्रायश्चित्तं तद्दातारश्च न सन्त्येव, तत् कः कस्यालोचनां दास्यतीत्यादि ये केचनाविदितागमरहस्याः प्रतिपादयन्ति, तन्निराकरणार्थमाह —

**जो भणइ नत्थि इण्हिं पच्छित्तं तस्स दायगा वावि ।**
**सो कुव्वइ संसारं जम्हा सुत्ते विणिद्दिट्ठं ।।४७।।**

व्याख्या—**यः** कश्चित् क्लिष्टकर्मैवं **ब्रवीति**, यदुत—**इदानीं प्रायश्चित्तं** दोषशोधकतपो-विशेषलक्षणं **नास्ति**, तत्प्रतिपादकग्रन्थाभावादिति । तथा '**तस्स दायगा वावि**'' त्ति, **तस्य वा** प्रायश्चित्तस्य **दायका** गीतार्थाश्चारित्रिणो गुरवोऽपि न सन्तीति । **स** उन्मार्गदेशकत्वादात्मनो दीर्घं **संसारमेव करोति । यस्मात् सूत्रे** छेदग्रन्थलक्षणे **निर्दिष्टं** भणितमिति गाथार्थः ।।४७।।

किं तद् ? इत्याह —

**सव्वंपि अ पच्छित्तं नवमे पुव्वंमि तइयवत्थुंमि ।**
**तत्तोच्चिअ (विय) निज्जूढं थेरेहिं सुविहिअहिअट्ठा ।।४८।।**

व्याख्या—**सर्वमपि** सकलसूक्ष्मबादरातिचारौचित्येनालोचनादिपाराञ्चिकपर्यन्तं **प्रायश्चित्तं** तावन्**नवमे** प्रत्याख्याननामनि **पूर्वे** तत्रापि **तृतीयवस्तु**न्याप्तैरुक्तमभूदिति शेषः । **ततोऽपि च** प्रायश्चित्तप्रतिपादकनवमपूर्वान्तर्गततृतीयवस्तुमध्यान् '**निर्यूढं**'' ति कल्पव्यवहारादिग्रन्थरूपतया **समुद्धृतं स्थविरैः** श्रीभद्रबाहुस्वाम्यादिभिः । **सुविहितहितार्थाय** शोभनं विहितं येषां ते **सुविहिताः** संविग्नाः साधवस्तेषां कालवैषम्याद्धीयमानप्रज्ञाबलत्वेन पूर्वश्रुतस्य चैकोनविंशतिवर्षपर्यायलभ्यत्वेन च नवमपूर्वोक्तप्रायश्चित्तावगमदूरस्थानां **हित**मल्पग्रन्थनिबद्धत्वेनाल्पपर्यायलभ्यत्वेन च **तदर्थायेति** ।

तदुक्तम् —

**'तिवरिसपरियागस्स उ आयारपकप्पनाम अज्झयणं । चउवरिसस्स उ सम्मं सूअगडं नाम अंगंति।।१।।**
**दसकप्पववहारा संवच्छरपणगदिक्खियस्सेव । ठाणं समवाओ वि अ अंगेए अट्ठवासस्स ।।२।।**
**दसवासस्स विवाहो इक्कारसवासयस्स इमे उ । खुड्डिअविमाणमाई अज्झयणा पंच नायव्वा ।।३।।**
**बारसवासस्स तहा अरुणुववायाइ पंच अज्झयणा । तेरसवासस्स तहा उट्ठाणसुआइया चउरो ।।४।।**
**चउदसवासस्स तहा आसीविसभावणं जिणा बिंति । पन्नरसवासगस्स य दिट्ठिविसभावणं तह य।।५।।**
**सोलसवासाईसु अ एगुत्तरवुड्ढिएसु जहसंखं । चारणभावण—महसुविणभावणा तेअगनिसग्गा ।।६।।**
**एगूणवीसगस्स उ दिट्ठीवाओ दुवालसममंगं । संपुन्नवीसवरिसो अणुवाई सव्वसुत्तस्स ।।७।।**
**जं केवलिणा भणियं केवलनाणेण तत्तओ नाउं । तस्सन्नहाविहाणे आणाभंगो महापावो'' ।।८।।**

**(पंचवस्तुकः ५८२ तः ५८८ तथा ५९०)**

इति गाथार्थः ।।४८।।

अत्रोदाहरणमाह —

**बालाईणणुकंपा संखडिकरणंमि होअगारीणं ।**
**ओमे अ बीअभत्तं रन्ना दिन्नं जणवयस्स ।।४९।।**

**(ओ०नि०भाष्य गाथा १३)**

व्याख्या—यथेत्यस्योदाहरणोपन्यासार्थस्य गम्यत्वाद् यथा **बालादीनां** बालकर्मकरादीनामुपरि **अनुकम्पा** दया **'होइ' '** त्ति । भवति, कस्मिन् ? **सङ्खडिकरणे, सङ्खडी** उत्सवविशेषस्तस्याः करणमुप चारात्तद्दिनमपि **सङ्खडीकरणमुच्यते तस्मिन्** । केषाम् ? **अगारीणां** गृहस्थानामिति । अयमर्थो— यथा सङ्खडीदिने भोजनस्य प्रहरत्रयोद्देशे सद्भावान्मैते बुभुक्षया विषीदन्त्वित्यनुकम्पया बालकर्मकरादीनामसौ गृहस्थः प्रथमालिकादि प्रयच्छति । पुनर्दृष्टान्तान्तरमाह— **'ओमे' '** त्ति, **अवमे** दुर्भिक्षे बहुवार्षिके बीजानि च भक्तं च **बीजभक्तमेकवद्**भावः । **राज्ञा** सर्वमेव राज्यं मम जनपदायत्तमिति विचिन्त्य **दापितं (दत्तं ?) जनपदस्य** लोकस्य, **'तात्स्थ्यात् तद्व्यपदेश '** इति न्यायात् । ततो लोकः सुस्थः सञ्जातः, पुनस्तेन राज्ञो द्विगुणत्रिगुणाद्यर्पितमिति । एवं पूर्वश्रुतयोग्यतामप्राप्तवतां शिष्याणां सुखावबोधाय स्थविरैः कल्पादयः समुद्धृता इति गाथार्थः ।।४९।।

ततः किमित्याह —

**तंमि धरंते अज्जवि तद्दायारे अ कह तुमं भणसि ? ।**
**वुच्छिन्नं पच्छित्तं तद्दाया वा अवि अ वुत्तं ।।५०।।**

व्याख्या—**तस्मिन्** प्रायश्चित्तप्रतिपादके कल्पादौ शास्त्रे **अद्यापि धरति** अवतिष्ठमाने तथा **तद्दातरि च** प्रायश्चित्तदातरि गीतार्थे चारित्रिणि गुरौ चावतिष्ठमाने **कथं त्वं भणसि** ? अत्यन्तासम्बद्धत्वान्नेदं वक्तुमपि उचितमितिभावः । अत्र **त्वमित्येकवचनमर्हदाज्ञाविराधकत्वेन** तस्यानन्तसंसारिकत्वेन निन्द्यत्वमावेदयति । किं **भणसि** ? इत्याह—**व्यवच्छिन्नं प्रायश्चित्तं तद्दाता च** गीतार्थादिगुणान्वितगुरूर्व्यवच्छिन्न इति । अस्यैवार्थस्य ग्रन्थान्तरानुवादप्रदर्शनार्थमाह **अपिचेत्युपन्यासे, उक्तं** प्रतिपादितं शास्त्रान्तर इति गम्य इति गाथार्थः ।।५०।।

तदेवाह—

**अणवट्ठप्पो तवसा तवपारंची अ दुण्णि वुच्छिण्णा ।**
**चउदसपुव्वधरंमि धरंति सेसा उ जा तित्थं ।।५१।।**

**(जइजीयकप्पो २९८)**

व्याख्या—**तपसा** कृत्वाऽ**नवस्थाप्यस्तपो**ऽनवस्थाप्यस्तथा **तपःपाराञ्चिकश्च** एतौ द्वावपि प्रायश्चित्तभेदौ **व्यवच्छिन्नौ** । कस्मिन् पुरुष ? इत्याह—**चतुर्दशपूर्वधरे** श्रीभद्रबाहुस्वामिनि । **शेषास्तु** लिङ्गक्षेत्रकालानव—स्थाप्यपाराञ्चिका **यावत्तीर्थं धरन्ति** अनुव्रजन्ति भवन्तीत्यर्थः । यदि लिङ्गक्षेत्र—

कालानवस्थाप्यपाराञ्चिका यावत्तीर्थं भवन्ति, तदालोचनादिप्रायश्चित्तानां यावत्तीर्थं भवने किं वाच्यमितिभावः। अथ किञ्चिदनवस्थाप्य—पाराञ्चिकयोः स्वरूपं **यतिजीतकल्पगाथाभिरे**वोच्यते —

**'कीरइ अणवट्टप्पो सो लिंगा खित्तकालओ तवओ । लिंगेण दव्वभावे भणिओ पव्वावणाणरिहो'** ।।

**(जइजीयकप्पो २८५)**

व्याख्या—**क्रियते** तथाविधापराधकारित्वान्महाव्रतेषु लिङ्गे वा नावस्थाप्यत **इत्यनवस्थाप्यः । स** चतुर्द्धा—**लिङ्गतः क्षेत्रतः कालतस्तपोविशेषतश्च** । लिङ्गं द्विधा—द्रव्ये भावे च । तत्र **द्रव्यलिङ्गं** रजोहरणादि, **भावलिङ्गं** महाव्रतादि । अत्र चतुर्भङ्गी—द्रव्यलिङ्गेन भावलिङ्गेन चानवस्थाप्य इत्येको भङ्गः । द्रव्यलिङ्गेनानवस्थाप्यो न भावलिङ्गेनेति द्वितीयः । भावलिङ्गेनानवस्थाप्यो न द्रव्यलिङ्गेनेति तृतीयः । उभाभ्यामपि नानवस्थाप्य इति चतुर्थः । इह **द्रव्यलिङ्गेन भावलिङ्गेन चानवस्थाप्यः प्रव्राजनानर्हो भणितः** ।

लिङ्गानवस्थाप्यादि चातुर्विध्यमेव विवृण्वन्नाह —

**'अप्पडिविरओसन्नो न भावलिंगारिहोणवट्टप्पो । जो जत्थ जेण दूसइ पडिसिद्धो तत्थ सो खित्ते'** ।।

**(जइजीयकप्पो २८६)**

व्याख्या—**अप्रतिविरतः** साधर्मिकान्यधार्मिकस्तैन्यात् प्रदुष्टचित्तत्वेनानिवृत्तः स्वपक्षपरपक्षप्रहरणोद्यतो निरपेक्षोऽनुपशान्तवैरो यः स द्रव्यभावलिङ्गाभ्यामनवस्थाप्यः प्रथमभङ्गवर्त्ती क्रियते। अष्टाङ्गनिमित्ताद्यर्थ—दानप्रयोक्ताऽवसन्नादिकस्तत्तद्दोषानिवृत्तो **न भावलिङ्गार्हः** अयं भावः—स द्रव्यलिङ्गी भवति, न भावलिङ्गमर्हति । भावलिङ्गमपेक्ष्यानवस्थाप्यः तृतीयभङ्गवर्त्ती भवतीत्यर्थः। द्वितीय—चतुर्थभङ्गौ पुनर्न सम्भवत इति । क्षेत्रतोऽनवस्थाप्यो **यो यत्र** क्षेत्रे **येन** कर्मणा **दूष्यते स** तद्दोषकरणनिवृत्तोऽपि **तत्र क्षेत्रे प्रतिषिद्धः** महाव्रतेषु स्थापने निराकृतः—यथार्थादानकारी तत्रैव क्षेत्रे महाव्रतेषु न स्थाप्यते । यतः पूर्वाभ्यासात्तं लोको निमित्तं पृच्छेत् स च वा तं निमित्तज्ञानजमृद्धिगौरवं सोढुमक्षमः कदाचित् कथयेत्, ततोऽन्यत्र नीत्वोपस्थाप्यः । उत्तमार्थप्रतिपन्नस्य पुनस्तत्रापि—स्वस्थानेऽपि स्थितस्य महाव्रतारोपः कार्य एव । उक्तौ लिङ्गक्षेत्रानवस्थाप्यौ । कालतपोऽनवस्थाप्यावाह —

**'जत्तियमित्तं कालं तवसा उ जहण्णएण छम्मासा । संवच्छरमुक्कोसं आसायइ जो जिणाईणं'** ।।

**(जइजीयकप्पो २८७)**

व्याख्या—**यो यावन्तं कालं** दोषान्नोपरमते स तावन्तं कालमनवस्थाप्यः क्रियते । **तपसा** त्वनवस्थाप्यो द्विधा—आशातनाऽनवस्थाप्यः प्रतिसेवनाऽनवस्थाप्यश्च । तत्र **जिनादीनां** तीर्थकर—सङ्घ—श्रुता—ऽऽचार्य—महर्द्धिक—गणधराणामाशातनां **यः** कुर्यात्, यथा—तीर्थकरैः सर्वोपायकुशलैरपि गृहवासत्यागादिकाऽतिकर्कशा देशना कृता, यदि च गृहवासो न श्रेयान् ततः किमिति स्वयं

गृहवासे वसन्ति स्म भोगाँश्च भुक्तवन्तः ? इत्येवं तीर्थकृतोऽधिक्षिपेत्, सङ्घं च दृष्ट्वाऽवज्ञया वदेत्—हुं हुं दृष्टा मयाऽरण्येऽपि सङ्घाः श्रृगाल—श्वान—वृक—चित्रकादीनामिति । श्रुतं चैवमधिक्षिपति यथा —

**'काया वया य तेच्चिय पुणोवि ते च्चिय पमाय—अपमाया । मोक्खस्स देसणाए जोइसजोणीहि किं कज्जं ?'' ।।**

**(नि० भा० ३३०८, बृ० क० ४९७९)**

आचार्यं जात्यादिभिरधिक्षिपति । महर्द्धिकाश्च, गणभृतो गौतमादयः । ये वा यस्मिन् युगे प्रधानभूतास्तान् ऋद्धि—रस—सातगौरवप्रसक्ताः कथका इव लोकावर्जनोद्यता एते इत्यादिवाक्यैरधिक्षिपति । स आशातनाकारित्वादाशातनातपोऽनवस्थाप्यः । स जघन्येन षण्मासानुत्कर्षतः संवत्सरं यावत्तपः कुर्वन् कर्त्तव्यः । तावता च तपसा क्षपिताशातनाजनितकर्मत्वात्तदूर्ध्वं महाव्रतेषु स्थाप्यते । प्रतिसेवना—नवस्थाप्यमाह —

**'वासं बारस वासा पडिसेवी कारणाउ सव्वोवि । थोवं थोवयरं वा वहिज्ज मुंचिज्ज वा सव्वं' ।।**

**(जइजीयकप्पो २८८)**

व्याख्या—**प्रतिसेवी** प्रतिसेवनानवस्थाप्यः साधर्मिकाऽन्यधार्मिकस्तैन्याभ्यां परमरणभयनिरपेक्षयष्टिमुष्टि—लकुडादिप्रहारप्रदानलक्षणहस्ततालादिभिश्च भवति । स च जघन्यतो वर्षमुत्कर्षतो द्वादशवर्षाणि तदनन्तरं व्रतेषु स्थाप्यते । स चानवस्थाप्यः संहननादिगुणयुक्त एव क्रियते, अन्यस्य तु मूलमेव दीयते । तथा चोक्तम् —

**'संघयणवीरिय आगम सुत्तत्थविहीइ जो समग्गो य । तवसी निग्गहजुत्तो पवयणसारे अ गहिअत्थो' ।।**

**(बृ० क० ५०२९, गु० वि० २/३१३)**

**'तिलतुसतिभागमित्तो वि जस्स असुहो न विज्जई भावो । निज्जूहणारिहो सो सेसे निज्जूहणा नत्थि' ।।**

**(बृ० क० ५०३०, गु० वि० २/३१४)**

**'एय गुणसंपउत्तो पावइ अणवट्ठमुत्तमगुणोहो । एअ गुणविप्पहीणे तारिसगंमी भवे मूलं' ।।**

**(बृ० क० ५०३१)**

**तवसी** तपश्चरणवान् **निग्गहजुत्तो** जितेन्द्रियः **निज्जूहणारिहो** गच्छात् पृथक्करणार्हः । अपवादतस्त्वनन्यसाध्यकुलगणसङ्घकार्यकारीत्यतः कारणात् सर्वोऽपि—द्विप्रकारोऽपि आशातना—नवस्थाप्य—प्रतिसेवनानवस्थाप्यलक्षणस्तत्तपो न कारयेदित्यर्थः । यस्त्वनवस्थाप्यतपः प्रतिपद्यते तद्विधिमाह —

**'वंदइ न य वंदिज्जइ परिहारतवं सुदुच्चरं चरइ । संवासो से कप्पइ नालवणाईणि सेसाणि' ।।**

**(जइजीयकप्पो २८९)**

व्याख्या—अनवस्थाप्यतपश्चरणकरणकालं यावत् स्वगणं गीतार्थे निक्षिप्याचार्य उपाध्याये वा प्रशस्तेषु द्रव्यक्षेत्रकालभावेषु स्वातिचारं प्रकाशयति, तदनन्तरं तस्मिन् जघन्येन मासमुत्कर्षतः षण्मासादिक—मनवस्थाप्यतपः प्रतिपद्यमाने आलोचनादायकः कार्योत्सर्गं करोति ।

'एअस्स आयरिअस्स अणवट्ठप्पतवस्स निरुवसग्गनिमित्तं ठामि काउस्सग्गं अन्नत्थ उससीएण' मित्यादि 'वोसिरामी'' ति यावत् । चतुर्विंशतिस्तवमनुचिन्त्य पारयित्वा चतुर्विंशतिस्तवमुच्चार्याऽऽचार्यो वक्ति —

**'एस तवं पडिवज्जइ न किंचि आलवइ मा य आलवहा । अत्तट्ठचिंतगस्स उ वाघाओ भे न कायव्वो'' ।।**

**(व्य०सू० ५४९, नि०भा० ६५९५)**

**एष युष्मान्नालापयिष्यति, युष्माभिरप्येष नालाप्यः** । सूत्रार्थौ शरीरवार्त्तां वा न प्रक्ष्यति, युष्माभिरपि न प्रष्टव्यः । खेलमल्लकमात्रादिकं वा नाऽस्य ग्राह्यमर्पणीयं वा । उपकरणं परस्परं न प्रतिलेख्यम्। भक्तपानं परस्परं न ग्राह्यम् । सङ्घाटकेऽस्य न मिलनीयम् । अनेन सहैकमण्डल्यां न भोक्तव्यम्। किमप्यनेन सार्धं न **कार्यं कार्यमिति** । **अधुना** गाथाक्षरार्थः—प्रतिपन्नानवस्थाप्यतपाः शैक्षादीनपि **वन्दते**, न **चासौ वन्द्यते** । **परिहारतपश्च** परिहारिकसाधूनां तपः ग्रीष्मे चतुर्थषष्ठाष्टमानि, शिशिरे षष्ठाष्टमदशमानि, वर्षास्वष्टम—दशमद्वादशानि जघन्यमध्यमोत्कृष्टानि । पारणके च निर्लेपभक्तमित्येवंस्वरूपं **सुदुश्चरं** तप**श्चरति** । **संवासो** सह वासो गच्छेनास्यैकक्षेत्रे एकोपाश्रये एकस्मिन् पार्श्वे शेषसाध्वपरिभोग्यप्रदेशे **कल्पते**, **नाऽऽलपनादीनि शेषाणी**त्येष सङ्क्षेपतोऽनवस्थाप्यविधिः । उक्तमनवस्थाप्यार्हम्, साम्प्रतं पाराञ्चिकमाह—

**'तित्थयर—पवयण—सुअं आयरिअं गणहरं महड्ढीयं । आसायंतो बहुसो अभिनिवेसेण पारंची'।।**

**(जइजीयकप्पो २९०, गु०वि० ३/१२)**

व्याख्या—**तीर्थकरादीनाशातयन्** हीलयन्नाशातनापाराञ्चिको भवति ।

प्रतिसेवनापारञ्चिकमाह —

**'जो उ सलिंगे दुट्ठो कसायविसएहिं रायवहगो य । रायग्गमहिसिपडिसेवओ य बहुसो पगासो उ' ।।**

**(जइजीयकप्पो २९१)**

इह प्रतिसेवनापाराञ्चिकस्त्रिधा—दुष्टो मूढोऽन्योऽन्यं कुर्वाणश्च । तत्र दुष्टो द्विधा—कषायतो विषयतश्च । पुनरेकैको द्विधा—स्वपक्षे—श्रमणश्रमणीरूपे परपक्षे—गृहस्थेऽन्यतीर्थे वा । अत्र च स्वपक्षपरपक्षाभ्यां कषायविषयदुष्टयोश्चत्वारश्चत्वारो भङ्गाः पूर्ववदवसेयाः । स्वपक्षकषायविषयदुष्टयोरुदाहरणानि शास्त्रान्तरतोऽवसेयानि । परपक्षयोस्त्वाह — **'रायवहगो अ''** त्ति । परपक्षकषायदुष्टस्तु **राजवधक** उदायिनृपमारकवत् । परपक्षविषयदुष्टस्तु **बहुशः** पौनःपुन्येन **प्रकाशो** लोकतः विदितः राजाग्रमहिषीप्रतिसेवकः, अग्रमहिषीग्रहणादन्यापि राज्ञो या काचिदिष्टा तत्सेवकश्च, चशब्दाद् युवराजसेनापत्याद्यग्रमहिषीसेवकश्च द्वावप्येतौ लिङ्गपाराञ्चिकौ । उक्तो दुष्टपाराञ्चिकः । मूढः— प्रमत्तः, स तु पञ्चधा—कषाय—विकथाविषय—मद्ये—न्द्रिय—निद्राख्यैः प्रमादभेदैर्विस्तरेणाऽऽख्येयः । अन्योऽन्यं — पुरुषः पुरुषान्तरेण मैथुनाऽऽसेवायां प्रसक्तोऽन्योऽन्यं कुर्वाणः । एवं प्रकारः पाराञ्चिकः क्रियत इत्यर्थः ।

एतदेवाह —

**सो कीरइ पारंचिय लिंगाओ खित्तकालओ तवओ । संपागडपडिसेवी लिंगाओ थीणगिद्धी अ ।।**
**(जइजीयकप्पो २९३)**

**पाराञ्चिकश्चतुर्द्धा—लिङ्गतः क्षेत्रतः कालतस्तपोविशेषतश्च** । अत्रापि द्रव्यभावलिङ्गाभ्यां चतुर्भङ्गी पूर्ववत् ज्ञेया । तत्र **सम्प्रकटप्रतिसेवी** राजाग्रमहिष्यादिसेवकः **स्त्यानर्द्धिमाँश्च**, चशब्दादन्योऽन्यासेवनाप्रसक्तो राजवधकश्च **लिङ्गतः** पाराञ्चिको—द्रव्यभावलिङ्गाभ्यां पाराञ्चिकः क्रियत इत्यर्थः । क्षेत्रपाराञ्चिकं गाथाद्वयेनाह —

**वसहिनिवेसणपाडगसाहिनिओगपुरदेसरज्जाओ । खित्ताओ पारंची कुलगणसंघालयाओ वा ।।**
**(जइजीयकप्पो २९४)**

**जत्थुप्पन्नो दोसो उप्पज्जिस्सइ य जत्थ नाऊणं । तत्तो तत्तो कीरइ खित्ताओ खित्तपारंची ।।**
**(जइजीयकप्पो २९५)**

**वसतिः** प्रस्तावाद् ग्रामः, **निवेशनम्** एकनिर्गमप्रवेशद्वारो ग्रामयोरन्तराले द्व्यादिगृहाणां संनिवेशः, एवंविधस्वरूप एव ग्रामान्तर्गतः **पाटकः**, **साही** शाखास्वरूपेण श्रेणिक्रमेण स्थिता गृहाणामेकतः परिपाटिः, **नियोगपुरं** निश्चिता **योगा** दिनकृत्यव्यापारा यस्य स **नियोगो** राजा तस्य **पुरं** राजधानी, **देशो** जनपदः, **राज्यं** राष्ट्रं यावत्सु देशेष्वेकभूपतेराज्ञा तावद्देशप्रमाणम् । एषां द्वन्द्व**स्तस्मात्क्षेत्रात् पाराञ्चिकः** **कुलगणसङ्घालयाद्वा** कुलगणसङ्घाः प्रतीतास्तेषा**मा**—सामस्त्येन यत्र क्षेत्रे **लयनं** मिलनं **तस्माद्वा** । यत्र क्षेत्रे वसतिनिवेशनादिके उत्पन्नो दोषः पाराञ्चिककारी, उत्पत्स्यते वा यत्र तिष्ठतो दोषस्तज्ज्ञात्वा ततस्ततः क्षेत्रात् क्षेत्रपाराञ्चिकः क्रियते । कालतपःपाराञ्चिकावाह —

**'जत्तिअमित्तं कालं तवसा पारंचिअस्स वि स एव । कालो दुविगप्पस्स वि अणवट्ठप्पस्स जो भणिओ' ।।**
**(जइजीयकप्पो २९६)**

**'सूचकत्वात् सूत्रस्य'** यो **यावन्तं कालमनु**पशान्तदोषोऽनुपरतपाराञ्चिकापत्तिहेत्वतिचारः स तावन्तं कालं कालपाराञ्चिकः । **तपसा पाराञ्चिको** द्विविधः—आशातनापाराञ्चिकः प्रतिसेवनापाराञ्चिकश्च । आद्यः प्रागुक्तरूपः । प्रतिसेवनापाराञ्चिकस्त्रिधा—दुष्टः प्रमत्तोऽन्योऽन्यं कुर्वाणश्च । तपःपाराञ्चिकस्य **द्विविकल्पस्यापि** स एव **कालस्तावत्प्रमाणः** समयो **यः** पूर्व**मनवस्थाप्यस्याभिहितः** । तस्य चेयं योजना—आशातनातपःपाराञ्चिकस्य जघन्येन षण्मासा उत्कर्षेण वर्षम्, प्रतिसेवनापाराञ्चिकस्य तु जघन्येन वर्षमुत्कर्षतो द्वादश वर्षाणि । तथा पाराञ्चिकमप्यनवस्थाप्यमिव संहननादिगुणवत एव दीयते । तपोऽपि परिहारिकाऽऽख्यमनवस्थाप्यस्येव पाराञ्चिकस्यापि भवतीत्यलं प्रसङ्गेनेति । नोदकः प्राह—यद्यस्ति प्रायश्चित्तं ततः कस्मात् केचित् कुर्वन्तो न दृश्यन्ते ? सूरिराह—उपायेन कुर्वन्ति, ततो न दृश्यन्ते । तथाचात्र धनिकेन सद्विभवाऽसद्विभवाभ्यां धारकाभ्यामधमर्णाभ्यां च दृष्टान्तः । एतदेव व्यवहारभाष्यगाथाभिः स्पष्टतरमुच्यते —

'संतविभवो उ जाहे मग्गिओ ताहे देइ तं सव्वं । जो पुण असंतविभवो तत्थ विसेसो इमो होइ' ।।
(जी०भा० २९३, व्य०सू० ४१७५)

धनिकस्य द्वौ धारकौ सम्भवतस्तद्यथा—सद्विभवोऽसद्विभवश्च । तत्र यः सद्विभवः स यदैव याच्यते तदैव तत्सर्वं दातव्यं ददाति । यः पुनरसद्विभवस्तत्रायं वक्ष्यमाणो विशेषो भवति । तमेवाह —

'निरविक्खो तिण्णि चयइ अप्पाण धणागमं च धारणगं । साविक्खो पुण रक्खइ अप्पाण धणं च धारणगं' ।।
(जी०भा० २९४, व्य०सू० ४१७६)

धनिको द्विधा—(सापेक्षः १, निरपेक्षश्च २ । तत्र) सापेक्षो नाम यो धारकादसद्विभवाद् धनमुपायेन गृह्णाति, निरपेक्षः कर्कशग्रहेण धनग्राही । तत्र निरपेक्षस्त्रीणि त्यजति । तद्यथा—आत्मानं धनागमं धारकं च । सापेक्षः पुनस्त्रीण्यपि रक्षति । कथमित्याह —

'जो उ असंते विभवे पाए घित्तूण पडइ पाडेणं । सो अप्पाण धणंपि अ धारणगं चेव नासेइ' ।।
(जी०भा० २९५, व्य०सू० ४१७७)

यो धनिको निरपेक्षोऽसद्विभवस्य पादौ गृहीत्वाऽऽत्मीयपदेन सह बद्ध्वा पातेन पतति, स आत्मानं धनं धारकं च नाशयति । यतः स तथा क्लिश्यमानो धनिकं जीविताद् व्यपरोपयेत् । यदिवाऽऽत्मानं विनाशयेत् । यद्वोभयमपि ततस्त्रयस्यापि विनाशः ।

'जो पुण सहई कालं सो अत्थं लभइ रक्खए तं च । न किलिस्सई सयंपि अ एव उवाओ उ सव्वत्थ' ।।
(जी०भा० २९६, व्य०सू० ४१७८)

यः पुनर्धनिको धारकमसद्विभवं ज्ञात्वोपायेनास्माद्धनमुपादेयमिति विचिन्त्य वक्ष्यमाणप्रकारेण कालं सहते, सोऽर्थं लभते, तं च धारकं रक्षति, न च स्वयमपि क्लिश्यति । एवमुपायः पुरुषेण सर्वत्र कर्त्तव्यः ।

'जो उ धारिज्ज वड्ढंतं असंतविभवो सयं । कुणमाणो उ कम्मं तु निव्विसे करिसावणं' ।।
(जी०भा० २९७, व्य०सू० ४१७९)

अणमप्पेण कालेणं सो तगं तु विमोयए । दिट्ठंतो सो भणिओ अत्थोवणओ इमो तस्स ।।
(जी०भा० २९८, व्य०सू० ४१८०)

यो धारको रूपकशतं दातव्यं धनिकानुमत्या प्रतिमासं चैकैककाकिनीवृद्ध्या वर्धमानं धारयति ददातीतियावत् । स्वयं वाऽसद्विभवो धनिकस्य गृहे कर्म कुर्वन् कार्षापणं निर्वेशयति धनिकस्य प्रवेशयति । सोऽल्पेन कालेन तकत् ऋणं मोचयति । एष दृष्टान्तः, अयमर्थोपनयस्तस्य—

'संत—विभवेहिं तुल्ला धिइसंघयणेहिं जे उ संपन्ना । ते आवण्णं सव्वं वहंति निरणुग्गहं धीरा' ।।
(जी०भा० २९९, व्य०सू० ४१८१)

ये धृतिसंहननाभ्यां सम्पन्नाः युक्ताः सद्विभवैस्तुल्यास्ते धीराः सर्वमापन्नप्रायश्चित्तमनुग्रहरहितं वहन्ति ।

'संघयणधिईहीणा असंतविभवेहिं हुंति तुल्लाओ । निरविक्खो जइ तेसिं देइ तओ ते विणस्संति'
(जी०भा० ३००, व्य०सू० ४१८२)

ये पुनर्धृतिसंहननाभ्यां हीनास्ते असद्विभवैस्तुल्यास्तेषां यदि निरपेक्षः सन् निरवशेष प्रायश्चित्तं ददाति, ततस्ते विनश्यन्ति । तत् प्रायश्चित्तं निरवशेषं वोढुमशक्नुवन्तस्तपसा कृशीकृता जीवितादपगच्छेयुः ।

'ते तेण परिचत्ता लिंगविवेगं तु काउं वच्चंति । तित्थुच्छेओ अप्पा एगाणिअ (गिअ) तेण चत्तो य ।'
(जी०भा० ३०१, व्य०सू० ४१८३)

यदि वा ते प्रायश्चित्तभग्ना लिङ्गविवेकं कृत्वा व्रजन्ति । ततस्तेन निरवशेषप्रायश्चित्तदात्रा परित्यक्ताः । यथैवमेके एवमन्येप्येवमपरेऽपि ततः सर्वसाधुव्यपगमतस्तीर्थस्योच्छेदः तथा तेनाऽऽचार्येण निरवशेषं प्रायश्चित्तं साधूनां ददता प्रायश्चित्तभग्नभयात् साधूनामपगमत आत्मा एकाकीकृतः, एकाकीतया च त्यक्तः चशब्दाद्गच्छोऽपि त्यक्तस्तथाहि—साधूनामपगमे बालवृद्धग्लानादीनामुपग्रहेऽपि न कोऽपि वर्त्तते, ततस्तेन तत्त्वतस्तेऽपि परित्यक्ताः । यथा धनिकेनोपायवता शनैः शनैरसद्विभवाद्धारकाद्धनं गृहीतं नैकोऽपि क्लेशमापन्न एवमालोचका अपि धृतिसंहननादिहीना महत्यामपि प्रायश्चित्तापत्तौ सान्तरदानाद्यनुग्रहवता तपसि प्रवर्त्तिता न क्लेशमनुभवन्तीत्यलं विस्तरेणेति गाथार्थः ।।५१।।

उक्तं किमालोचनीयमिति दशमं द्वारम् । अथ क्रमप्राप्तमपि प्रायश्चित्तद्वारं बहुवक्तव्यत्वा—दुल्लङ्घ्याल्पवक्तव्यत्वात् पूर्वं फलद्वारमाह —

**आयरिअपायमूले इअ जो पयडेइ अत्तणो दोसे ।**
**सो जइ न जाइ मुक्खं अवस्स वेमाणिओ होइ ।।५२।। जओ—**

व्याख्या—आचार्याणां पूर्वव्यावर्णितगुणानां पादमूले चरणान्तिके यः कश्चिद् जातिकुल—विनयोपशमादिगुणालङ्कृतः सन् । इति पूर्वोक्तप्रकारेण गुरुगुणानालोचनाविधिं चावबुध्य प्रकटयति निर्मायतया सम्यक् प्रकाशयति आत्मनः स्वस्य दोषानपराधान्, न पुनः परस्य, अपरापराध—प्रकाशनस्य हि नूतनकर्मबन्धनिबन्धनत्वेन स्वस्य प्रचुरतरसंसाराभिवृद्धेरितिभावः । स किं प्राप्नोति ? इत्याह—स पूर्वोदितगुण आलोचको यदि कथञ्चित्कालादिवैषम्यान्न याति न गच्छति मोक्षमपवर्गम्, तथापीत्यध्याह्रियते, अवश्यं निश्चितं वैमानिको विमानवासी सुरो भवति । भवनपत्यादिषु तस्य गमनप्रतिषेधादिति गाथार्थः ।।५२।।

एतदेवार्हदुक्तत्वज्ञापनपूर्वं दृढयति । **'जओ'** त्ति । **यत** इति पूर्वोक्तार्थहेत्वर्थे, तमेवाह —

**अविराहिअसामण्णस्स साहुणो सावगस्स य जहण्णो ।**
**सोहम्मे उववाओ भणिओ तेलुक्कदंसीहिं ।।५३।।**

व्याख्या—**अविराधितश्रामण्यस्य** प्रकरणादालोचितातिचारत्वादिना **न विराधितं** सम्यगनुपालितं **श्रामण्यं** देशविरति—सर्वविरतिरूपं चारित्रं येन तस्य, सम्यगनालोचकस्यानाराधकतायाः प्राग् बहुशः प्रतिपादितत्वात् । एवम्भूतस्य **साधोः श्रावकस्य च जघन्यः सौधर्मे** प्रथमदेवलोके **उपपात** उत्पत्ति**र्भणितः** प्रतिपादित**स्त्रैलोक्यदर्शिभिर्नि**जामलकेवलालोकावलोकिताशेषपदार्थैस्तीर्थकृद्भिरिति गाथार्थः ।।५३।।

फलमेव प्रकारान्तरेणाह —

**उद्धरियसव्वसल्लो भत्तपरिण्णाइ धणियमाउत्तो ।**
**मरणाराहणजुत्तो चंदगविज्झं समाणेइ ।।५४।।**

व्याख्या—**उद्धृतसर्वशल्यो भक्तपरिज्ञायां** भक्तप्रत्याख्याने **धनितम्** अत्यर्थ**मायुक्तः** प्रयत्नपरः **मरणाराधनयुक्त** आलोचितातिचारादिवत्त्वेन कृतपण्डितमरणः, स एवंविधो महासाहसोपायाभिज्ञत्वादिगुणवान् **चन्द्रकवेध्यं** राधावेधं **समानयति** करोतीत्यर्थः । अत्र च राधावेधकथानकमावश्यकान्तर्गताभ्यां गाथाभ्यां ज्ञेयं यथा —

**'इंदपुर इंददत्ते बावीस सुआ सुरिंददत्ते य । महुराए जिअसत्तू सयंवरो निव्वुईए उ ।।१।।**
**अग्गियए पव्वयए बहुली तह सागरे अ बोद्धव्वे । एगदिवसेण जाया तत्थेव सुरिंददत्ते य' ।।२।।**

इति योगसङ्ग्रहगाथाभ्यां समवसेयम् । सङ्क्षेपतस्तच्चेदम्—**इन्द्रपुरं** नगरं **तत्रेन्द्रदत्तो** नाम राजा । तस्येष्टदेवीनां **द्वाविंशतिः पुत्राः** । तथा तेन राज्ञैकाऽमात्यसुता परिणीता । सा च कर्मवशतः परिणयनसमय एव दृष्टा, न परतः । एकदा पुरान्तर्गच्छता दृष्टा साऽमात्यगेहस्था । पृष्टं च केयमिति परिजनेनोक्तं युष्मद्देवीति । ततस्तं वासकं राजा तद्गृहेऽवतस्थौ । तदा च सा ऋतुमतीत्वेन गर्भं दधौ । स वृत्तान्तोऽमात्यस्याग्रे कथितो तया । तस्यां रात्रौ राज्ञा यदुक्तं यत्कृतं च तत्सर्वममात्येनाभिज्ञानपूरणाय पत्रे लिखितम् । कालेन पुत्रो जातः **सुरेन्द्रदत्तो** नाम । चत्वारश्च दासीपुत्राः **सहजाता अग्निक—पर्वतक—बाहुलिक—सागरास्तस्य** मित्राणि । द्वाविंशतिस्ते पुत्राः सुरेन्द्रदत्तश्च मित्रपरिवृतः कलाचार्यसमीपे कलाः पठन्ति । स्खलने कलाचार्यस्ताडयति। द्वाविंशतिरपि स्वस्वमातुरग्रे कथयन्ति । ताः कलाचार्यस्योपालम्भं ददति । सुरेन्द्रदत्तकथने त्वमात्यसुता प्रत्युत प्रेरयति । ततस्त्रयोविंशत्यापि राधावेधः शिक्षितः । इतश्च

**मथुरानगर्यां जितशत्रुराज्ञो** 'यः कश्चिद् राधावेधं साधयिष्यति तं परिणेष्यामी' ति निश्चयवत्या **निर्वृतिकन्यायाः स्वयंवरमण्डपे** त्रयोविंशतिपुत्रयुत इन्द्रदत्तः प्राप । अन्येऽपि भूयांसो राजानः स्वस्वपरिवारपरिवृता आजग्मुः । तत्र स्वस्वोचितस्थानेषूपाविशन् । एकतश्च निर्वृतिकन्या । ततश्चेन्द्रदत्तेनाऽऽद्यपुत्रः श्रीमालीनामा राधावेधाय भणितः । राधावेधो नाम एकस्मिन् भूभागे एको बृहत्तरस्तम्भः। तत्राष्टौ चक्राणि चत्वारि सृष्ट्या चत्वारि संहारेण च भ्रमन्ति । चक्रे चक्रे चाष्टौ अष्टावक्षाः। तदुपरि चैका पुत्रिका । ततश्च भूमिस्थतलभृतभाजनाभिमुखदृष्टिना पुरुषेण चक्राष्टकाक्षमध्येन भूत्वा पुत्रिकावामाक्षितारिकावेधः क्रियते स राधावेधः । ततश्च तेन तथाविधाकृताभ्यासत्वेन वेपमानहस्तेन कथमपि गृहीतं धनुः मुक्तश्च शरो यद्भवति तद् भवत्विति विचिन्त्य प्रथमचक्र एव स्खलितः । एवं शेषैकविंशत्यापि न कृतो राधावेधः । ततश्च लज्जया राजोपहतमनास्तिष्ठति । ततश्चामात्येनोक्तं यद्—एष त्रयोविंशो युष्मदङ्गजो जयपताकां ग्रहीष्यति । कथं मदङ्गजः ? इति राज्ञोक्ते तान्यभिज्ञानानि दर्शयति । ततश्च सुरेन्द्रदत्तेन मित्रचतुष्टये विघ्नं कुर्वति द्वाविंशतौ कुमारेषु हसत्सु सुभटद्वयेऽसिव्यग्रहस्ते पार्श्वद्वयेऽवस्थिते कलाचार्ये बहुतरं निर्भर्त्सयति च तथाविधकृताभ्यासत्वेनान्यत्र कुत्रापि मनो अकुर्वता भूमिस्थतैलभृतभाजने प्रतिबिम्बिताष्टचक्राक्षाणि सुनिपुणं विलोक्य पुत्रिकावामाक्षि विद्धं हर्षकोलाहलश्चाजनि। अयमत्रोपनयः—यथा कुमारस्तथा साध्वादिः । यथा ते चत्वारि मित्राणि तथा कषायाः । यथा ते द्वाविंशतिः कुमारास्तथा परीषहाः । यथा तौ द्वौ सुभटौ तथा रागद्वेषौ । यथा पुत्रिकाक्षिवेध्यं तथाऽराधना । यथा निर्वृतिः कन्या तथा सिद्धिरिति गाथार्थः ।।५४।।

उक्तं द्वादशं प्रायश्चित्तफलद्वारम् । अथ पूर्वमुक्तमेकादशं प्रायश्चित्तद्वारम् । तत्र ज्ञानाद्या—चारपञ्चकातिचारक्रमेण प्रायश्चित्तं प्रतिपादयिष्यते । तत्रादौ ज्ञानाशातनायामोघप्रायश्चित्तसाम्या—द्दर्शनाचारातिचारान्तर्गतमुत्पाद्याशातनासु चौघप्रायश्चित्तमाह —

**तणुमज्झुक्कोसासायणाइ मुणि—नाण—देव—गुरु—बिंबे ।**
**लहु—गुरु—चउलहू सुत्ते अत्थे गुरु—चउलहु—गुरुगा ।।५५।।**

व्याख्या—वचनव्यत्ययात्तनुमध्योत्कृष्टाशातनाभिः जघन्यमध्यमोत्कृष्टाभिराशातनाभि**र्मुनि—ज्ञान—देव—गुरु—बिम्बविषयाभिः 'लहु गुरु चउलहु'**' त्ति । लघु—गुरु—चतुर्लघूनि क्रमेण लघुमास—गुरुमास—चतुर्लघूनि प्रायश्चित्तानि भवन्ति । तत्र **मुनिः** प्रवर्त्तकादिपदविवर्जितः संयतः, **ज्ञानं** श्रुतम्, **देवो**ऽर्हन्, **गुरुः** आचार्यादिः, **बिम्बमर्हत्प्रतिमा** । तेषु जघन्याशातनायां लघुमासः, मध्यमाशातनायां गुरुमासः, उत्कृष्टाशातनायां चतुर्लघु प्रायश्चित्तं भवतीति भावार्थः । ज्ञानं च सूत्रार्थभेदाद् द्वेधा । तत्र **'सुत्ते'** त्ति । अपिशब्दस्य गम्यमानत्वात् **सूत्रे**ऽपि सूत्रविषयायां जघन्यमध्यमोत्कृष्टरूपा—

यामाशातनायामपि **'लहु गुरु चउलहु'** त्तिपदस्य डमरुकमणिन्यायादत्रापि योगात् क्रमेण **लघुमास–गुरुमास–चतुर्लघूनि** प्रायश्चित्तानि भवन्ति । **'अत्थे'** त्ति । **अर्थे** तु अर्थविषयायां जघन्यमध्यमोत्कृष्ट–रूपायामाशातनायां **'गुरु चउलहु गुरुग'** त्ति । क्रमेण **गुरुमास चतुर्लघु चतुर्गुरूणि** प्रायश्चित्तानि भवन्तीति गाथाक्षरार्थः ।।५५।।

अथ विभागतो ज्ञानाचारातिचारविषयं प्रायश्चित्तमुच्यते—स चाष्टविधस्तद्यथा—अकाले—अ–स्वाध्यायिकेऽनध्यायदिनेषु वा स्वाध्यायकरणं कालातिचारः १ । श्रुतमधिजिगांसोर्जात्यादिमदावलेपेन गुरुषु विनयो—वन्दनादिरुपचारस्तस्याऽप्रयोजनं हीलनं वा विनयातिचारः २ । श्रुते गुरौ वा बहुमानो—हार्दः प्रतिबन्धविशेषस्तस्याऽकरणं बहुमानातिचारः ३ । उपधानम्—आचाम्लादितपसा योगविधानं तस्याकरणमुपधानातिचारः ४। यत्पार्श्वे श्रुतमधीतं तं निह्नुते—अपलपति,अन्यं वा युगप्रधानमात्म–नोऽध्यापकं निर्दिशति, स्वयं वाऽधीतमित्याचष्टे । एष निह्नवनाभिधानोऽतिचारः ५ । व्यज्यतेऽर्थोऽनेनेति व्यञ्जनम्—आगमसूत्रं तन्मात्राक्षरबिन्दुभिरूनमधिकं वा करोति, संस्कृतं वा विधत्ते, पर्यायैर्वाऽभिधत्ते । यथा—**'धम्मो मंगलमुक्किट्ठ'** मित्यादिस्थाने **'पुन्नं कल्लाणमुक्कोसं दया संवरनिज्जरे'** ति व्यञ्जनातिचारः ६। आगमपदार्थस्यान्यथापरिकल्पनमर्थातिचारः । यथा आचारसूत्रेऽवन्त्यध्ययनमध्ये **'आवंती केयावंती लोगंमि विप्परामुसंती'** त्यत्राचाराङ्गसूत्रे **'यावन्तः केचन लोकेऽस्मिन् पाखण्डिलोके विपरामृशन्ती'** ति प्रस्तुतेऽर्थेऽन्योऽर्थः परिकल्प्यते । यथा—**'अवन्ती जनपदे केया—रज्जुर्वातात् कूपे पतिता तां लोकः स्पृशती'** ति ७ । यत्र च सूत्रार्थौ द्वावपि विनाश्येते स तदुभयातिचारः । **यथा—'धम्मो मंगलमुक्कट्ठो अहिंसा गिरिमत्थए । देवावि तस्स नस्संति जस्स धंमे सया मसी'** ८ । अयं च महीयानतिचारो, यतः सूत्रार्थोभयनाशे चारित्रनाशस्तन्नाशे मोक्षाभावस्तदभावे दीक्षावैयर्थ्यमिति । एष चाष्टविधो ज्ञानातिचारः । तत्र यथार्हं प्रायश्चित्तमाह —

**हीणक्खराइ लहु पुत्थियाइपाडण–पयाइथुक्काई ।**
**चउलहु गुरु अकालाइ निंदपडिणीययाईसु ।।५६।।**

व्याख्या—उच्चारस्याध्याहारात् **हीनाक्षरोच्चारे, आदिशब्दादधिकाक्षरोच्चारे** संस्कृतकरणे पर्यायैर्वाऽभिधाने व्यञ्जनातिचारे इतिभावः । **लघुमासः** प्रायश्चित्तं भवतीति सर्वत्र योज्यम् । तथा **पुस्तिकादिपातने,** आदिशब्दात् पट्टिका—पत्रटिप्पनीका—नमस्कारावल्यादिग्रहः **'सूचकत्वात् सूत्रस्य'** तत्र **पादादिना** स्पर्शने, **निष्ठ्यूतादिनाऽक्षरमार्जने** च **चतुर्लघु** । तथा **गुरुमासः** प्रायश्चित्तं भवति । केषु ? इत्याह— **'अकालाइ'** इत्यादि । **अकालपठनादौ, आदिशब्दादध्यापकगुरुं** प्रति विनयबहुमाना–करणे यथार्हमुपधानमन्तरेणैव सूत्राध्ययनेऽर्थस्यान्यथाकल्पने च ज्ञानस्य ज्ञानिनां वा **निन्दायां**

**प्रत्यनीकतायां चादिशब्दादुपघातकरणादिषु** चेति । इदं च मध्यमापराधानाश्रित्य ज्ञेयम् । जघन्योत्कृष्टापराधेषु पुनर्लघुचतुर्लघुके भवत इति गाथार्थः ।।५६।।

अथ इह दर्शनाचारातिचारानुद्दिश्य प्रायश्चित्तमाह —

**संकाइ मूढदिट्ठी पासत्थाईकुदिट्ठिवच्छल्ले ।**
**संथव पसंस मिच्छप्पहावणा संजमथिरत्ते ।।५७।।**
**तह संघाणुववूहाइसु देसे चउलहु—गुरुग सव्वे ।**
**गुरुग अ ममत्ताइसु लहु गुरु—चउलहु तिविहमिच्छे ।।५८।।**

व्याख्या—दर्शनाचारातिचारोऽष्टधा । तद्यथा—शङ्का काङ्क्षा विचिकित्सा मूढदृष्टिरुपबृंहणा स्थिरीकरणं वात्सल्यं प्रभावना चेति । तत्र संशयकरणं **शङ्का** । सा द्विधा—देशतः सर्वतश्च । तत्र देशतस्तुल्येऽपि जीवत्वे कथमेके भव्या अपरे त्वभव्या ? इत्यादि । सर्वतस्तु प्राकृतभाषानिबद्धमिदं श्रुतं न ज्ञायते किं सर्वज्ञेन प्रणीतमाहोश्वित् कुशलमतिना केनापि परिकल्पितमिति । न पुनरेतद्विचारयति यथा—भावा हेतुग्राह्या अहेतुग्राह्याश्च । तत्र हेतुग्राह्या जीवास्तित्वादयः अहेतुग्राह्या अस्मदाद्यपेक्षया भव्यत्वादयः, प्रकृष्टज्ञानगोचरत्वात्तद्धेतूनामिति । प्राकृतनिबन्धोऽपि बालादिसाधारणत्वात्। उक्तं च —

**'बालस्त्रीमन्दमूर्खाणां नृणां चारित्रकाङ्क्षिणाम् । अनुग्रहार्थं सर्वज्ञैः सिद्धान्तः प्राकृतः कृतः''** ।
**(गाथासहस्री ८०५)**

इतश्च न परिकल्पितो, दृष्टेष्टाविरुद्धत्वात् १ । अन्यान्यदर्शनग्रहणमा**काङ्क्षा** । साऽपि देशतः एकं किञ्चित् कुतीर्थिकमतमाकाङ्क्षति । यथा—अस्मिन्नपि खल्वहिंसैव धर्मो, मोक्षश्च फलमुच्यते । सर्वतः सर्वाणि शाक्या—ऽऽजीवक—कपिल—बोटिको—लूक—वेद—तापसादिकुमतान्याकाङ्क्षति, कृषीवल इव सर्वधान्यवपनानि कदाचित् किञ्चित् फलतीतिधिया २ । **विचिकित्सा** आत्मनः फलं प्रत्यनाश्वासः। यथा—आसीत्तादृशानुष्ठायिनां पुरातनानां महासत्त्वानां मोक्षः, अस्मादृशां त्वस्नानकेशलुञ्चनादिकं कष्टमेव मन्दसत्त्वत्वात् क्व मोक्षसम्भव ? इति देशतः स्तोकोऽनाश्वासः। सर्वतस्तु सर्वथाऽनाश्वासः। यद्वा—**'विदक् ज्ञाने'** विदन्तीति क्विप् तल्लोपे विदः—साधवस्तेषां जुगुप्सा विज्जुगुप्सा । देशतोऽहो! मलदुर्गन्धा इमे मुनयो यद्युष्णोदकेन स्नायुस्तदा को दोषः स्याद् ? इत्यादि । सर्वतस्तु मण्डल्यां नन्दिपात्रे मिथः संसृष्टभोजिनोऽमी । गुप्तिगृहवासिन इव मलीमसाङ्गवाससः प्रागदत्तदानत्वेनाऽऽजन्म भिक्षाचरा इत्यादि ३ । **मूढदृष्टिः** परतीर्थिकानां बालतपस्वितपोविद्यामन्त्राद्यतिशयान् राजादिकृतां पूजां वा दृष्ट्वा तदागमाद्वा श्रुत्वा देशतः स्तोकान्मतिव्यामोहात्, सर्वतस्तु—सर्वथा **मूढा** स्वभावाच्चलिता **दृष्टिः** सम्यग्दर्शनरूपा यस्यासौ मूढदृष्टिः । उक्तं च —

**'णेगविहा इड्ढीओ पूयं परवाइणं च दट्ठूणं । जस्स न मुज्झइ दिट्ठी अमूढदिट्ठि तयं बिंति'** ४।
**(श्रावकधर्मविधि प्रकरणम् ५८-६०)**

**उपबृंहा** प्रशंसा । सा ज्ञानदर्शनतपःसंयमवैयावृत्त्याद्युद्यतानां समानधार्मिकाणां साध्वादीनां तत्तद्गुण–प्रशंसनेन तदुत्साहवृद्धिहेतुः प्रशस्ता । यदुक्तम् —

**'खमणे वेयावच्चे विणए सज्झायमाइसु अ जुत्तं । जो तं पसंसए एस होइ उववूहणाविणओ'** ' ।।
**(श्रावकधर्मविधिः ६१)**

मिथ्यादृशां शाक्यचरकादीनां त्वप्रशस्ता ५ । **स्थिरीकरणं** ज्ञानदर्शनसंयमतपोवैयावृत्त्यादिषु सीदतां समानधार्मिकसाध्वादीनां यथार्होपष्टम्भदानेन स्थैर्यहेतुः प्रशस्तम् । यदुक्तम् —

**'एएसु च्चिअ खमणाइएसु सीयंत चोयणा जा उ । बहुदोसे माणुस्से मा सीय थिरीकरणमेयं'** ' ।।
**(श्रावकधर्मविधिः ६२)**

**'खमणाइएसु'** त्ति । आदिशब्दाद्वैयावृत्त्यविनयस्वाध्यायादिषु । असंयमविषये पुनस्तदप्रशस्तम् ६ । **वात्सल्यं** नाम आचार्य–ग्लान–प्राघुर्णक–तपस्वि–सेहा–ऽसह–बाल–वृद्धादीनामाहारोपध्यादिना समाधिसम्पादनं प्रशस्तम् । उक्तं च —

**'साहम्मिवच्छल्लं आहाराइसु होइ सव्वत्थ । आएस–गुरु–गिलाणे तवस्सि–बालाइसु विसेसो'** ' ।।
**(श्रावकधर्मविधिः ६३)**

गृहि–पार्श्वस्थाद्युपष्टम्भरूपं तु तदप्रशस्तम् ७। **प्रभावना** नाम प्रभाव्यते–विशेषतः प्रकाश्यते इति प्रभावना **'णिवेत्त्यासश्रन्थे'** '(सिद्धहेम० ५।३।१११) त्यादिना भावे अनप्रत्ययः । सा चार्थात् प्रवचनस्य सा प्रशस्ता । तत्र यद्यपि प्रवचनं शाश्वतत्वात्तीर्थकरभाषितत्वाद्वा सुरासुरनमस्कृतत्वात् स्वयमेव दीप्यते तथापि दर्शनशुद्धिमात्मनोऽभीप्सुर्यो येन गुणेनाधिकः स तेन तत्प्रवचनं प्रभावयति यथा–भगवदार्यवज्रस्वामिप्रभृतिकः । उक्तं च —

**'कामं सभावसिद्धं तु पवयणं दिप्पए सयं चेव । तहवि य जो जेणहिओ सो तेण पभावए तं तु'** ' ।।
**(श्रावकधर्मविधिः ६४)**

ते प्रवचनप्रभावका अतिशय्यादयः । उक्तं च —

**'अइसेसि–इड्ढि–धम्मकहि–वाइ–आयरिअ–खवग–नेमित्ती । विज्जा रायगणसंमया य तित्थं पभाविंति'** ' ।।
**( नि०भा० ३३, श्रावकधर्मविधिः ६७)**

अस्या अक्षरगमनिका–**अतिशयी** अवधिमनःपर्यायज्ञानयुक्तोऽतिशाय्यध्ययनो वा १ । **ऋद्धिग्रहाद्** राजाऽमात्यादिः ऋद्धिमान् दीक्षाग्राहकः आमर्षौषध्यादिऋद्धिप्राप्तो वा २। **धर्मकथी** आक्षेपणीविक्षे–पणीनिर्वेदनीसंवेदनीकथाभिर्यो धर्ममाख्याति ३। **वादी** वादलब्धिसम्पन्नः ४। **आचार्यः** स्वपरसिद्धा–न्तप्ररूपकः ५। **क्षपकः** तपस्वी ६। **नैमित्तिकः** अष्टाङ्गनिमित्तवेत्ता ७। **विद्याग्रहणाद्विद्यासिद्धः**

आर्यखपुटाचार्यवत् ८। **राजगणसम्मताश्च** । तत्र **राजसम्मता** मन्त्र्यादयः, **गणसम्मता** महत्तरादयः चशब्दाद्दानश्राद्धादिपरिग्रहः । एते **तीर्थं** प्रवचनं **प्रभावयन्ति** । स्वतः प्रकाशकस्वभावमेव सहकारितया प्रकाशयन्तीति । कुतीर्थिकविषया त्वप्रशस्ता ८। इह चोपबृंहादीनां प्रशस्तानां यथाशक्त्यकरणे अप्रशस्तानां तु करणे अतिचारता । देशसर्वभेदश्चोपबृंहादीनामपि शङ्कादीनामिव ज्ञेयः । अथ गाथाव्याख्या— **शङ्कादिषु** शङ्काकाङ्क्षाविचिकित्सासु **'देशे चउलहु'** इत्येतस्य द्वितीयगाथास्थस्य सर्वत्र योगा**द्देशतश्चतुर्लघु** तथा **'मूढदिट्ठी य'** त्ति । **मूढदृष्टित्वे 'पासत्थाइ'** त्ति । **पार्श्वस्थावसन्नादयो** द्रव्यलिङ्गिनो मुनयः, **कुदृष्टयो** मिथ्यादृष्टयः परतीर्थिकाः तेषां **वात्सल्ये** । तथा तैः सह **संस्तवे**ऽतिपरिचये। **प्रशंसायां** मिथ्यादृष्ट्यादीनामुपबृंहणायां च **देशतश्चतुर्लघु** । इह किल मिथ्यादर्शनिनोऽपरिमितास्तदुक्तं सम्मतिसूत्रे श्रीसिद्धसेनदिवाकरेण —

**'जावइया वयणपहा तावइया चेव हुंति नयवाया । जावइया नयवाया तावइया चेव परसमया'** ।।

**(संमतिसूत्रम् १४४)**

**यावन्तो नयवादा** एकैकांशावधारणवाचकशब्दप्रकारा**स्तावन्त एव परसमयाः** परदर्शनानि भवन्ति, स्वेच्छाप्रकल्पितविकल्पनिबन्धनत्वात् परसमयानाम् । अयं भावः—यावन्तो जने तत्तदपरापरवस्त्वे—कदेशानामवधारणप्रतिपादकाः शब्दप्रकारा भवेयुस्तावन्त एव परसमया भवन्ति । ततस्तेषामपरि—मितत्वमेव । स्वकल्पनाशिल्पिघटितविकल्पानामनियतत्वात् तदुत्थप्रवादानामपि तत्सङ्ख्यापरिमाण—त्वादिति । तदेवं गणनातिगा मिथ्यादर्शनिनो भवन्ति । यद्वा—सूत्रकृताख्ये द्वितीयेऽङ्गे परप्रावादुकानां—परदर्शनिनां त्रीणि शतानि त्रिषष्ट्यधिकानि परिसङ्ख्यायन्ते । तदर्थसङ्ग्रहगाथेयम् —

**'असीइसयं किरिआणं अकिरिअवाईण होइ चुलसीई । अन्नाणिय सत्तट्ठी वेणइयाणं च बत्तीसा'** ।।

**(गाथासहस्री ११६)**

अस्या लेशतोऽक्षरगमनिका— **'असीइसयं किरियाणं'** त्ति । अशीत्युत्तरं शतं क्रियावादिनाम् । तत्र क्रियां—जीवाद्यस्तित्वं वदन्तीत्येवंशीलाः क्रियावादिनो मरीचि—कुमार—माठरोलूकप्रभृतयः । ते पुनरमुनोपायेनाशीत्यधिकशतसङ्ख्या विज्ञेयाः । जीवाजीवाश्रवबन्धसंवरनिर्जरापुण्यापुण्यमोक्षाख्या—न्नवपदार्थान् परिपाट्या पट्टकादौ विरचय्य जीवपदार्थस्याधः स्वपरभेदावुपन्यसनीयौ । तयोरधो नित्यानित्यभेदौ । तयोरप्यधः कालेश्वरात्मनियतिस्वभावभेदाः पञ्च न्यसनीयाः । ततश्चैवं विकल्पाः कर्त्तव्याः—

**'अस्ति जीवः स्वतो नित्यः कालत'** इत्येको विकल्पो, विकल्पार्थश्चायं खलु—अयमात्मा स्वेन रूपेण नित्यश्च कालवादिनां मत इति । उक्तेनैवाभिलापेन द्वितीयो विकल्प ईश्वरकारणिकः । तृतीयो विकल्प आत्मवादिनः **'पुरूष एव इदं सर्वम्'** इत्यादि । चतुर्थो विकल्पो नियतिवादिनः । पञ्चमो

विकल्पः स्वभाववादिनः । एवं स्वत इत्यनेन लब्धाः पञ्च विकल्पाः । एवं परत इत्यनेनापि पञ्चैव लभ्यन्ते । एते च नित्यत्वापरित्यागेन दश विकल्पाः । एवमनित्यत्वेनापि दशैव । एकत्र मिलिता विंशतिर्जीवपदार्थेन लब्धाः । एवमेवाजीवादिष्वष्टस्वपि प्रतिपदं विंशतिविकल्पानां भावाद्विंशतिर्नवगुणिता जातमशीत्युत्तरं शतं क्रियावादिनामिति ।

**'अकिरियवाईण होइ चुलसीई'** ' त्ति । अक्रियावादिनां चतुरशीतिः । तत्र न कस्यचित् प्रतिक्षणमनवस्थितस्य पदार्थस्य क्रिया सम्भवति, उत्पत्त्यनन्तरमेव विनाशादिति ये वदन्ति, ते अक्रियावादिन आत्मादिनास्तित्ववादिन इत्यर्थः । कोकुलकांठेविद्धि रोमक–सुगत–प्रमुखाः । तथा चाहुरेके —
**'क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया । भूतिर्येषां क्रिया सैव कारणं सैव चोच्यत'** ।। इत्यादि । तेषां चतुरशीतिर्भवति । सा चामुनोपायेन द्रष्टव्या । पुण्याऽपुण्यवर्जितशेषजीवादिपदार्थ–सप्तकन्यासः । तस्य चाधः प्रत्येकं स्वपरभेदौ असत्त्वादात्मनो नित्यानित्यविकल्पौ न स्तः । कालादीनां च पञ्चानामधस्तात् षष्ठी यदृच्छा न्यस्यते । इह यदृच्छावादिनः सर्वेऽप्यक्रियावादिनः, ततः प्राक् यदृच्छा नोपन्यस्ता । तत एव विकल्पाभिलापः— **'नास्ति जीवः स्वतः कालत'** ' इत्येको विकल्पः । एवमीश्वरादिभिरपि यदृच्छावसानैः सर्वे च षट् विकल्पाः । तथा **'नास्ति जीवः परतः कालत इति षडेव विकल्पाः'** ' एकत्र मिलिता द्वादश । एवमजीवादिष्वपि षट्सु प्रतिपदं द्वादश विकल्पाः । ततः सप्त द्वादशगुणाश्चतुरशीतिविकल्पाश्चाक्रियावादिनां नास्तिकानामिति ।

**'अन्नाणि य सत्तट्ठी'** ' त्ति । अज्ञानिकानां सप्तषष्टिर्भेदाः । तत्र कुत्सितं ज्ञानमज्ञानं तदेषामस्ती–त्यज्ञानिकाः **'अतोऽनेकस्वरादि'** ' ति मत्वर्थीय इकप्रत्ययः । अथवा–अज्ञानेन चरन्तीत्यज्ञानिकाः । असञ्चिन्त्य कृतकर्मबन्धवैफल्यादिप्रतिपत्तिलक्षणाः सप्तषष्टिः । ते चामुनोपायेन ज्ञातव्याः । तत्र जीवादि–नवपदार्थान् पूर्ववद् व्यवस्थाप्य पर्यन्ते चोत्पत्तिमुपन्यस्याधः सप्त सदादय उपन्यसनीयाः। ते चामी– **सत्त्वम् असत्त्वं सदसत्त्वम् अवाच्यत्वं सदवाच्यत्वम् असदवाच्यत्वं सदसदवाच्यत्वं** चेति । तत्र **सत्त्वं** स्वरूपेण विद्यमानत्वम् । **असत्त्वं** पररूपेणाविद्यमानत्वम् । **सदसत्त्वं** स्वरूपपररूपाभ्यां विद्यमानाविद्य–मानत्वम् । तथा तदेव सत्त्वमसत्त्वं च यदा युगपदेकशब्देन वक्तुमिष्यते तदा तद्वाचकः शब्दः कोऽपि न विद्यते **इत्यवाच्यत्वम्** । यदा त्वेको भागः सन्नपरश्चावाच्यो युगपद् विवक्ष्यते तदा **सदवाच्यत्वम्** । यदा त्वेको भागोऽसन् परश्चावाच्यस्तदा**ऽसदवाच्यत्वम्** । यदा त्वेको भागः सन्नपरश्चासन्नपरतरश्चावाच्यस्तदा **सदसदवाच्यत्वमिति** । ततः सप्त नवभिर्गुणितास्त्रिषष्टिः । **उत्पत्तेस्तु** चत्वार एव विकल्पाः । ते चामी–**सत्त्वमसत्त्वं सदसत्त्वमवाच्यत्वं** चेति । शेषविकल्पत्रयं तूत्पत्त्युत्तरकालं पदार्थावयवापेक्ष–

मित्यतोऽत्राऽसम्भवीति नोक्तम् । एते चत्वारो विकल्पास्त्रिषष्टिमध्ये क्षिप्यन्ते जाताः सप्तषष्टिः । विकल्पार्थश्चैवम्—को जानाति जीवः सन्नित्येको विकल्पः, ज्ञातेन वा किं तेन ? । एवमसदादयोऽपि वाच्याः । उत्पत्तिरपि किं सतोऽसतः सदसतोऽवाच्यस्येति ? । को जानातीत्येतन्न कश्चिदपीत्यभिप्रायः ।

**'वेणइयाणं च बत्तीस'** ' त्ति । **वैनयिकानां द्वात्रिंशद् भेदाः** । तत्र विनयेन चरन्ति विनयो वा प्रयोजनमेषामिति वैनयिकाः । एते चानवधृतलिङ्गाचारशास्त्रा विनयप्रतिपत्तिलक्षणा द्वात्रिंशदमुनोपायेनावगन्तव्याः । सुर—नृपति—ज्ञाति—यति—स्थविर—अधम—मातृ—पितृषु—प्रत्येकं कायेन मनसा वाचा दानेन च देशकालोपपन्नेन विनयः कार्य इत्येते चत्वारो भेदाः सुरादिष्वष्टसु स्थानेषु भवन्ति । अष्ट चतुर्भिर्गुणिता द्वात्रिंशदिति । सर्वसङ्ख्या पुनरेतेषां मिलने त्रीणि शतानि त्रिषष्ट्यधिकानीतिरूपा परदर्शनिनां भवतीत्यलं प्रसङ्गेन ।

अथ प्रकृतं प्रस्तूयते— **'मिच्छप्पभावण'** ' त्ति । **मिथ्यात्वसम्बन्धिदेवकुलादौ प्रभावनायाम्** । तथा— **'असंजमथिरत्ते'** ' त्ति । **असंयमे**ऽसंयमवतां पार्श्वस्थादीनां कुलिङ्गिनां चाधर्म्यानुष्ठानविषये स्थिरीकरणे च **देशतश्चतुर्लघु** प्रायश्चित्तं भवति **'संयमऽथिरत्ते'** त्ति पाठे तु **संयमे** संयमवतां साध्वादीनां धर्मानुष्ठानास्थिरीकरणे च **देशतश्चतुर्लघु** भवतीति प्रथमगाथार्थः । **'तह संघाणुववूहाइसु'** त्ति। तथेत्युपन्यासे । **सङ्घानुपबृंहायां** सङ्घस्योपबृंहणाद्यकरणे, **आदिशब्दात्** स्थिरीकरण—वात्सल्य—प्रभावनानामकरणे च **'देसे चउलहु'** त्ति । **देशतश्चतुर्लघु** । **'गुरुग सव्वे'** त्ति । **सर्वत** एतेषु शङ्कादिषु कृतेषु चतुर्गुरु। **'गुरुगो अ ममत्ताइसु'** त्ति । तथा पार्श्वस्थादिषु **ममत्वं** प्रतिबन्धरूपं कुर्वतो गुरुमासः **आदिशब्दात्** परिपालन—संवास—सूत्रार्थदानादानादिष्वपि गुरुमासः निष्कारणमिति गम्यते । कारणे तु ममत्वादिकरणेऽपि न दोषः । **'लहु—गुरु—चउलहु तिविहमिच्छे'** त्ति। **त्रिविधेऽपि**— जघन्यमध्यमोत्कृष्टभेदभिन्नेऽपि मिथ्यात्वे यथाक्रमं लघुगुरुचतुर्लघूनि प्रायश्चित्तानि भवन्तीति गाथार्थः ।।५७-५८।।

अथ आधाकर्मादिदोषदुष्टमन्नपानादि ददानस्य श्राद्धस्य प्रायश्चित्तप्रतिपादनावसरस्तत्र पूर्वं किञ्चिदाधाकर्मादिस्वरूपं ग्रन्थान्तरतो लिख्यते—इह किल सप्तचत्वारिंशद् भिक्षादोषास्तद्यथा— षोडशोद्गमदोषाः षोडशोत्पादनादोषाः दशैषणादोषाः पञ्च ग्रासैषणादोषाः । तत्र उद्गमदोषा गृहस्थप्रभवाः षोडश । तद्यथा —

**'आहाकम्मुद्देसिय पूईकम्मे अ मीसजाए अ । ठवणा पाहुडियाए पाओयर कीय पामिच्चे'** ।।
(पिं०नि० १०७)

**'परियट्टिए अभिहडुब्भिन्ने मालोहडे य अच्छिज्जे । अणिसिट्ठज्झोअरए सोलस पिंडुग्गमे दोसा'** ।।
(पिं०नि० १०८)

अनयोर्लेशतो व्याख्या—**आधाकर्म** नाम यत् साध्वर्थमेव सचित्तमन्नपानाद्यचित्तीक्रियते १ । **औद्देशिकं** नाम यदुद्देशेन निष्पन्नम्, तच्च द्विधा—ओघतो विभागतश्च । तत्र स्वकुटुम्बार्थं पच्यमाने भक्तादौ पाखण्डिनां गृहिणां वा मध्ये यः कोऽपि समेष्यति, तस्य भिक्षादानार्थं कतिपयानधिकतरान् तन्दुलादीनोघेन—सामान्येनैतावत् स्वार्थमेतावच्च भिक्षादानार्थमित्येवं विभागरहितेन गृहनायिका यत्क्षिपति तदौघोद्देशिकम् । विभागतस्तु विवाहप्रकरणादिषु यदुद्धरितं भक्तादि तत् पृथक् कृत्वा दानाय कल्पितमेतद्विभागेन—स्वसत्तातः पृथक्करणेनौद्देशिकं विभागौद्देशिकम् । तच्च प्रथमतस्त्रिधा । उद्दिष्टं कृतं कर्म च । तत्र स्वार्थमेव निष्पन्नमशनादिकं भिक्षाचराणां दानाय यत् पृथक्कल्पितं तदुद्दिष्टम् । यत् पुनरुद्धरितं सत् शाल्यौदनादिभिक्षादानाय करम्बादिरूपतया कृतं न पुनः काचिदपि जीवविराधना जाता तत्कृतम् । यत् पुनरुद्धरितं मोदकचूर्णादि तद् भूयोऽपि भिक्षादानाय गुडपाकदानादिना मोदकादिरूपतया कृतं कर्म । यदुक्तम्—

**'संखडिभत्तुव्वरियं चउण्हमुद्दिसइ जं तमुद्दिट्ठं । वंजणमीसाइ कडं तमग्गितवियाइ पुण कम्मं'** ।।
(पिं०वि० ३१)

एकैकं पुनश्चतुर्धा—उद्देशसमुद्देशाऽऽदेशसमादेशभेदेन । तत्र यदुद्दिष्टं कृतं कर्म वा यावन्तः केऽपि भिक्षाचराः पाखण्डिनो गृहस्था वा समेष्यन्ति, तेभ्यः सर्वेभ्योऽपि दातव्यमिति सङ्कल्पेन कृतं तदुद्देशम् । यत्तु पाखण्डिनामेव देयत्वेन कल्पितं तत्समुद्देशम् । यत् पुनः श्रमणानामेव देयत्वेन कल्पितं तदादेशम् । यच्च निर्ग्रन्थानामेव देयत्वेन कल्पितं तत्समादेशम् । यदुक्तम्—

**'जावंतियमुद्देसं पासंडीणं भवे समुद्देसं । समणाणं आएसं निग्गंथाणं समाएसं'** ।।
(पिं०नि० २५३)

ततश्चैवं भेदाभिधानम्—उद्दिष्टोदेशम् उद्दिष्टसमुद्देशम् उद्दिष्टादेशम् उद्दिष्टसमादेशम् । एवं कृतकर्मणोरपि भेदचतुष्टयं वाच्यम् । एवं विभागतो द्वादशधौद्देशिकम् । यदुक्तम्—

**'बारसविहं विभागे चउहुद्दिट्ठं 'कडं च कम्मं च । उद्देस—समुद्देसा—ऽऽएस—समाएसभेएणं'** ।।
(पिं०वि० २९)

२। **पूतिकर्म** द्विविधं—सूक्ष्मं बादरं च । तत्राद्यमाधाकर्मिकधूमाग्निगन्धादिभिः स्यात्, परं तददुष्टमाचीर्णत्वादशक्यपरिहारत्वाच्च । बादरं पुनर्द्वेधा—उपकरणे भक्तपाने च । तत्रोपकरणं—चूल्लीस्थालीदर्व्यादिरूपम् । या च चुल्ली कियता शुद्धेन कियता चाधाकर्मिकेण कर्दमेन निष्पादिता सा इत्थम्भूता उपकरणपूतिः । अनया दिशाऽन्यस्याप्युपकरणस्य पूतित्वं भावनीयम्।

आधाकर्मिकचुल्लीस्थाल्यादिषु राद्धं स्थापितं वा आधाकर्मादिखरण्टितस्थाल्यादौ स्थापितं वा । आधाकर्मिकभक्तादिलवेनापि मिश्रं वा भक्तं वा पानं वा स्वरूपतः शुद्धमपि पूतिः—अपवित्रः स्याद्यथा—अशुचिलवेनाशनादि । एतद्भक्तपान**पूतिकर्म** । यदुक्तम्—

**'उग्गमकोडिकणेणवि असुइलवेणं व जुत्तमसणाई । सुद्धं पि होइ पूई तं सुहुमं बायरंति दुहा'** ।।
**(पिं०वि० ३२)**

३ । **मिश्रजातं** त्रिधा—यावदर्थिकमिश्रं पाखण्डिमिश्रं यतिमिश्रं च । यत् स्वस्य योग्यं यावदर्थिकानां पाखण्डिनां यतीनां च योग्यं प्रथमतोऽप्यग्निज्वालनाधिश्रयणदानाद्यैरशनादि मिश्रितमेव राद्धुमारभ्यते तन्मिश्रजातम् ४ । **स्थापना** द्वेधा—चिरेत्वरभेदात् । यत् साध्वर्थं भक्तादि स्थापयित्वा मुञ्चति सा चिरस्थापना । गृहपङ्क्त्यामेकः साधुरेकत्र गृहे सम्यगुपयोगेन भिक्षां परिभावयन् गृह्णाति द्वितीयस्तु द्वयोः पार्श्वस्थयोर्दातृहस्तगते द्वे भिक्षां परिभावयति । ततो गृहत्रयात्परतो गृहान्तरे साधुनिमित्तं या दातृहस्तगता भिक्षा सा इत्वरस्थापना । तत्रोपयोगाभावात् ५ । **प्राभृतिकाऽपि** सूक्ष्मबादरभेदात् द्विधा । तत्र गुर्वागमनं ज्ञात्वा कोऽपि श्रावको विवाहादेरुपसर्पणमपसर्पणं वा यत्करोति सा बादरप्राभृतिका । यत्तु पुत्रादौ भोजनमर्थयमाने सति साध्वर्थमुत्थिता सती तवापि दास्यामीति यद्दात्री ब्रूते सा सूक्ष्मप्राभृतिका ६ । **प्रादुष्करणमपि** द्वेधा—प्रकटकरणं प्रकाशकरणं च । तत्र प्रथममन्धकारादपसार्य बहिः सप्रकाशप्रदेशे साध्वर्थमन्नादिस्थापनं प्रकटकरणम् । सान्धकारस्थानस्थितस्यैवान्नादेर्मणि—प्रदीप—गवाक्षकुड्य— छिद्राद्यैरुद्योतकरणं प्रकाशकरणम् ७ । **क्रीतं** चतुर्द्धा—आत्मद्रव्यक्रीतम् , आत्मभावक्रीतम् , परद्रव्यक्रीतम् , परभावक्रीतं चेति । तत्रात्मना स्वयमेव द्रव्येण—उज्जयन्तादितीर्थभगवत्प्रतिमाशेषादिरूपेण प्रदानतः परमावर्ज्य यद्भक्तादि गृह्यते तदात्मद्रव्यक्रीतम्। यत्पुनरात्मना स्वयमेव भक्ताद्यर्थं धर्मकथादिना परमावर्ज्य भक्तादि गृह्यते तदात्मभावक्रीतम् । तथा परेण यत्साधुनिमित्तं द्रव्येण क्रीतं तत्परद्रव्यक्रीतम् । यत् पुनः परेण साध्वर्थं निजविज्ञानप्रदर्शनेन धर्मकथाकथनादिना परमावर्ज्य भक्तादि गृह्यते तत्परभावक्रीतम् ८ । **प्रामित्यं** द्विधा—लौकिक लोकोत्तरभेदात् । तत्र यदुद्धारकेण वस्त्राद्यानीय साधुभ्यो गृहस्थो ददाति तल्लौकिकम् । साधुरेव वस्त्राभावे साध्वन्तरपार्श्वाद्यदुद्धारकेण गृह्णाति तल्लोकोत्तरम् ९ । एवं **परावर्त्तितमपि** द्विधा—लौकिकं लोकोत्तरं च । नवरमत्र परावर्त्य ददाति गृह्णाति वेति वाच्यम् १० । **अभ्याहृतं** नाम **अभि**—सम्मुखं स्वस्थानात् साधुसमीपे दानायाऽऽहृतमानीतमभ्याहृतम् । तद् द्विविधम् स्वग्रामाभ्याहृतं परग्रामाभ्याहृतं च । तत्र पुनः पाश्चात्यं द्वेधा— सप्रत्यपायपरग्रामाभ्याहृ—तमप्रत्यपायपरग्रामाभ्याहृतं वा ११ । **उद्भिन्नं** त्रिधा—लिप्तोद्भिन्नं दर्दरोद्भिन्नं कपाटोद्भिन्नं च । तत्र जतुछगणादिलेपेन विलिप्तं घृतघटादिमुखं साधूनां दानायोद्भिद्य यद् घृतादि दीयते तल्लिप्तोद्भिन्नम् । दर्दरं—कुतपादेर्मुखबन्धनं वस्त्र—चर्मादिखण्डं तमुद्भिद्य यद्दीयते तद्दर्दरोद्भिन्नम् । तथा यत्पिहितं कपाटमुद्भिद्य यद्दीयते तत्कपाटोद्भिन्नम् १२ । **मालापहृतं** जघन्यमध्यमोत्कृष्टभेदात् त्रेधा । तत्र भून्यस्तपादाग्राभ्यामुत्पाटित—

पार्ष्णिभ्यां च पादाभ्यामूर्ध्वविलगितसिक्किकादिस्थं दात्र्या दृष्टेरगोचरं यद्दीयते तज्जघन्यम् । मञ्चकादिकमारुह्य यद्दीयते तन्मध्यमम् । निःश्रेण्यादिकमारुह्य यद्दीयते तदुत्कृष्टम् १३ । **आच्छेद्यं** त्रिधा—स्वामिप्रभुस्तेनभेदात् । तत्र स्वामी—गृहादिनायकः, प्रभु—र्गृहपतिस्तौ स्वायत्तमानुषेभ्यः, स्तेना—श्चौरास्ते सार्थिकादिभ्यो बलादाच्छिद्योद्दाल्य यद्ददाति तदाच्छेद्यम् १४ । **अनिसृष्टमपि** त्रिविधं—साधारणचोल्लकजड्डभेदतः । तत्र साधारणराद्धं भक्तं सर्वेषामननुज्ञातमेवैकादेर्ददतः साधारणानिसृष्टम् । चोल्लको—भोजनं यत्कौटुम्बिकप्रेषितहालिकयोग्यचोल्लकमध्यात् कौटुम्बिकस्याननुज्ञयैव चोल्लकवाही यत् साधवे ददाति तच्चोल्लकानिसृष्टम् । जड्डो—हस्ती तत्सत्कं पिण्डादिकं राज्ञा गजेन वाऽननुज्ञातमेव यद्ददाति तज्जड्डानिसृष्टम् १५ । **अध्यवपूरको** नाम यत्राग्निसन्धुक्षणस्थालीजलप्रक्षेपाद्यारम्भे यावदर्थिकाद्यागमनात् पूर्वमेवात्मार्थं निष्पाद्यते पश्चाद् यथासम्भवं त्रयाणां यावदर्थिकादीनामर्थायाधिकतरास्तन्दुलाः सह राद्धुं स्थाल्यां प्रक्षिप्यन्ते सोऽध्यवपूरकः । अत एव चास्य मिश्रजाताद् भेदः । यतो मिश्रजातं तदुच्यते यत् प्रथमत एव यावदर्थिकाद्यर्थमात्मार्थं च मिश्रं निष्पाद्यते । यत् पुनः प्रथमतः स्वार्थमारभ्यते पश्चात् प्रभूतान् यावदर्थिकादीनागतानवगम्य तदर्थाय यदधिकतरजलतन्दुलादिप्रक्षेपः सोऽध्यवपूरकः । स च यावदर्थिकमिश्रः पाखण्डिमिश्रो यतिमिश्रश्चेति १६ । एते षोडशोद्गमदोषा भवन्ति । एतेषु च आधाकर्म औद्देशिकभेदत्रयम् भक्तपानपूतिः मिश्रजातान्त्यभेदद्वयं बादरप्राभृतिका अध्यवपूरकान्त्यभेदद्वयं चाविशुद्धिकोटिः । यदुक्तम्—

**'इअ कम्मं उद्देसिअतिअ मीसज्झोयरंतिमदुगं च । आहारपूइ बायरपाहुडि अविसोहिकोडित्ति'** ।।
(पिं०वि० ५३)

तदवयवेनापि स्पृष्टं सर्वमन्नपानाद्यशुचिलवेनेवाभोज्यं भवति । यदुक्तम्—

**'उग्गमकोडिकणेणवि असुइलवेणं व जुत्तमसणाई । सुद्धंपि होइ पूई तं सुहुमं बायरंति दुहा'** ।।
(पिं०वि० ३२)

शेषास्तु विशुद्धिकोटयः । तत्सम्पृक्तं चान्नपानादि पुनः संस्तरे साधवः सर्वमेव त्यजन्ति । असंस्तरे तु विविच्य तदेव त्यजन्ति । तक्रादिरसमध्ये क्षेपे तावन्मात्रमेव वा तद्वस्तु त्यजन्ति । यदुक्तम्—

**'तं चेव असंथरणे संथरणे सव्वमवि विगिंचंति । दुल्लहदव्वे असढा तत्तियमित्तं चिय चयन्ति''** ।।
(पिं०वि० ५६)

उक्ताः षोडशोद्गमदोषाः । अथ षोडशोत्पादनादोषानाह —

**'धाई दूई निमित्ते आजीव वणीमगे तिगिच्छा य । कोहे माणे माया लोभे य हवंति दस एए'** ।।
(पिं०नि० ४३८)

**'पुव्विंपच्छासंथव विज्जा मंते य चुन्न जोगे य । उप्पायणाइ दोसा सोलसमे मूलकम्मे य ।।**
**(पिं०नि० ४३९)**

अनयोर्व्याख्या—**धात्र्यः** बालकपरिपालिकाः । ताः पञ्च क्षीर—मज्जन—मण्डन—क्रीडना—ङ्कधात्र्यः । तासां कर्म धात्रीत्वं तेन लब्धः पिण्डो **धात्रीपिण्डः** १। **दूती** परसन्दिष्टार्थकथिका । तस्याः कर्म दौत्यं तेन स्वग्रामे परग्रामे वा सन्दिष्टार्थकथनरूपेण प्राप्तः पिण्डो **दूतीपिण्डः** २। कालत्रयसंसूचकलाभालाभशुभा—शुभादिसंसूचक निमित्तकथनेन प्राप्तः पिण्डो **निमित्तपिण्डः** ३। **आजीवनापिण्डो** जातिकुलगणशिल्पकर्मभेदतः पञ्चधा । तत्र जातिकुले पूर्वोदितस्वरूपे । गणो—मल्लादिवृन्दम् । शिल्पं—तूर्णनसीवनादि, कर्म—कृष्यादि, अथवाऽप्रीत्युत्पादकं कर्म प्रीत्युत्पादकं तु शिल्पम् । अन्ये त्वाहुरनाचार्योपदिष्टं कर्म आचार्योपदिष्टं तु शिल्पमिति । एतैरात्मनो गृहस्थस्य च तुल्यरूपताख्यापनेन लब्धः पिण्ड आजीवनापिण्डः ४। **वनीपको** भिक्षाचरस्तद्वत् पिण्डार्थं श्रमणातिथिब्राह्मणकृपणश्वानादिभक्तानां दायकानामात्मानं तत्तद्भक्तं दर्शयन् यल्लभते स **वनीपकपिण्डः** ५ । **चिकित्सापिण्डो** द्वेधा—सूक्ष्म—बादरभेदात् । तत्र वैद्यवत् स्वयं वमनविरेचनादिरोगप्रतीकारविधापनं बादरचिकित्सा तयाऽवाप्तः पिण्डो बादरचिकित्सापिण्डः । वैद्यौषधादिसंसूचनेन सूक्ष्मचिकित्सा तयाऽवाप्तः पिण्डः सूक्ष्मचिकित्सापिण्डः ६ । साधोर्विद्याप्रभावम्— उच्चाटनमारणादिकं तपःप्रभावं—शापदानादिकम् राजकुले वल्लभत्वं क्रोधफलं वा ज्ञात्वा गृहस्थेन यः पिण्डो दीयते स **क्रोधपिण्डः** ७ । अभिमानेन हठादपि यः पिण्डो गृह्यते स **मानपिण्डः** ८ । नानाविधविप्रतारणप्रकारैर्यः पिण्डो लभ्यते स **मायापिण्डः** ९। वल्लचणकादिकमसारं लभ्यमानं प्रतिषिध्य यन्मोदकादिसारमेव प्रतिगृह्णाति अथवा प्रचुरं मधुरस्निग्धादि वस्तु लभ्यमानं दृष्ट्वा यद्बहु गृह्णाति स **लोभपिण्डः** १० । **संस्तवो** द्विधा—श्लाघारूपः परिचयरूपश्च । तत्र श्लाघारूपो वचनसंस्तवः, परिचयरूपः—सम्बन्धिसंस्तवः । एकैको द्विधा—पूर्वसंस्तवः पश्चात्संस्तवश्च । तत्र पूर्वं यद्दातारं स्तुत्वा, याचते, लब्धे वा पश्चात् स्तौति स पूर्वसंस्तवः पश्चात्संस्तवश्च श्लाघारूपः । सम्बन्धिसंस्तवो मात्रादिनात्रकयोजनं पूर्वसंस्तवः श्वश्र्वादिसम्बन्धयोजनं तु पश्चात्संस्तवः ११ । स्त्रीदेवताऽधिष्ठिता ससाधना वा विद्या तत्प्रयोगेण लब्धः पिण्डो **विद्यापिण्डः** १२ । पुंरूपदेवताधिष्ठितोऽसाधनो वा मन्त्रः तत्प्रयोगेणाप्तः पिण्डो **मन्त्रपिण्डः** १३ । **चूर्ण**मञ्जनादि तदर्पणादिना प्राप्तः पिण्डश्चूर्णपिण्डः १४ । **योगः** पादप्रलेपादिः तत्करणार्पणादिना लब्धः पिण्डो **योगपिण्डः** १५। मङ्गलमूलिका—स्नपनकगर्भाधान—गर्भस्तम्भ— प्रसव—पातन—मूलरक्षाबन्धनादिभिर्लब्धः पिण्डो **मूलकर्मपिण्डः** । एष च महापातकः । यदुक्तम्—

**'मंगलमूलीण्हवणाइ गब्भवीवाहकरणघायाई । भववणमूलकम्मं ति मूलकम्मं महापावं' ।।**
**(पिं०वि० ७५)**

१६। उक्ताः षोडशोत्पादना दोषाः । अथ दश ग्रहणैषणादोषानाह —

**'संकिअ मक्खिअ निक्खित्त पिहिअ साहरिअ दायगुम्मीसे । अपरिणय लित्त छड्डीय एसणदोसा दस हवंति' ।।**
**(पिं०नि० ५५७)**

एतस्या व्याख्या—शङ्कितं नाम आधाकर्मादीनां षोडशोद्गमदोषाणां म्रक्षितादीनां च नवैषणादोषाणां मध्ये भक्तादेर्ग्रहणे भोजने वा यं यं दोषं शङ्कते तद् भक्तपानादि तत्तद्दोषशङ्कितं भवति, तद्ग्राही तत्तद्दोषसमानदोषवान् भवतीत्यर्थः । अत्र च चत्वारो भङ्गाः । शङ्कितग्राही शङ्कितभोजी १ शङ्कितग्राही निःशङ्कितभोजी २ निःशङ्कितग्राही शङ्कितभोजी ३ निःशङ्कितग्राही निःशङ्कितभोजी ४ च । अत्र द्वितीयचतुर्थभङ्गौ शुद्धौ, द्वयोरपि भोजनस्य निःशङ्कितत्वेन निर्दोषत्वात् । द्वितीयभङ्गभाविनः शङ्कितग्रहणदोषमात्रस्योत्तरशुभपरिणामेन शुद्धिसम्भवात् । शेषभङ्गद्वये पुनः शङ्कितदोषसमानं दोषमापद्यत इति १ । **म्रक्षितं** द्विधा—सचित्ताचित्तभेदेन । तत्राद्यं पृथिवी—जल—वनस्पतिभेदेन त्रेधा । तत्र पृथिवीम्रक्षितं चतुर्द्धा—सरजस्कं—सचित्तपृथिवीरजोवगुण्ठितं देय—हस्त—मात्रकादि तच्च तन्म्रक्षितं च सरजस्कम्रक्षितम्। तथा सेटिकोषादिम्रक्षितम्—ऊषमृत्तिकाहरितालहिङ्गुलकमनःशिलाञ्जनलवणगैरिकसेटिकादिपृथिवीकायम्रक्षितमित्यर्थः । निर्मिश्रोऽपरिणतः सचेतनः, मिश्रः सचित्ताऽचित्तरूप एवंविधो यः कर्दमस्तेन म्रक्षितं निर्मिश्रकर्दमम्रक्षितं मिश्रकर्दमम्रक्षितं चेत्यर्थः । अप्कायम्रक्षितमपि चतुर्द्धा—पुरःकर्म पश्चात्कर्म सस्निग्धं उदकार्द्रं च । तत्र दानात् पूर्वं हस्तमात्रकयोः क्षालने पुरःकर्म, दानानन्तरं क्षालने पश्चात्कर्म, सस्निग्धमीषल्लक्ष्यमाणजलखरण्टितं हस्तादि, उदकार्द्रं स्पष्टोपलभ्यमानजलसंसर्गम् । वनस्पितिकायम्रक्षितं तु द्वेधा—प्रत्येकानन्तभेदेन । पृथिवीम्रक्षितं वनस्पतिम्रक्षितं चानन्तरपरम्परभेदेन प्रत्येकं द्विविधम् । अचित्तम्रक्षितं पुनर्द्वेधा—मांसवसाशोणित — सुरामूत्रोच्चारादिगर्हितैर्म्रक्षितं गर्हिताचित्तम्रक्षितम् । तथा संसजन्ति—विलगन्ति सलेपत्वात् कीटिकामक्षिकादि जन्तवो येषु तानि संसक्तानि तैरगर्हितैरचितैर्म्रक्षितमगर्हितसंसक्ताचित्तम्रक्षितम् २ । **निक्षिप्तं** पृथिव्यादिषु स्थापितं तद्द्विधा—अनन्तरं परम्परं चेति । देयं वस्तु पृथिव्यादिषु निरन्तरं सान्तरं वा स्थापितं भवतीति द्विधा निक्षिप्तमित्यर्थः ३ । **पिहितं** नाम यद् देयमशनादि वस्तु केनाऽप्यपरेण वस्तुना स्थगितं । तत्त्रेधा—गुर्वचित्तपिहितं, सचित्तपिहितं, मिश्रपिहितं चेति ४ । **संहृतं** नाम येन हस्तेन मात्रकेण वा कृत्वा दात्री साधोरशनादिकं दातुमिच्छति । तत्राऽन्यददातव्यं किमपि सचित्तमचित्तं मिश्रं वाऽस्ति । ततस्तदन्यत्र भूम्यादौ सचित्तेऽचित्ते मिश्रे वा क्षिप्त्वा तेन हस्तेन मात्रकेण वा यद्ददाति। अत्र सचित्ताचितमिश्रभेदैश्च तिस्रश्चतुर्भङ्ग्यो भवन्ति । तथाहि— एका चतुर्भङ्गी सचित्तमिश्रपदाभ्यां, द्वितीया सचित्ताचित्तपदाभ्यां । तृतीया मिश्राचित्तपदाभ्याम् । तत्र सचित्ते सचित्तं संहृतं, मिश्रे सचित्तं, सचित्ते मिश्रं, मिश्रे मिश्रं चेति प्रथमा । सचित्ते सचित्तम्, अचित्ते सचित्तम्, सचित्तेऽचित्तम्, अचित्तेऽचित्तम् इति द्वितीया । तथा मिश्रे मिश्रम्, अचित्ते मिश्रम्, मिश्रेऽचित्तम्, अचित्तेऽचित्तमिति तृतीया । अत्र प्रथमायाः सर्वेष्वपि भङ्गेषु न कल्पते, द्वयोरस्त्वाद्येषु त्रिषु त्रिषु प्रतिषेधश्चरमे पुनर्भजना । अत्र सचित्तः पृथिवीकायः सचित्ते पृथ्वीकाये संहृतः, सचित्ताप्काये वा संहृत इत्यादि

षड्जीवनिकायचारणिकया स्वस्थानपरस्थानापेक्षया चतुर्भङ्गीत्रयभङ्गेष्वेकैकस्मिन् भङ्गे षट्त्रिंशद् षट्त्रिंशद् भङ्गा भवन्ति । ते च सर्वसङ्ख्यया चत्वारि शतानि द्वात्रिंशदधिकानि भङ्गानां भवन्ति । एते च सर्वेऽपि भङ्गा नैरन्तर्येण च भवन्ति । तत्र चैतेषु सर्वेष्वपि निरन्तर–परम्परसंहृतभङ्गेषु यत्र यत्र सचित्तसङ्घट्टनादिर्दोषस्तत्र तत्र न कल्पते । अन्यत्र तु कल्पते । एतत्सर्वं निक्षिप्तपिहितयोरप्यवगन्तव्य–मिति । **दायकः** स्थविरादिरित्येवंविधो दोषः । स्थविरादिभिर्दीयमाने दायकदोषो भवतीत्यर्थः । तदुक्तम् —

**'थेरऽपहु–पंड वेविर–जरि–अंधऽव्वत्त–मत्त–उम्मत्ते । छिन्नकरचरण –गुव्विणि–नियलंडुअबद्ध-बालवच्छाए।।**
**खंडइ पीसइ भुंजइ जिमइ विरोलइ दलइ सजिअं। ठवइ बलिं उवउत्तइ पिढराइ तिहा सपच्चवाया जा ।।**
**साहारण–चोरियगं देइ परक्कं परट्ठं वा। कत्तइ लोढइ पिंजइ विक्खिणइ पगलंतपाउयारूढे' ।।३।।**

**(पिं०वि० ८५ तः ८८)**

एतासां लेशतो व्याख्या–**स्थविरो** वृद्धः । सप्ततिवर्षाणां मतान्तरे षष्टिवर्षाणां वोपरिवर्त्ती । स्थविरस्य च हस्तेन भिक्षाग्रहणे निपतनषड्जीवनिकायविराधनादिदोषा भवेयुः । अतस्तद्धस्तेनोत्सर्गतो न ग्राह्यम् १ । तथा **अप्रभुर्दीयमानभक्तादेरस्वामी** भृतकादिः । तेन दीयमाने प्रभोरप्रीतिः स्यात् २ । **पण्डको** नपुंसकस्तस्मिन् दायके लोकापवादशङ्कादिदोषाः ३ । **वेपमानः** कम्पमानशरीरः । तद्दाने परिशटन–भाजनभङ्गादिदोषाः ४ । **ज्वरितो** ज्वररोगपीडितः । ततो भिक्षाग्रहणे ज्वरसङ्क्रमण–जनापवादादयो दोषाः ५ । **अन्धः** चक्षुर्विकलः । तस्य हि भिक्षां ददतः कायवधस्खलनपतन–भाजनबहिर्भक्तक्षेपणजनवचनीयतादयो दोषाः ६ । **अव्यक्तो** बालो जन्मतो वर्षाष्टकाभ्यन्तरवर्त्ती । तेन दीयमाने तज्जनन्यादेः प्रद्वेषः ७ । **मत्तः** पीतमदिरादिः । स चाशुचित्वालिङ्गनहननभाजनभङ्ग–करणादिदोषदुष्टत्वात्साधुभिक्षादानाऽयोग्यः ८ । **उन्मत्तो** दृप्तो ग्रहगृहीतो वा सोऽपि मत्तवद्दुष्टः ९ । **छिन्नकरः** कर्त्तितहस्तः **छिन्नचरणो** लूनपादः। एताभ्यां च सकाशाद्भिक्षा न ग्राह्या, दानासमर्थत्वा–ल्लोकापवादादिदोषसम्भवाच्च १०-११ । **गुर्विणी** आपन्नसत्त्वा । तत्सकाशाद् गच्छनिर्गता जिनकल्पिकादयः प्रथमदिनादारभ्य भिक्षां न गृह्णन्त्येव । स्थविरकल्पिकास्त्वष्टौ मासान् यावद् गृह्णन्ति, नवमे मासे तु न गृह्णन्ति, निषीदनोत्थानाभ्यां गर्भपीडासम्भवात् १२ । **निगडेन** लोहमयपादबन्धनेन **बद्धः**, **अण्डुकेन** काष्ठमयकरबन्धनेन **बद्धः** एताभ्यां सकाशात् परितापनादिदोषसम्भवाद्भिक्षा न ग्राह्या १३–१४। **बालवत्सा** स्तन्योपजीविशिशुका तया दीयमानं न कल्पते, निक्षिप्तबालस्य मार्जारादिभ्यो विनाशसम्भवात् निक्षिप्यमाणस्योत्क्षिप्यमाणस्य चातिसुकुमारत्वेन परितापनासम्भवात् १५। गाथापर्यन्तवर्त्ती **याशब्दोऽत्र** प्रत्येकमभिसम्बध्यते । ततश्च या काचिन्महिला **खण्डयति** उदूखलक्षिप्तानि शाल्यादिबीजानि

मुसलघातैः श्लक्ष्णीकरोतीत्यर्थः । तया दीयमाना भिक्षा न ग्राह्या, बीजसङ्घट्टाद्यारम्भसम्भवात् १६ । तथा **पिनष्टि** शिलायां तिलामलककुस्तुम्बरुलवणजीरकादीनि मृद्नातीति भावः । अनयापि दीयमानं न कल्पते तिलादिसङ्घट्टसद्भावात् १७ । तथा **भृज्जति** चनकयवगोधूमादीन् अग्निप्रतप्तकडिल्लकादौ स्फोटयतीत्यर्थः । तया दीयमानं न कल्पते कडिल्लकादौ प्रक्षिप्तस्य तस्य चनकादेर्दाहसम्भवात् १८ । तथा **जेमति** भुङ्क्तेऽभ्यवहरतीत्यर्थः । भुञ्जाना ह्याचमनं विधाय साधुभ्यो यदि दद्यात्तदाऽप्कायविराधना। अथैतद्दोषभयात् तदकृत्वैव वितरेत् तदोच्छिष्टमप्येते न त्यजन्तीत्यादिजनापवादः । तत्र च महान् दोषः । यदाह —

**'छक्कायदयावंतो वि संजओ दुल्लहं कुणइ बोहिं । आहारे नीहारे दुगुंछिए पिंडगहणे अ'** ।।

**(ओ०नि० ४४३)**

इत्यतो न कल्पते १९ । तथा **विरोलयति** करमन्थनादिना दध्यादिकं मथ्नाति । सा हि संसक्तदध्यादिलिप्तकरा भिक्षां ददती सत्त्ववधं विदध्यादिति न गृह्यते २० । तथा **दलति सजीवं** सचित्तं गोधूमादिधान्यं घरट्टेन पिनष्टि । इयं भिक्षादानायोत्तिष्ठन्ती बीजादि सङ्घट्टयति दत्त्वा च करौ प्रक्षालयतीति न गृह्यते २१ । तथा या काचिन्नारी साधुदानायोद्यता सती मूलस्थालीतः समाकृष्य स्थगनिकादौ **बलिमुपहारमग्रकूरमित्यर्थः स्थापयति**, तया दीयमाना भिक्षा न कल्पते प्रवर्त्तनादिदोषसम्भवात् २२ । **तथोद्वर्त्तयति** साधुदानबुद्ध्या परावर्त्तयति **पिठरादि** स्थाल्यादि नामयतीत्यर्थः । अत्र च कीटिकादिसत्त्वोपघातः स्यात् २३ । तथा **त्रिधोर्ध्वाधस्तिर्यग्लक्षणैस्त्रिभिस्त्रिभिः प्रकारैः** सप्रत्यपायकाष्ठकण्टकगवादिभ्यः सकाशात्सम्भाव्यमानाभिघाताद्यनर्था या काचिद्वनिता स्यात् । **'तहा सपच्चवाया जा'** इति पाठे तु **तथा सप्रत्यपाया या** दात्री कूलवालकमुनिव्रतत्याजयित्री मागधिकावेश्येव शाकिन्यादिर्वा तया दीयमानं न कल्पते २४ । तथा **साधारणं** बह्वायत्तं तद्ददातीति योगः । तत्र साधारणानिसृष्टवद्दोषा वाच्याः २५ । तथा **चोरितकं** चौरिकया गृहीतं साधुभ्यो **ददाति** । तत्र च दोषाः प्रतीता एव २६। तथा **पराक्यं** परसत्कं परकीयमिदमित्युक्त्वा ददाति । अथवा **परार्थं** परनिमित्तं कार्पटिकादिदानाय कल्पितमित्यर्थस्तद्ददाति । अत्र च परसत्के तत्स्वामिनाऽननुज्ञाते परदानाय कल्पिते च दीयमाने अदत्तादानाऽन्तरायादयो दोषाः २७ । तथा या **कर्त्तयति** रूतं चक्रेण सूत्रं करोति २८ । तथा **लोढयति** कर्पासं लोढिन्यां कनकेन निरस्थिकं करोतीत्यर्थः २९ । तथा **पिञ्जयति** रूतं पिञ्जनेन मृदूकरोति ३० । तथा **'विक्खिणइ'** त्ति । **विकीर्णयति** रूतं कराभ्यां पौनःपुन्येन श्लक्ष्णयति ३१ । एताभिश्चतसृभिरपि दीयमानं न कल्पते, कर्पासास्थिकसङ्घट्टन—देयवस्तुखरण्टितहस्तधावनदोषसम्भवात् । तथा **प्रगलन्** गलत्कुष्ठस्ततो भिक्षाग्रहणे हि साधोरपि कुष्ठरोगसङ्क्रातिः स्यात्तदीयोच्छ्वासत्वक्संस्पर्शस्वेदमलमूत्रोच्चाराहारलालादिभिः शरीरान्तरे तत्सङ्क्रमणस्याभिहितत्वात्ततो न ग्राह्या ३२।

तथा **पादुकारूढः** काष्ठादिमयोपानत्समारूढः । स हि भिक्षां प्रयच्छन् दुर्व्यवस्थिततत्वात् कदाचित् पतति कीटिकादिसत्त्वविराधनां च करोतीत्यतोऽसावपि परिहृियते ३ ३ । तथा —

**'छक्कायवग्गहत्था समणट्ठा निक्खिवित्तु ते चेव । घट्टंती गाहंती आरंभंती अ पडिसिद्धा'** ।।

(पिं०नि० ६११)

एतस्या व्याख्या—**षट्कायव्यग्रहस्ता** षट्काययुक्तहस्ता । इह षट्कायव्यग्रहस्ता सोच्यते यस्या हस्ते सजीवलवणमुदकमग्निर्वायुपूरितो दृतिकः फलादिकं बीजपूरादि मत्स्यादयो वा विद्यन्ते । ततः सा **श्रमणार्थं** श्रमणभिक्षादानार्थमुत्थाय षट्कायान् भूम्यादौ **निक्षिप्य** पुनः **तानेव घट्टयन्ती** तत्सङ्घट्टं कुर्वाणा **तानेव गाहमाना** विलोडनेनेतस्ततो विक्षेपणेनाऽगाढं गाढं वा परितापयन्ती । **तानेवारभमाणा च** षट्कायोपद्रवकरमारम्भं कुर्वाणा । खननमर्दनादिना पृथिवीकायम्, मज्जनवस्त्रधावनादिनाऽप्कायम्, उल्मुकघट्टनादिनाऽग्निम्, अग्न्यादेः फूत्करणादिना मारुतम्, फलादेः कर्त्तनादिना वनस्पतिम्, स्फुरन्मत्स्यादिछेदनादिना त्रसकायं विराधयन्तीत्यर्थः। एवंविधा दात्री **प्रतिषिद्धा** । एतस्याः पार्श्वात् साधुभिर्भिक्षा न ग्राह्येत्यर्थः । एवंप्रकारः षष्ठः एषणादोषः ६ । **उन्मिश्रं** नाम साधूनां दानयोग्यमोदनादि, अयोग्यं तु सचित्तं फलादि, मिश्रमामपक्वपृथुकादि, अचित्तं च तुषादि । एतानि द्व्यादीनि वस्तून्यनाभोगादिना मिश्रयित्वा गृहस्थो यद्ददाति । तत्र सचित्तेन मिश्रेण वा वस्तुना मिश्रीकृत्य यद्देयद्रव्यं ददाति तन्न कल्पते, अन्यत्र तु भजना ७ । **अपरिणतं** द्विधा—द्रव्यापरिणतं भावापरिणतं च । तत्र द्रव्यापरिणतं यद्दातव्यद्रव्यमेवापरिणतमप्रासुकं भवति । भावो—ऽध्यवसायः । स च द्वयोः स्वामिनोर्मध्यादेकस्याऽपरिणतो दाने अनभिमुखोऽथवा भिक्षागतसाधुसङ्घाटकमध्यादेकतरस्य साधोर्मनसि एतल्लभ्यमानमशनादि निर्दोषमित्यध्यवसायः द्वितीयस्य तु न तथा । ततो भावेन दातृसत्केन ग्रहीतृसाधुसत्केन वाऽपरिणतं भावापरिणतम् ८ । **लिप्तं** नाम दधिक्षीरघृततैलतीमनप्रभृतिद्रव्यस्य लेपः करभाजनादौ लगति, तच्च कारणं विना न गृह्यते । यदाह —

**'घित्तव्वमलेवकडं लेवकडमाहु पच्छकम्माई । न य रसगेहिपसंगो न य भुत्ते बंभपीडा य'** ।।

(पिं०नि० ६४९)

ननु यद्येवं लेपकृद्ग्रहणे पश्चात्कर्मादयो दोषा भवन्ति ततस्तन्न गृह्यते, तर्हि मा कदाचनापि साधु—र्भुङ्क्ताम् ? एवं हि सर्वेषां दोषाणां मूलत एवोत्थानं निषिद्धं भवति । गुरुराह—सर्वकालं क्षपणमेव कुर्वतः साधोश्चिरकालभावितपोनियमसंयमानां हानिर्भवति, तस्माद्यावज्जीवं क्षपणं न कार्यम् । पुनः प्राह यदि सर्वकालं क्षपणं कर्त्तुमशक्तस्तर्हि षण्मासक्षपणं कृत्वा पारणकमलेपकृता विधत्ताम् ? गुरुराह—यद्येवं तपःकुर्वन् संयमयोगान् कर्त्तुं शक्नोति तर्हि करोतु, न कोऽपि तस्य निषेद्धा । पुनरप्याह—यदि षण्मासक्षपणं कर्त्तुं न शक्नोति तर्हि एकदिनोनं षण्मासक्षपणं कृत्वा आचाम्लेन पारयतु । एवमेकैकदिनहान्या

तावदात्मानं तोलयेद् यावच्चतुर्थं कृत्वा आचाम्लेन पारणकं करोतु । एवमप्यसामार्थ्ये दिवसे दिवसे गृह्णात्वाचाम्लं निर्लेपम् ? गुरुराह—करोत्वेवं तपो, यदि प्रत्युपेक्षणादिसंयमयोगभ्रंशो न भवति । केवलं सम्प्रति सेवार्त्तसंहनननानां नास्ति तादृशी शक्तिरिति न तथोपदेशो विधीयते । पुनः परः प्राह—ननु महाराष्ट्राः कोशलदेशोद्भवाः सदैव सौवीरकूरमात्रभोजिनः तेऽपि च सेवार्त्तसंहननाः, ततो यदि तेऽपीत्थं यापयन्ति यावज्जीवं तर्हि तथा सौवीरकूरमात्रभोजनेन किं न यतयो मोक्षगमनैकबद्धकक्षा यापयन्ति ? तैः सुतरामेवं यापनीयं प्रभूतगुणसम्भवात् । गुरुराह —

**तिअ सीअं समणाणं तिअमुण्ह गिहीण तेणऽणुन्नायं । तक्काईणं गहणं कट्टरमाईसु भइयव्वं ।।**
**(पिं०नि० ६५६)**

व्याख्या—आहार उपधिः शय्या एतानि **त्रीण्यपि गृहिणां** शीतकालेऽ**प्युष्णानि** भवन्ति । तेन तेषां तक्रादिग्रहणमन्तरेणापि बाह्याभ्यन्तरोष्णतापेनाहारो जीर्यते । तत्राऽभ्यन्तरो भोजनवशात् । बाह्यः शय्योपधिवशात् । एतान्येवाहारोपधिशय्यारूपाणि **त्रीणि** वस्तूनि **यतीनां** ग्रीष्मकालेऽपि **शीतानि** भवन्ति । तत्राहारस्य शीतता भिक्षाचर्यायां प्रविष्टस्य बहुषु गृहेषु स्तोकस्तोकलाभेन बृहद्वेलालगनात्, उपधेरेकवारमेव वर्षाकालादर्वाक् प्रक्षालनेन मलिनत्वात्, शय्यायास्तु प्रत्यासन्नाग्निकरणाभावेन। तेन कारणेन ग्रीष्मकालेऽप्याहारादीनां शीतत्वसम्भवरूपेणोपहन्यते जाठरोऽग्निः । तस्माच्चाग्न्युपघाता—दजीर्णबुभुक्षामान्द्यादयो दोषा जायन्ते । **ततस्तक्रादिग्रहणं** साधूनाम**नुज्ञातम्** । तक्रादिनाऽपि हि जाठरोऽग्निरुद्दीप्यते । तेषामपि तथास्वभावत्वात् । **कट्टरादिषु** घृतवटिकोन्मिश्रतीमनादीनां ग्रहणं **भाज्यम्** । ग्लानत्वादिप्रयोजनोत्पत्तौ कार्यम्, न शेषकालमिति भावः । तेषां बहुलेपत्वात् गृद्धिजनकत्वाच्च। एतत्सर्वं प्रासङ्गिकम् । प्रस्तुतं तु **लिप्तम्** । तत्र च दातुः सम्बन्धी हस्तः संसृष्टोऽसंसृष्टो वा भवति । येन च कृत्वा भिक्षां ददाति तदपि मात्रकं संसृष्टमसंसृष्टं वा । द्रव्यमपि सावशेषं निरवशेषं वा । एतेषां च त्रयाणां पदानां परस्परं संयोगतोऽष्टौ भङ्गाः । संसृष्टो हस्तः संसृष्टं मात्रं सावशेषं द्रव्यम् १ । संसृष्टो हस्तः संसृष्टं मात्रं निरवशेषं द्रव्यम् २ । संसृष्टो हस्तोऽसंसृष्टं मात्रं सावशेषं द्रव्यम् ३ । संसृष्टो हस्तोऽसंसृष्टं मात्रं निरवशेषं द्रव्यम् ४ । असंसृष्टो हस्तः संसृष्टं मात्रं सावशेषं द्रव्यम् ५ । असंसृष्टो हस्तः संसृष्टं मात्रं निरवशेषं द्रव्यम् ६ । असंसृष्टो हस्तोऽसंसृष्टं मात्रं सावशेषं द्रव्यम् ७ । असंसृष्टो हस्तोऽसंसृष्टं मात्रं निरवशेषं द्रव्यम् ८ । एतेषु चाष्टसु भङ्गेषु विषमेषु प्रथम—तृतीय—पञ्चम—सप्तमेषु कल्पते, सावशेषद्रव्ये सति पश्चात्कर्मासम्भवात्। समेषु पुनर्न कल्पते, निरवशेषे द्रव्ये सत्यवश्यं पश्चात्कर्मसम्भवात् ९ । **छर्दितं** नाम उज्झितं त्यक्तमिति यावत् । तच्च द्विधा—अनन्तरं परम्परं च । यदशनादौ दीयमाने पृथिव्यादिषु षड्जीवनिकायेषु परिशाटिर्निरन्तरं पतति तदनन्तरं छर्दितं, यत्र तु सान्तरं पतति तत्परम्परं छर्दितम् ।

छर्दितग्रहणे च षड्जीवनिकायविराधनादयो दोषाः सम्भवन्ति । तत्र च मधुबिन्दूदाहरणम् । तच्चेदं—चम्पानगर्यां धर्मघोषो मन्त्री । तस्य प्रियङ्गुनाम्नी भार्या । एकदोत्पन्नवैराग्यः स प्रवव्राज । कालेनाधीतैकाद—शाङ्गादिश्रुत एकाकिविहारप्रतिमाप्रतिपन्नो वारत्तयपुरेऽभयसेनराजाऽमात्यवारत्तयगृहे भिक्षार्थं गतः । भूमौ स घृतक्षीरबिन्दुनिपातादगृहीतभिक्ष एव गतः । क्षीरबिन्दौ मक्षिकाः समागताः । ता दृष्ट्वा तत्र गृहकोलिकः । तदुपरि दुष्टमार्जारः । तं प्रति कुतश्चिदासन्नग्रामागतराजपुत्रश्वा, तं प्रति वास्तव्यराजपुत्रश्वा । ततश्च शुनोः परस्परं युद्धे जायमाने तत् स्वामिनोर्युद्धमजनि । एतत्सर्वं गवाक्षस्थेन मन्त्रिणा दृष्टम् । ततश्च मन्त्रिणोत्तीर्य वारितौ श्वप्रभू । मन्त्री चिन्तयति—अत एव मुनिना भिक्षा न गृहीता । सञ्जातजातिस्मृतिर्दीक्षां लात्वा वारत्तयमुनिः सुंसुमारपुरे गत्वा देवकुले प्रतिमया स्थितः। इतश्च तत्र धुन्धुमारराजपुत्रीमङ्गारवतीं चण्डप्रद्योतो याचते । राजा न दत्ते । चण्डप्रद्योतेन पुरं वेष्टितम्। नैमित्तिकश्च श्रुतिं विलोकयन् रात्रौ बालकानि भापयति । तानि तं दृष्टवा यत्र देवकुले वारत्तकमुनिः प्रतिमया स्थितः तत्र गच्छन्ति । सहसा **'मा भैष्ट'** इति साधुनोक्ते नैमित्तिको पृष्टः सन् राज्ञे वक्ति तव जयोऽस्ति । राज्ञा युद्धं कृतं । चण्डप्रद्योतो बद्धः पुनः सत्कार्य सन्मान्य पुत्री दत्ता । चण्डप्रद्योतः कियन्ति दिनानि स्वपुरे स्थापितः । ततश्चण्डप्रद्योतेन बलाल्पं दृष्ट्वा सा पृष्टा कथमहं बद्धः ? तयोक्तं मुनिप्रोक्तशकुनबलेन । ततश्चण्डप्रद्योतेन 'हे नैमित्तिक साधो ! तुभ्यं नम' इत्युपहासे कृते वारत्तकमुनिराप्रव्रज्यादिनादतीचारमपश्यन् बालव्यतिकरं स्मृत्वा प्रतिक्रम्य मुक्तिं गत इति १० । एते दश ग्रहणैषणा दोषा भवन्ति । अथ ग्रासैषणादोषास्ते च पञ्च । यदुक्तम् —

**'संजोअणा पमाणे इंगाले धूमऽकारणे पढम'** ' त्ति । गाथापूर्वार्द्धम् । तत्र पूर्वं **संयोजना** सा च द्विधा—बाह्या अभ्यन्तरा च । तत्र वसतेर्बहिरेव भिक्षामटन् साधू रसगृद्ध्या दुग्धदध्योदनादीनां द्रव्याणामनुकूलद्रव्यैः सह संयोजनं रसविशेषोत्पादनाय यत्करोति सा बाह्या संयोजना । अभ्यन्तरा पुनर्यद्वसतावागत्य भोजनवेलायां संयोजयति । सा च त्रेधा—पात्रे कवले वदने च । तत्र यद् द्रव्यं यस्य रसविशेषाधायि तत्तेन सह पात्रे रसगृद्ध्या संयोजयति । यथा सुकुमारिकादिकं खण्डादिना सह । एषा पात्रेऽभ्यन्तरा संयोजना । यदा तु हस्तगतमेव कवलतयोत्पाटितं सुकुमारिकादिचूर्णं खण्डादिना सह संयोजयति तदा कवले । यदा पुनर्वदने कवलं प्रक्षिप्य ततः शालनकं प्रक्षिपति यद्वा मण्डकादिकं पूर्वं प्रक्षिप्य पश्चात् गुडादिकं प्रक्षिपति तदा मुखे । रसगृद्ध्या च बाह्यद्रव्याणां संयोजनां कुर्वन्नात्मनो ज्ञानावरणीयादिकर्मपुद्गलसमूहैः सह संयोजनां करोतीति निषिद्धा संयोजना । वर्द्धिष्णुघृतादिनिगमनार्थं संयोगोऽनुज्ञातस्तीर्थकृदादिभिः । तत्परिष्ठापने पश्चादपि कीटिकादिबहुसत्त्वोपघातसम्भवेन बृहत्तरप्रायश्चित्तसम्भवात् । एवं ग्लानाद्यर्थमपि संयोजना न दुष्टा । यदुक्तम् —

**'रसहेउं संजोगो पडिसिद्धो कप्पए गिलाणट्ठा । जस्स व अभत्तछंदो सुहोचिओऽभाविओ जो य' ।।**
**(पिं०नि० ६७७)**

पिण्डाधिकाराच्च पिण्डविषयैवैषा संयोजनाऽभिहिता । एवमुपकरणविषयाऽपि साऽवगन्तव्या १। **अथातिप्रमाणदोषः** । तत्र साधोर्यावन्मात्रेण द्वात्रिंशत्कवलादिप्रमाणेनाहारेण भुक्तेन धृतिबल–संयमयोगा न हीयन्ते तावन्मात्रमाहारप्रमाणं भोजने विज्ञेयम् । कुकुड्यण्डकप्रमाणकवलापेक्षं पुनरेवमाहारमानमभिधीयते —

**'बत्तीसं किर कवला आहारो कुच्छिपूरओ भणिओ । पुरिसस्स महिलियाए अट्ठावीसं भवे कवला' ।।**
**(पिं०नि० ६७८)**

उदरभागापेक्षं त्वेवम् —

**'अद्धमसणस्स सवंजणस्स कुज्जा दवस्स दो भाए । वायपविआरणट्ठा छब्भागं ऊणगं कुज्जा' ।।**
**(पिं०नि० ६८६)**

प्रकामनिकामप्रणीतभक्तपानातिबह्वाहारातिबहुवारभोजनादौ च प्रमाणातिक्रमदोषः स्यात् । यदुक्तम् —

**'पगामं च निगामं च पणीअं भत्तपाणमाहरे । अइबहुअं अइबहुसो पमाणदोसो मुणेयव्वो' ।।**
**(पिं०नि० ६८०)**

तत्र द्वात्रिंशदादिकवलेभ्यः परतो भुञ्जानस्य प्रकामभोजनम् । तदेव च प्रत्यहं क्रियमाणं निकाम–भोजनम् । गलत्स्नेहं भोजनं प्रणीतम् । अतिशयेन निजप्रमाणातिरेकेण बहु अतिबहु । त्रिभ्यो वारेभ्यः परतो भोजनमतिबहुशः । अतिप्रमाणे च भोजने वमनातिसारमरणादयो दोषा भवन्ति । अतः प्रमाणातिक्रमो न कर्त्तव्यः प्रमाणयुक्तमेव च भोक्तव्यम् । तस्यैव गुणावहत्वात् । यदाह —

**'अप्पाहारस्स न इंदियाइं विसएसु संपवट्टंति । नेव किलिस्सइ तवसा रसिएसु न मुज्झए आवि' ।।**
**तथा —** **(पंचवस्तुक० १३९२)**

**'हिआहारा मिआहारा अप्पाहारा य जे नरा । न ते विज्जा तिगिच्छंति अप्पाणं ते तिगिच्छिगा' ।।**
**(पिं०नि० ६८४)**

२। **अङ्गारं** नाम यन्निर्दोषमप्याहारं भुञ्जानः तद्गतविशिष्टगन्धरसास्वादवशतो जाततद्विषयमूर्च्छः सन्नहो ! मृष्टमहो ! सुसम्भृतं सुस्निग्धं सुपक्वं सुरसमित्येवं प्रशंसति तद्भोजनमङ्गारम्, चरणेन्धनस्य प्रदीप्तरागाग्निना अङ्गारसन्निभत्वापादनात् । यदुक्तं —

**'तं होइ सइंगालं जं आहारेइ मुच्छिओ संतो'** । (पिं०नि० ६५५ पूर्वार्द्ध) ३ ।

**धूमं** नाम यन्निर्दोषमप्याहारं भुञ्जानः तद्गतविरूपरसगन्धास्वादतो जाततद्विषयद्वेषः सन्नहो ! विरूपं

कुथितमपक्वमसंस्कृतमलवणं चेति निन्दति तद्भोजनं धूमम् । द्वेषाग्निना चरणेन्धनस्य स **धूमोपमत्वकरणात्।** आह च— **'तं पुण होइ सधूमं जं आहारेइ निंदंतो'** ' । (पिं०नि० ६५५ उत्तरार्द्ध) ४। **अकारणं** नाम कारणाभावेऽप्याहारग्रहणम् । इह साधूनामाहारग्रहणकारणानि षट् भवन्ति । तानि चामूनि —

**'वेअणवेयावच्चे इरिअट्ठाए अ संजमट्ठाए । तह पाणवत्तिआए छट्ठं पुण धम्मचिंताए'** ' ।। (पिं०नि० ६९८, पंचवस्तुक० ३६५)

अस्या अर्थः—वेदना बुभुक्षारूपा पीडा तदुपशमनाय । यदुक्तं— **'नत्थि छुहाइ सरिसआ विअणा भुंजिज्ज तप्पसमणट्ठा'** । (पिं०नि० ६६३ पूर्वार्द्ध) तथा आचार्यादीनां **वैयावृत्यकरणाय** । यदाह— **'छाओ वेयावच्चं न तरइ काउं अओ भुंजे** । (पिं०नि० ६६३ उत्तरार्द्ध) तथा **ईर्यापथसंशोधनार्थम्** । बुभुक्षितो हि ध्यामललोचनत्वादित ईर्यापथं शोधयितुं न शक्नोति । तथा **संयमः** प्रत्युपेक्षणाप्रमार्जनादिलक्षणः **तदर्थं** तत्परिपालननिमित्तम् । **तथा प्राणप्रत्ययार्थं** प्राणधारणार्थम् । **षष्ठं पुनः धर्मचिन्तार्थं** सूत्रानुचिन्तनादिरूपधर्मध्यानाभिवृद्ध्यर्थं भुञ्जीतेति क्रियासम्बन्धः । षड्भिस्तु कारणैः साधुर्न भुञ्जीत । तानि चेमानि —

**'आयंके उवस्सग्गे तितिक्खया बंभचेरगुत्तीसु । पाणिदयातवहेउं सरीरवुच्छेयणट्ठाए'** ' ।। (पिं०नि० ७०२)

अस्या अर्थः—**आतङ्के** ज्वराजीर्णादावुत्पन्ने सति नाश्नीयात् । तथा **उपसर्गे** राजस्वजनादिकृते देवमनुष्यतिर्यक्कृते वा सञ्जाते सति **तितिक्षार्थमुपसर्गसहनार्थं** न भुञ्जीत । तथा **ब्रह्मचर्यगुप्तिष्वित्यत्र** षष्ठ्यर्थे सप्तमी । ततोऽयमर्थः—ब्रह्मचर्यगुप्तीनां परिपालनाय न जेमेत् । तथा **प्राणिदयाहेतोः** वर्षे वर्षति महिकायां वा पतन्त्यां प्राणिदयार्थं नाश्नीयात् । सूक्ष्ममण्डूक्यादिसंसक्तायां वा भूमौ प्राणिदयार्थमटनं परिहरन्न भुञ्जीतेति भावः । तथा **तपः** चतुर्थादिलक्षणं तद्धेतोः तत् करणनिमित्तं नाद्यात् । तथा शिष्य निष्पादनादिसकलकर्त्तव्यतानन्तरं पश्चिमकाले—पाश्चात्यवयसि संलेखनाकरणेन यावज्जीवान—शनप्रत्याख्यानकरणस्यात्मानं योग्यं कृत्वा **शरीरस्य व्यवच्छेदार्थं** भोजनं परिहरेत् नान्यथा । यतः शिष्यनिष्पादनाद्यभावे प्रथमे द्वितीये वा वयसि संलेखनामन्तरेण वा शरीरपरित्यागार्थमशनप्रत्याख्यानकरणे जिनाज्ञाभङ्गः । ततश्च यानि षडाहारग्रहणकारणान्यभिहितानि (तानि) विनापि बलरूपादिनिमित्तं रसगृद्ध्या वा य आहारो गृह्यते तदकारणं भोजनम् । तथा कारणानि यान्याहारग्रहणविषये प्रदर्शितानि तेषु समुत्पन्नेष्वप्याहाराग्रहणे दोषः । ननु आहाराग्रहणं तपोरूपं तपश्च परमपदप्रापणप्रवणकारणगणाग्रेसरम् । अतः कथं तस्मिन् विधीयमाने दोषसम्भवः ? भवानुबन्धिसावद्यव्यापारनिबन्धनत्वाद् दोषापत्तेः । सत्यम्, परं तपोऽपि जिनाज्ञयैव विधीयमानं सिद्धिनिबन्धनं सम्पद्यते । अन्यथा तु क्रियमाणं तदपि भवानुबन्ध्येव भवेत् । अतस्तस्मिन् तथाविधे दोषापत्तिरपि सम्भाव्यते इति ५ । इति पञ्च ग्रासैषणादोषाः । सर्वे मीलिताः

सप्तचत्वारिंशद् भवन्ति । इत्युक्तमाधाकर्मादिदोषस्वरूपम् । अथैतेषु षोडशोत्पादनादोषाणां (चतुर्णां) ग्रासैषणादोषाणां च साधुप्रभवत्वात् तेषु न श्राद्धानां प्रायश्चित्तसम्भवः । षोडशोद्गमदोषेषु गृहस्थप्रभवत्वात् सर्वेषु एषणादोषाणां तूभयप्रभवत्वाद् येषु श्राद्धानां प्रायश्चित्तसम्भवो यथायोगं तेषु तेषु सङ्क्षेपेण प्रायश्चित्तमतिदिशति —

**गुरुग जईणमगाढे दिंते कम्माइ लहुग मीसाई ।**
**अज्झोयराइ गुरुगो लहु उद्दिसिए पणग ठविए ।।५९।।**

व्याख्या— **'गुरूग जइणमगाढे दिंते कम्माइ'** त्ति । **यतीनामगाढे** तथाविधग्लानादिगाढकार्याभावे **आधाकर्म्मादिगुणे** गुणवदुपचारादाधाकर्मादिदोषवदन्नपानादि **ददानस्य** श्राद्धस्य **चतुर्गुरु** प्रायश्चित्तं भवतीति । एवमग्रेऽपि भावना कार्या । **अत्रादिशब्दात्** कर्मसमुद्देशाद्यौद्देशिकभेदत्रयम् , पाखण्डिमिश्र—जातयतिमिश्रजातरूपमिश्रजातान्त्यभेदद्वयम्, बादरप्राभृतिका, सप्रत्यपायपरग्रामाभ्याहृतम्, अचित्तगुरुद्रव्यपिहितम्, अनन्तकायानन्तरनिक्षिप्तपिहितसंहृतानि तथा दायकदोषमाश्रित्य प्रगलत्पादुकारूढौ, द्वित्रिचतुरिन्द्रियानन्तकायोपद्रवं कुर्वाणा, पञ्चेन्द्रियोपद्रवं कुर्वाणायाः शास्त्रान्तरे षड्लघुकस्योक्तत्वात् पञ्चेन्द्रियगाढपरितापं कुर्वाणा च, सचित्तानन्तकायोन्मिश्रम्, अनन्तकायाऽपरिणतम्, अनन्तकायनिरन्तरछर्दितं च गृह्यते । ततः कर्मोद्देशादिदोषवदन्नपानाद्यपि **ददानस्य** श्राद्धस्य **चतुर्गुरु** प्रायश्चित्तं भवतीति भावः । तथा **'लहुग मीसाइ'** त्ति । मिश्रजातेऽन्त्यभेदद्वये चतुर्गुरुप्रायश्चित्तस्योक्तत्वात् शेषयावदर्थिक**मिश्रजातादि**दोषवदन्नपानादि **ददानस्य** श्राद्धस्य **चतुर्लघु** प्रायश्चित्तं भवति। **अत्राप्यादिशब्देन** कर्मोद्देशम् , प्रकाशकरणरूपप्रादुष्करणान्त्यभेदम् क्रीताऽऽद्यभेदत्रयम्, लौकिकप्रामित्यपरावर्त्तिते, निष्प्रत्यपायपरग्रामाभ्याहृतम्, लिप्तोद्भिन्नम्, कपाटोद्भिन्नम्, उत्कृष्टमालापहृतम्, त्रिविधमप्याच्छेद्यम् , त्रिविधमप्यनिसृष्टम्, निर्मिश्रकर्दमम्रक्षितम्, अप्कायम्रक्षितभेदौ पुरःकर्मपश्चात्कर्मणी, गर्हिताचित्तम्रक्षितम्, अगर्हितसंसक्ताचितम्रक्षितम्, तेजोवायुप्रत्येकवनस्पतित्रसकायनिरन्तरनिक्षिप्तपिहितसंहृतोन्मिश्राणि तथा दायकदोषमाश्रित्य स्थविरादय आद्याः सप्तविंशतिर्दायकाः, पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनामुपद्रवं कुर्वाणा, द्वित्रिचतुरिन्द्रियानन्तवनस्पतीनां गाढपरितापं कुर्वाणा, पञ्चेन्द्रियस्यागाढपरितापं कुर्वाणा दात्री च, पृथिव्यादिष्वनन्तरछर्दितं च गृह्यन्ते । तथा— **'अज्झोयराइ गुरूगो'** त्ति । अध्यवपूरकाद्यभेदे लघुमासस्याभिधास्यमानत्वादन्त्यभेदद्वयं ग्राह्यम् । ततोऽ**ध्यवपूरकान्त्यभेदद्वयादि**दोषवदन्नपानादि ददानस्य श्राद्धस्य **गुरुकं** गुरुमासः प्रायश्चित्तं भवति । अत्र पुनरादिशब्दतश्चतुर्विधं कृतौद्देशिकम्, मध्यमं मालापहृतम्,

अनन्तकायपरम्परनिक्षिप्त—पिहित—संहृतोन्मिश्रानन्तकायनिरन्तरनिक्षिप्त—पिहित—संहृतानि, दायकदोषमाश्रित्य पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां गाढपरितापं कुर्वाणा द्वित्रिचतुरिन्द्रियानन्तवनस्पतीनामगाढपरितापं कुर्वाणा, पञ्चेन्द्रियाणां सङ्घट्टं कुर्वाणा, च मिश्रानन्तकायोन्मिश्रम् अनन्तकायपरम्परछर्दितम्, मिश्रानन्तकायनिरन्तरछर्दितम् च गृह्यन्ते । तथा **'लहु उद्दिसिए'** ' त्ति । कृतोद्देशकर्मोद्देशादिषु प्रागपि प्रायश्चित्तस्याभिहितत्वादत्रौद्देशिकशब्देनोद्दिष्टोद्देशाद्यौद्देशिकाद्यभेदचतुष्टयं गृह्यते । ततश्च **उद्दिष्टोद्देशादि—** भेदचतुष्टयदोषवदन्नपानादि ददानस्य श्राद्धस्य **लघुमासः** प्रायश्चित्तं भवतीति । अत्रोपलक्षणत्वादुप—करणपूतिः, चिरस्थापना, प्रादुष्करणाऽऽद्यभेदः प्रकटकरणरूपः, परभावक्रीतम्, स्वग्रामाभ्याहृतम्, दर्दरोद्भिन्नम्, जघन्यमालापहृतम्, यावदर्थिकमिश्ररूपोऽध्यवपूरकाद्यभेदः, सेटिकादिपृथ्वीकायम्रक्षितम्, उदकार्द्ररूपमप्कायम्रक्षितम्, प्रत्येकवनस्पतिम्रक्षितम्, पृथिव्यप्तेजोवायुप्रत्येकवनस्पतित्रसेषु परम्परनिक्षिप्त—पिहित—संहृतानि, मिश्रपृथिव्यप्तेजोवायुप्रत्येकवनस्पतित्रसेषु परम्परनिक्षिप्त—पिहित—संहृतानि, दायकदोषमाश्रित्य कर्त्तयन्ती, लोढयन्ती, पिञ्जयन्ती, विकीर्णयन्ती, पृथिव्यप्तेजोवा—युप्रत्येकवनस्पतीनामगाढपरितापं कुर्वाणा, द्वित्रिचतुरिन्द्रियानन्तकायवनस्पतीनां सङ्घट्टं कुर्वाणा च । मिश्रपृथिव्यप्तेजोवायुप्रत्येकवनस्पत्युन्मिश्रम्, मिश्रपृथिव्यप्तेजोवायुप्रत्येकवनस्पतिपरिणतम्, सचित्तपृथिव्यप्तेजोवायुप्रत्येकवनस्पतिषु परम्परछर्दितम्, मिश्रपृथिव्यप्तेजोवायुप्रत्येकवनस्पतिषु निरन्तरछर्दितं च गृह्यते । तथा **'पणग ठविए'** ' त्ति । चिरस्थापनायां प्राग् लघुमासस्योक्तत्वाद् अत्र स्थापनाशब्देनेत्वरस्थापना गृह्यते । तत **इत्वरस्थापनादोषवदन्नपानादि** ददानस्य श्राद्धस्य **पञ्चकं** भिन्नमासः प्रायश्चित्तं भवतीति । अत्राऽप्युपलक्षणत्वात् सूक्ष्मप्राभृतिका, सरजस्कम्रक्षितम्, सस्निग्धरूपमप्कायम्रक्षितम्, मिश्रपृथिव्यप्तेजोवायुप्रत्येकवनस्पतित्रसेषु परम्परनिक्षिप्तपिहितसंहृतानि, दायकदोषमाश्रित्य पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां सङ्घट्टं कुर्वाणा, प्रत्येकानन्तबीजोन्मिश्ररूपं बीजोन्मिश्रम्, प्रत्येकानन्तबीजाऽपरिणतरूपं बीजाऽपरिणतम्, मिश्रपृथिव्यप्तेजोवायुप्रत्येकवनस्पतिषु परम्परछर्दितम्, प्रत्येकानन्तबीजेषु निरन्तरपरम्परछर्दितम्, मिश्रानन्तकायपरम्परछर्दितं च गृह्यते । ततः सूक्ष्मप्राभृतिकादि—दोषवदन्नपानादि ददानस्य श्राद्धस्य **पञ्चकं** भिन्नमासः प्रायश्चित्तं भवतीति। तथा प्रथममेषणादोषं शङ्कितमाश्रित्य दायकः साधोरन्नपानादि ददानो यं यं दोषं शङ्कते प्रागुक्ततत्तद्दोषप्रायश्चितवान् भवति । तथाऽनेकद्वीन्द्रियाद्युपघातं कुर्वन्त्यास्तु दात्र्या यावतां द्वीन्द्रियादीनामुपघातः कृतः तावन्ति स्वप्रायश्चित्तानि भवन्ति ।

अयमर्थः—यद् यस्य द्वीन्द्रियादेरुपघातेऽत्र जीतकल्पे प्रायश्चित्तं भणितमस्ति तस्य स्वप्रायश्चित्त–मुच्यते । तच्चैकस्य द्वीन्द्रियादेरुपघाते एकं स्वप्रायश्चित्तं भवति । द्वयोरुपघाते द्वे स्वप्रायश्चित्ते भवतः । त्रयाणामुपघाते त्रीणि तानि भवन्ति । यावद्दशानामुपघाते दश स्वप्रायश्चित्तानि स्युः । ततः परमेकादशादिषु बहुष्वपि यावदसङ्ख्येयेष्वपि द्वीन्द्रियादिषूपहतेषु दशैव स्वप्रायश्चित्तानि भवन्तीति । यदुक्तं सामाचार्याम् —

**'एगाइदसंतेसु एगाइदसंतयं सपच्छित्तं । तेण परं दसगं चिय बहुएसु वि सगलविगलेसु'** ।।

**(जइजीयकप्पो १५६)**

अयमाधाकर्मादिषु प्रायश्चित्तविधिः **'गुरुग–जईणमगाढे'** इत्यादिगाथासंसूचितो यतिजीतकल्पोक्त–रीत्या ग्राहकसाध्वनुसारेणैव दायकस्यापि श्राद्धादेरुक्तोऽन्यत्र क्वापि तद्विधेः पृथगदर्शनादिति गाथार्थः ।।५९।।

अथ साधोः पार्श्वाल्लेखशालाद्यात्मीयकार्यकारणे श्राद्धस्य प्रायश्चित्तं पादोनगाथाद्वयेन निरूपयति—

**साहूहिं लेहसालं चिगिच्छ–चप्पुडिअ–रक्खडी–खडिअं ।**
**सिसुकीलण–घरकम्मं कयविक्कयमेसिमेहिं वा ।।६०।।**
**कंकणिअ–कंडगाई गणत्तिआहारपोअणाइ तहा ।**
**कारिंते पणकल्लं लहू तदब्भंगपयधुवणे ।।६१।।**

व्याख्या—**साधुभिर्लेखशालां** शिशुपाठनरूपां कारिते **'पणकल्ल'** मित्यस्य द्वितीयगाथातृतीय–पदवर्त्तिनः सर्वत्र योगात् यदि श्राद्धः कारयति तदा पञ्चकल्यं प्रायश्चित्तं भवति । एवं **'चिगिच्छ'** त्ति । **चिकित्सां** रोगप्रतीकारम् । **'चप्पुडिअ'** त्ति । चपुटिकाम् । **'रक्खडी'** त्ति । रक्षाटिकाम् । **'खडिअं'** ति । खटिकाम् । **'सिसुकीलणे'** त्ति । शिशुक्रीडनम् । **'घरकम्मं'** ति । **गृहकर्म** च धवलनचित्रकरणादि । एतानि सर्वाण्यपि श्राद्धो यदि साधुभिः कारयति तदा श्राद्धस्य **पञ्चकल्यं** प्रायश्चित्तं भवतीति । **'कयविक्कयमेसिमेहिं व'** त्ति । तथैतेषां साधूनां सम्बन्धिवस्तुनः **क्रयविक्रययोः करणे** । तथैतैर्वा साधुभिः स्वसम्बन्धिवस्तुनः **क्रयविक्रययोर्विधापने** च श्राद्धस्य **पञ्चकल्यं** प्रायश्चित्तं भवतीति प्रथमगाथाक्षरार्थः । **कङ्कणिका** कराभरणं **कंडगं** वलयं आदिशब्दादन्याभरणसमारचनादि । **'गणत्तिआहारपोअणाइ तह'** त्ति । **तथा गणेत्रिकाहारप्रोतनादि**, आदिशब्दादन्यदप्येवंविधं साधुजनानुचितं गृहकर्म गृहस्थः साधुभिर्यदि **कारयति** तदा गृहस्थस्य **पञ्चकल्यं** प्रायश्चित्तं भवतीति । तथा **'लहू तदब्भंगपयधुवणे'** त्ति । तेषां साधूनां श्राद्धेन **गात्राभ्यङ्गदाने पादधावने** च श्राद्धस्य **लघुमासः** प्रायश्चित्तं भवतीति द्वितीयगाथाक्षरार्थः ।।६०-६१।।

अथ कारणे पार्श्वस्थादीनामवन्दनेऽपि श्राद्धानां प्रायश्चित्तं भवतीत्येतत्प्रतिपादयति —

**उपन्नकारणंमि किइकम्मं जो न कुज्ज दुविहं पि ।**
**पासत्थाईआणं उग्घाया तस्स चत्तारि ।।६२।।**

(बृ०क० ४५४०)

व्याख्या—श्रीसङ्घगच्छादिकार्येऽनन्यसाध्ये **उत्पन्ने** सति **कृतिकर्म** वन्दनकं **यः** श्राद्धादिर्न **कुर्यात्** **द्विविधमपि** अभ्युत्थानवन्दनकरूपम् । केषाम् ? **पार्श्वस्थादीनां** पार्श्वस्थावसन्न—कुशील— संसक्त—यथाछन्दानां किं तस्य प्रायश्चित्तम् ? इत्याह— **'उग्घाया तस्स चत्तारि'** ' त्ति । **'उग्घाया नाम जं संतरं दाणं लघुमित्यर्थ'** इति निशीथचूर्णिवचनादुद्घाता लघवः **तस्य** श्राद्धस्य **चत्वारः** चतुर्लघुप्रायश्चित्तं भवतीति भावार्थः । अत्र किञ्चित् पार्श्वस्थादीनां स्वरूपमावश्यकान्तर्गतवन्दननिर्युक्त्यादिगाथाभिः स्पष्टीक्रियते —

**'सो पासत्थो दुविहो देसे सव्वे अ होइ नायव्वो । सव्वंमि नाणदंसणचरणाणं जो उ पासंमि'** ' ।।

(आ०नि० ११०७)

व्याख्या—**स पार्श्वस्थो द्विविधो** द्विप्रकारः तद्यथा—**देशे** देशतः **सर्वस्मिन्** सर्वतः । तत्राल्पवक्तव्यत्वात् सर्वत आह—**सव्वंमी,** त्यादि । **सर्वस्मिन्** । एष सर्वतः पार्श्वस्थः उच्यते इत्यर्थः । कः ? इत्याह— **ज्ञानम्** अभिनिबोधिकादि **दर्शनं** सम्यक्त्वं **चारित्रम्** आश्रवनिरोधः । **एतेषां यः पार्श्वे** तटे वर्त्तत इति वाक्यशेषः । ज्ञानादिषु नान्तर्गत इत्यर्थः । देशतः पार्श्वस्थमाह —

**'देसंमि य पासत्थो सिज्जायरभिहडरायपिंडं वा । नीयं च अग्गपिंडं भुंजइ निक्कारणं चेव'** ' ।।

(प्र०सा० १०५, आ०नि० ११०७)

व्याख्या— **'देसंमी'** ' ति । देश एष देशतः **पार्श्वस्थ** उच्यते । कः ? इत्याह—**यः शय्यातराभ्याहृत राजपिण्डमग्रपिण्डं च भुङ्क्ते निष्कारणमेव** । तथा —

**'कुलनिस्साए विहरइ ठवणकुलाणि अ अकारणे पविसइ । संखडिपलोयणाए गच्छइ तह संथवं कुणइ'** ' ।।

(आ०नि० ११०७)

व्याख्या—**कुलनिश्रया विहरति,** यानि कुलानि तस्याग्रे सम्यक्त्वं प्रतिपन्नानि तानि येषु ग्रामेषु नगरेषु वा वसन्ति तेषु गत्वा तेभ्य आहारादिकमुत्पादयतीत्यर्थः । तथा **अकारणे** कारणाभावेऽपि

**स्थापनाकुलानि प्रविशन्ति (प्रविशति)** । अथवा यानि लोके गर्हितानि कुलानि तानि स्थापितान्युच्यन्ते, तेषामपरिभोग्यतया जिनैः स्थापितत्वात् । तेभ्य आहारादिकमुत्पादयति । तथा **सड्ढ्ड्याः** सततमाहारलौल्यतः **प्रलोकनाय गच्छति** । तथा **संस्तवं** द्विविधं—मातापित्रादिसम्बन्धयोजनारूपं पूर्वसंस्तवं श्वश्र्वादिनात्रकयोजनारूपं पश्चात्संस्तवं च **करोति** । उक्तः पार्श्वस्थः । साम्प्रतमवसन्नमाह —

**'ओसन्नो वि अ दुविहो सव्वे देसे य तत्थ सव्वंमि । उडुबद्ध(अवबद्ध) पीढफलगो ठविअगभोई य मुणेयव्वो'** ।।
**(प्र०सा० १०६)**

व्याख्या—**अवसन्नोऽपि च द्विविधो ज्ञातव्यो सर्वतो देशतश्च** । **तत्र सर्वतो**ऽवसन्नो य **ऋतुबद्धपीठ–फलकः** ऋतुबद्धकालेऽपि वर्षाकालं विनैवेत्यर्थः पीटफलकसेवकः । **'अबद्धपीठफलगो'** इतिपाठे तु यः पक्षस्याभ्यन्तरे पीठफलकादीनां बन्धनानि मुक्त्वा प्रत्युपेक्षणं न करोति, यो वा नित्यावस्तृतसंस्तारकः सोऽबद्धपीठफलकः । तथा **स्थापितकभोजी** स्थापनादोषदुष्टप्राभृतिकाभोजी । देशावसन्नमाह —

**'आवस्सय–सज्झाए पडिलेहण–झाण–भिक्ख अभत्तट्ठे । आगमणे निग्गमणे ठाणे अ निसीअण तुयट्टे'** ।।
**(प्र०सा० १०७)**

व्याख्या—आवश्यकादिष्ववसीदन् देशतोऽवसन्न इत्योघतो गाथाक्षरयोजना । भावार्थस्त्वयं—**आवश्यकम**नियतकालं करोति, यदि वा हीनं—हीनकायोत्सर्गादिकरणात्। अतिरिक्तं वा अनुप्रेक्षार्थ—मधिकाधिककायोत्सर्गकरणात् । अथवा दैवसिके आवश्यके कर्त्तव्यं तद् रात्रिके करोति, रात्रिके कर्त्तव्यं दैवसिके । तथा **स्वाध्यायं** सूत्रपौरुषीलक्षणम् अर्थपौरुषीलक्षणं वा, कुरुध्वमिति गुरुणोक्ते गुरुसंमुखीभूय किञ्चिदनिष्टं जल्पित्वा करोति न करोति वा, सर्वथा विपरीतं करोति कालिकवेलायाम् उत्कालिकमुत्कालिकवेलायां कालिकं वा । तथा **प्रतिलेखनामपि** वस्त्रादीनामावर्त्तनादिभिरूनामतिरिक्तां वा विपरीतां वा दोषैर्वा संसक्तां करोति । तथा **ध्यानं** धर्मध्यानं शुक्लध्यानं वा यथाकालं न ध्यायति। तथा **भिक्षां** न हिण्डते । गुरुणा वा भिक्षां नियुक्तो गुरुसंमुखं किञ्चिदनिष्टं जल्पित्वा हिण्डते । तथा **भक्तार्थं** भक्तविषयं प्रयोजनं सम्यग् **न** करोति । किमुक्तं भवति—न मण्डल्यां समुद्दिशति । काकशृगालादिभक्षितं वा करोति । अन्ये तु व्याचक्षते **'अभत्तट्ठ'** त्ति **अभक्तार्थ**ग्रहणं सकलप्रत्याख्यानोपलक्षणम् । ततोऽयमर्थः—प्रत्याख्यानं न करोति, गुरुणा वा भणितो गुरुसंमुखं किञ्चिदनिष्टमुक्त्वा करोति । **आगमे नैषेधिकीं** न करोति **निर्गमने** आवश्यकीं च । **स्थाने** ऊर्ध्वस्थाने **निषीदने** उपवेशने **त्वग्वर्त्तने** शयने एतेषु क्रियमाणेषु न प्रत्युपेक्षणां करोति। नापि प्रमार्जनां करोति । अथवा प्रत्युपेक्षणप्रमार्जने दोषदुष्टे करोति । गतोऽवसन्नः । साम्प्रतं कुशीलमाह—

**'तिविहो होइ कुसीलो नाणे तह दंसणे चरित्ते य । एसो अवंदणिज्जो पण्णत्तो वीयरागेहिं'** ।।
**(प्र०सा० १०९)**

व्याख्या—**त्रिविधः** त्रिप्रकारो **भवति कुशीलः** । कथमित्याह—**ज्ञाने तथा दर्शने चारित्रे च** । एष कुशीलोऽ**वन्दनीयः प्रज्ञप्तो** भणितो **वीतरागैः** तीर्थकृद्भिः । प्रकारत्रयमेवाह—

**'नाणे नाणायारं जो उ विराहेइ कालमाईयं । दंसणे दंसणायारं चरणकुसीलो इमो होइ'** ' ।।

व्याख्या—यो **ज्ञानाचारं** कालादिकं **'काले विणए'** 'इत्यादिरूपं विराधयति स **ज्ञाने** ज्ञानकुशील उच्यते। **यस्तु दर्शनाचारं** निःशङ्कितत्वादिकं विराधयति स **दर्शने** दर्शनकुशीलः । **चरणकुशीलोऽयं** वक्ष्यमाणलक्षणो **भवति** । तमेवाह —

**'कोउअ भूईकम्मे पसिणापसिणे निमित्तमाजीवी । कक्ककुरुयाइ लक्खण उवजीवइ विज्जमंताई'** ' ।।

(प्र०सा० १११)

व्याख्या—**कौतुकं** नाम आश्चर्यम् । यथा मायाकारको मुखे गोलकान् प्रक्षिप्य कर्णेन निष्काशयति नासिकया वा । तथा मुखादग्निं निष्काशयतीत्यादि । अथवा परेषां सौभाग्यादिनिमित्तं यत् स्नपनादि क्रियते एतत्कौतुकम् । उक्तं च —

**'सोहग्गाइनिमित्तं परेसिं ण्हवणाइ कोउयं भणिय'** 'मिति (प्र०सा० ११२) । तथा **भूत्यादिकर्म** नाम यत् ज्वरितादीनाम—भिमन्त्रितेन क्षारादिना रक्षाकरणम्। **'जरियाइभूइदाणं भूईकम्मं विणिद्दिट्ठं'** इतिवचनात् । **प्रश्नाप्रश्नं** नाम यत् स्वप्नविद्यादिभिः शिष्टस्यान्येभ्यः कथनम् । उक्तं च —

**सुविणगविज्जाकहियं आइंखिणिघंटियाइकहिअं वा । जं सासइ अण्णेसिं पसिणापसिणं हवइ एअं ।।**

(प्र०सा० ११३)

निमित्तमतीतादिभावकथनम् । तथा आजीवो नाम आजीविका । स च जात्यादिभेदः सप्तप्रकारः । तदुक्तम्—

**'जाईकुले गणे अ कम्मे सिप्पे तवे सुए चेव । सत्तविहं आजीवं उवजीवइ जो कुसीलो उ'** ।।

तत्र **जात्यादयः** प्रागुक्तस्वरूपाः। **तपःश्रुते** प्रतीते । एनं सप्तविधमाजीवं य **उपजीवति** जीवनार्थमाश्रयते । तद्यथा — **जातिं कुलं** वात्मीयं लोकेभ्यः कथयति, येन जातिपूज्यतया कुलपूज्यतया वा भक्तपानादिकं प्रभूतं लभेयमिति । अनयैव बुद्ध्या मल्लगणादिभ्यो गणेभ्यो **गणविद्याकुशलत्वम्** , कर्मशिल्पकुशलेभ्यः **कर्मशिल्पकौशलं** कथयति । **तपस उपजीवना** तपः कृत्वा क्षपकोऽहमिति जनेभ्यः कथयति । **श्रुतस्योपजीवना** बहुश्रुतोऽहमिति जनेभ्यः कथयति । इति सप्तविध आजीवनाकुशलः। तथा **कल्को** नाम प्रसूत्यादिषु रोगेषु क्षारपातनमथवा आत्मनः शरीरस्य देशतः सर्वतो वा रोध्रादिभिरुद्वर्त्तनम् । तथा **कुरूका** देशतः सर्वतो वा शरीरस्य प्रक्षालनम् । **लक्षणं** पुरुषलक्षणादि, **विद्यामन्त्रौ** प्रसिद्धौ । **आदिशब्दान्मूलकर्मचूर्णादिपरिग्रहः** । एतानि य उपजीवति स चरणकुशीलो, निरूपितः कुशीलः । अधुना संसक्तप्ररूपणामाह—

**'गोभत्तालंदा विव बहुरूअ नड्डुव्व एलगो चेव । संसत्तो सो दुविहो असंकिलिट्ठो य इयरो वा'** '।।

व्याख्या—गोभक्तयुक्तोऽलिन्दो **गोभक्तालिन्दः** । अलिन्दो भाजनविशेषः स इव । किमुक्तं भवति— यथा अलिन्दे गोभक्तं—कुक्कुसा ओदनमवश्रावणमित्यादिसर्वमेकत्र मिलितं भवतीति संसक्त उच्यते। एवं यः पार्श्वस्थादिषु मिलितः पार्श्वस्थसदृशो भवति, संविग्नेषु मिलितः संविग्नसदृशः संसक्त इति । यथा वा नटो रङ्गभूमौ प्रविष्टः कथानुसारतस्तत्तद्रूपं करोति । एवं **बहुरूप नट इव** सोऽपि पार्श्वस्थादिमिलितः पार्श्वस्थादिरूपं भजते, संविग्नमिलितः संविग्नरूपमिति । यदि वा यथा—**एडको** लाक्षारसे निमग्नः सन् लोहितवर्णो भवति, गुलिकाकुण्डनिमग्नः सन् नीलवर्ण इत्यादि । **स च द्विविधो** द्विप्रकारः । तद्यथा—**असङ्क्लिष्ट इतरश्च** सङ्क्लिष्टः । तत्रासङ्क्लिष्टमाह —

**'पासत्थ अहाछंदे कुसील ओसन्न पण्ण एमेव । संसत्तो पियधम्मेसु चेव इणमो असंकिलिट्ठो'** '।।

(व्य०सू० ८८०)

व्याख्या—पार्श्वस्थे मिलितः **पार्श्वस्थः**, यथाछन्दे **यथाछन्दः** कुशीले **कुशीलः**, अवसन्नेऽ**वसन्नः**, संसक्ते **संसक्तः**, तथा प्रियधर्मसु मिलितः **प्रियधर्मा** । **एष असङ्क्लिष्टः** संसक्तो ज्ञातव्यः । सङ्क्लिष्टमाह—

**'पंचासवप्पवत्तो जो खलु तिहिं गारवेहिं पडिबद्धो । इत्थिगिहि संकिलिट्ठो संसत्तो सो उ नायव्वो'** '।।

(व्य०सू० ८८१, गु०वि० ३–९८)

व्याख्या—**यः खलु पञ्चसु आश्रवेषु** हिंसादिषु **प्रवृत्तः**, तथा **त्रिभिर्गारवै**र्ऋद्धिरससातलक्षणैः **प्रतिबद्धः**। तथा **स्त्रीषु गृहिषु** प्रतिबद्धः स **सङ्क्लिष्टः संसक्तो ज्ञातव्यः** । व्यावर्णितः संसक्तः । इदानीं यथाछन्दमाह —

**'उस्सुत्तमायरंतो उस्सुत्तं चेव पन्नवेमाणो । एसो य अहाछन्दो इच्छाछन्दो य एगट्ठा'** ' ।।

(व्य०सू० ८५१, गु०वि० ३–९९)

व्याख्या—सूत्रादूर्ध्व**मुत्सूत्रम्** । तदाचरन् प्रतिसेवमानः तदेव यः परेभ्यः **प्रज्ञापयन्** वर्त्तते । **एष यथाछन्दो**ऽभिधीयते । **इच्छाछन्द इत्येकार्थः** । यथाछन्द इच्छाछन्दश्चेति तस्य नामद्वयं भवतीत्यर्थः। उत्सूत्रमित्युक्तमत उत्सूत्रं व्याख्यानयति —

**'उस्सुत्तमणुवइट्ठं सच्छन्दविगप्पियं अणणुवाई । परतत्तिपवत्तो तिंतिणो अ एसो अहाछन्दो'** ' ।।

(व्य०सू० ८५२, गु०वि० ३–१००)

व्याख्या—उत्सूत्रं नाम यत्तीर्थकरादिभिरनुपदिष्टम् । तत्र या सूरिपरम्परागता सामाचारी । यथा—नागिला रजोहरणमूर्ध्वमुखं कृत्वा कायोत्सर्गं कुर्वन्ति । चारणानां वन्दनके **'कथमपी'** ' त्युच्यते इत्यादि। साऽप्यङ्गोपाङ्गेषु नोपदिष्टेति तामप्यनुपदिष्टां शङ्केत । ततोऽनुपदिष्टमाह । **स्वच्छन्देन** स्वाभिप्रायेण **विकल्पितं** स्वेच्छाकल्पितमित्यर्थः । अत **एवाननुपाति** सिद्धान्तेन सहाघटमानकम्। न केवलमुत्सूत्रमाचरन् प्रज्ञापयँश्च यथाछन्दः । किन्तु यः **परतप्तिषु** गृहस्थप्रयोजनेषु करणकारणानुमतिभिः **प्रवृत्तः परतप्तिप्रवृत्तः** । तथा **तिन्तिणो** नाम यः स्वल्पेऽपि केनचित् साधुनाऽपराद्धेऽनवरतं पुनः पुनः झषन्नास्ते । **अयमेवंरूपो यथाछन्दः** । तथा —

**'सच्छंदमइविगप्पिय किंची (चि) सुहसाय—विगइपडिबद्धो । तिहिं गारवेहिं मज्जइ तं जाणाही अहाछंदं'** ' ।।

(व्य०सू० ८५३, गु०वि० ३—१०१)

व्याख्या—**स्वच्छन्दमतिविकल्पितं किञ्चित्** तच्च लोकाय प्रज्ञापयति । ततः प्रज्ञापनगुणेन लोकाद् विकृतीर्लभते, ताश्च विकृतीः परिभुञ्जानः स्वसुखमासादयति । तेन च सुखास्वादनेन तत्रैव रतिमातिष्ठते । तथा चाह—**'सुहसाय'** ' सुखास्वादे **विकृतौ प्रतिबद्धः** । तथा तेन स्वच्छन्दमतिविकल्पितप्रज्ञापनेन लोकपूज्यो भवति । अभीष्टरसाँश्चाहारान् प्रतिलभते वसत्यादिकं च विशिष्टम् । ततः स आत्मनः सभ्येभ्यो बहुमन्यते । तथा चाह—**त्रिभिर्गारवैः** ऋद्धिरससातलक्षणै**र्माद्यति** । य एवम्भूतस्तं **यथाछन्दं जानीहीति** । उक्तं यथाच्छन्दस्वरूपम् । ततः उक्तं पार्श्वस्थादीनां स्वरूपमित्यलं प्रसङ्गेनेति गाथार्थः ।।६२।।

**कन्नाहल—संडविवाहमाइ लहुगा लहू ढिउल्लीणं ।**

**बलि—पिंड—सद्ध—बारसि—खण—नमणाइसु चउगुरुन्ने ।।६३।।**

व्याख्या—**कन्याफले** कन्याफलग्रहणे, **शण्डविवाहे**, आदिशब्दात्तरुरोपणबलिपिण्डश्राद्धादावपि **'लहुग'** ' त्ति । **लघुकाः** चतुर्लघुप्रायश्चित्तं भवतीत्यर्थः । तथा **'ढिउल्लीणं'** ' ति । **ढिउल्लिकानां** वस्त्र— खण्डनिर्मितपुत्तलिकानां तु विवाहे क्रीडार्थं वा करणे लघुमासः । मतान्तरेण त्वत्रापि चतुर्लघव एव । अत्र मतान्तरमाह—तथा **बलिविधाने**, नदीकुण्डादिषु पित्रादीनां **पिण्डप्रदाने, श्राद्धविधाने, द्वादशीभरणे, क्षणकरणे, नमने** महामात्रादिकुदेवताप्रणामकरणे, **आदिशब्दान्मिथ्यादृष्टितीर्थेषु** स्नानादिष्वपि च **'चउगुरु'** ' त्ति । **चतुर्गुरु** प्रायश्चित्तं भवतीत्य**न्ये** केचनाचार्याः प्रतिपादयन्तीति गाथाक्षरार्थः ।।६३।।

अथ जिनप्रतिमाशातनाविषयं प्रायश्चित्तं निरूपयति —

**पूअंतपडिअबिंबे सासंचलकुंपिआइसंघट्टे ।**
**लहु—गुरुमासो थुक्काइ अविहिउज्जालणाईसु ।।६४।।**

व्याख्या—**पूज्यमाने** अर्च्यमाने, उपलक्षणत्वात् स्नप्यमाने, स्थानात् स्थानान्तरं वा नीयमाने **बिम्बे** जिनप्रतिमारूपे प्रमादेन हस्तात्पतिते सति । तथा **श्वासाञ्चलकुम्पिकादिसङ्घट्टे** । **श्वास** आस्यनासिकाविनिर्गतः पवनः, **अञ्चलः** परिधानादिवस्त्रप्रान्तः, **कुम्पिका** वासकर्पूरादिभाजनविशेषः, **आदिशब्दात्कलशभृङ्गारधूपदहनपिङ्गानिकादीनां** परिग्रहः । ततस्तेषां **सङ्घट्टे** बिम्बस्य स्पर्शे लघुमासः । तथा **'गुरुमासो'** ' त्ति । गुरुमासः प्रायश्चित्तं भवति । कस्मिन् ? वदनोत्थनिष्ठ्यूतलवस्पर्शे, **आदिशब्दाच्चरणघट्टनादौ** । पुनः कस्मिन् ? **अविधिना जिनप्रतिमोद्योतने, आदिशब्दादधौतपोतिकया पूजनादौ** चेति गाथार्थः ।।६४।।

अथ देवगुर्वोराशातनायां सामान्येन यत्प्रायश्चित्तं भवति, गुरु—विषयायां चाशातनायां विभागतोऽपि यत् प्रायश्चित्तं स्यात्तदाह —

**सामण्णं दुसु वि गुरू तिविहं गुरुणो पयाइ—संघट्टे ।**
**लहु—गुरु—चउलहु पणगं गुरुसंथाराइ—संघट्टे ।।६५।।**

व्याख्या—**सामान्येन** जघन्यादिविवक्षामन्तरेण **'दुसु वि'** ' त्ति । **द्वयोरपि** देवगुर्वाशातनयोः कृतयो**र्गुरुमासः** प्रायश्चित्तं भवति । विभागतस्तु **गुरोः पादादिना सङ्घट्टे** जघन्याशातनायाम्, **आदिशब्दात्** श्लेष्मनिष्ठीवन—लवस्पर्शनादौ मध्यमाशातनायां, गुर्वादेशाकरणविपरीतकरणापकर्णनपरुषभाषणादावुत्कृष्टाशातनायां च क्रमेण त्रिविधं प्रायश्चित्तं भवति । किं तदित्याह — **'लहुगुरुचउलहु'** ' त्ति । **लघुमासगुरुमासचतुर्लघूनि**। तथाऽनाभोगादिना **गुरोः संस्तारकस्यादिशब्दाद्** गुरुपरिभोग्योपकरणाऽऽसनादेश्चरणादिना **सङ्घट्टे 'पणगं'** ' **भिन्नमासः** प्रायश्चित्तं भवतीति गाथार्थः ।।६५।।

अथ स्थापनाचार्यविषयं प्रायश्चित्तमाह —

**ठवणगुरुंमि अठविए ठविए अ कमा पयाइलग्गंमि ।**
**भिन्न—लहु पडणाइसु लहु—गुरु तह नासिए भिन्नं ।।६६।।**

व्याख्या—**स्थापनागुरावस्थापितेऽ**कृतमन्त्रन्यासे, **स्थापिते** कृतमन्त्रन्यासे **च पादादौ लग्ने सति क्रमेण भिन्नं लघुमासश्च**। तथा तयोर्हस्तात् स्थापनाचार्यस्थानाद्वा प्रमादेन **पातने आदिशब्दादवज्ञामोचनादौ क्रमेण**

**लघुमासगुरुमासौ । तथा नाशिते** स्थापनाचार्ये **भिन्नम्** । मतान्तरेण तु गुरुमासः । अप्रत्युपेक्षिते भिन्नम्, अप्रत्युपेक्षितस्थापनाचार्यपुरतोऽनुष्ठानकरणे लघुमासः, स्वाध्यायशतं वा केचित् प्रतिपादयन्तीति गाथार्थः ।।६६।।

अथ जिनप्रतिमाशातनाविशेषविषयं प्रायश्चित्तमाह —

**पडिमाइ भंगदाहे पलीवणाइसु पमायणाभोगा ।**
**पट्टिअ–पुत्थाईण वि नवकारणपुव्व लहुगाई ।।६७।।**

व्याख्या—**प्रदीपन** धाटिप्रपात—ग्रामभङ्गादिषु **प्रमादानाभोगाभ्यां** प्रतिमाया **भङ्गे दाहे** नाशने वा । तथा **पट्टिका पुस्तकादीनामपि** भङ्गादिषु **नवकारणपूर्वं** तानि प्रतिमादीनि नवानि कारयित्वेत्यर्थः । **'लहुगाई'** ' त्ति । **चतुर्लघुचतुर्गुरुषड्लघूनि** क्रमाद् भवन्ति । मतान्तरेण पुनः प्रतिमायाः प्रदीपनादौ ज्वलने नमस्कारलक्षम् । हस्ताद्यवयवभङ्गे तु नमस्कारदशसहस्रीति गाथार्थः ।।६७।।

अथ यतिद्रव्यपरिभोगे प्रायश्चित्तमाह —

**मुहपत्ति–आसणाइसु भिन्नं जलन्नाईसु गुरु लहुगाइ ।**
**जइदव्वभोगि इय पुण वत्थाइसु देवदव्वं वा ।।६८।।**

**(द्र०स० ५८)**

व्याख्या—**मुखवस्त्रिकाऽऽसनशयनादिषु**, अर्थाद् गुरुयतिसत्केषु परिभुक्तेषु **भिन्नम्** । तथा **'जलन्नाईसु'** ' त्ति । यतिसत्के **जले अन्ने**, आदिशब्दात् वस्त्रादौ कनकादौ च ।

**'धर्मलाभ इति प्रोक्ते दूरादुच्छ्रितपाणये । सूरये सिद्धसेनाय ददौ कोटिं नराधिपः'** ' ।।१।।

इत्यादिप्रकारेण केनापि साधुनिश्रया कृते लिङ्गिसत्के वा परिभुक्ते सति **'गुरुलहुगाइ'** त्ति । क्रमेण **गुरुमासश्चतुर्लघव आदिशब्दाच्चतुर्गुरवः षड्लघवश्च स्युः** । अयमर्थः—गुरुसत्के जले परिभुक्ते ५ी । अन्ने ४ वस्त्रादौ ४ी कनकादौ ६ प्रायश्चित्तानि भवन्ति । **यतिद्रव्यभोगे 'इय'** ' त्ति । एवं प्रकारः प्रायश्चित्तविधिरवगन्तव्यः । अत्रापि **पुनर्वस्त्रादौ देवद्रव्यवत्** वक्ष्यमाणदेवद्रव्यविषयप्रकारवत् ज्ञेयम् । अयमर्थः— यत्र गुरुद्रव्यं भुक्तं स्यात् तत्राऽन्यत्र वा साधुकार्ये वैद्याद्यर्थं बन्दिग्रहादिप्रत्यपायापगमाद्यर्थं वा तावन्मितवस्त्रादिप्रदानपूर्वमुक्तं प्रायश्चित्तं देयमिति गाथार्थः ।। ६८ ।।

अथ साधारणदेवद्रव्यादिविषयं प्रायश्चित्तमाह —

**साहारण–जिणदव्वं जं भुत्तं असण–वत्थ–कणगाई ।**
**तत्थन्नत्थ व दिन्ने चउलहु–चउगुरुअ–छल्लहुगा ।।६९।।**

**(द्र०स० ५९)**

व्याख्या—**साधारणद्रव्यं जिनद्रव्यं च यत्** यावन्मात्रं **भुक्तं** स्वकार्ये व्यापारितं स्यात् । किं तदित्याह—**अशनं** नैवेद्यादि **वस्त्रं** परिधापनिकादि **कनकादि** कनकरूप्यरूपकमौक्तिकादीनि । तस्मिँश्च तावन्मात्रे साधारणद्रव्ये देवद्रव्ये वा त्रिविधे जघन्यमध्यमोत्कृष्टरूपेऽशनादौ वस्त्रादौ कनकादौ च **तत्र** तस्मिन्नेव देवस्थाने चैत्यादौ **अन्यत्र वा** चैत्यादौ **दत्ते सति चतुर्लघुचतुर्गुरुषड्लघूनि** , प्रायश्चित्तानि यथाक्रमं भवन्ति । तस्मिन् तावन्मात्रे पुनरनर्पिते एतत्प्रायश्चित्ताङ्गीकरणेऽपि न शुद्धिरिति भावः । देवरथहारवणे पट्टिकापुस्तिकाकवलीजपमालानाशने क्वचिद् गुरुमासो दृश्यते । क्वचित्तु जपमालानिर्गमने एक कल्यम् । सम्यक्त्वविषयाः पञ्चाप्यतिचारा दर्शनाचारातिचारेष्वेवान्तर्भूता इति न तेषां पृथक् प्रायश्चित्तं प्रतिपादितमिति गाथार्थः ।।६९।।

उक्तं दर्शनाचारातिचारविषयं प्रायश्चित्तम् । सम्प्रति चारित्राचारातिचारविषयप्रायश्चित्तप्रतिपिपादयिषया प्रथमं प्रथमाणुव्रतविषयं तदाह —

**पुढवाइ—घट्टणाऽगाढ गाढपीडा—वहे अकज्जंमि ।**
**भिन्नं लहु-गुरु लहुगा दस पुरओ सव्वेहि वि दसगं ।।७०।।**

व्याख्या—इह च निषिद्धस्याचरणे तावत् प्रायश्चित्तम् । गृहिणश्च सार्थिका स्थावरकायहिंसा न निषिद्धा, निरर्थिका पुनर्निषिद्धैव । यदुच्यते ग्रन्थान्तरे —

**'थूला सुहुमा जीवा संकप्पारंभओ अ ते दुविहा । सावराह निरवराहा साविक्खा चेव निरविक्खा'** ।।
**(गाथासहस्री ७०, रत्नसञ्चयः २३७)**

अस्या अक्षरगमनिका—इह प्राणिवधो द्विविधः—**स्थूलः** स्थूलजीवानां **सूक्ष्मः** सूक्ष्मजीवानाम् । तत्र **स्थूला** द्वीन्द्रियादयः **सूक्ष्माश्चे**केन्द्रियाः, न तु सूक्ष्मनामकर्मोदयवर्तिनः । तेषां उपघाताऽभावात् स्वयमायुः—क्षयेणैव मरणात् । तत्र गृहस्थानां स्थूलप्राणिवधान्निवृत्तिः न तु सूक्ष्मवधात् । पृथिवीजलादिषु सततमार—म्भप्रवृत्तत्वात् । विंशोपकाः १० । स्थूलप्राणिवधोऽपि द्विधा—**सङ्कल्पज आरम्भजश्च** । तत्र सङ्कल्पान्मारयाम्ये—नमिति मनःसङ्कल्पाज्जातः सङ्कल्पजः । आरम्भश्च कृष्याद्यारम्भप्रवृत्तस्य द्वीन्द्रियादिव्यापादनम् । तत्र श्राद्धानां सङ्कल्पजात् निवृत्तिरस्ति न पुनरारम्भजात् । अन्यथा शरीरकुटुम्बनिर्वाहाभावात् । विं० ५ । सङ्कल्पजोऽपि **द्विधा-सापराधो निरपराधश्च** । तत्र निरपराधान्निवृत्तिर्न सापराधात् । सापराधे तु गुरुलाघवचिन्तनं-यथा गुरुरपराधो लघुर्वा । विं० २ $^1/_2$ । सापराधेऽपि **सापेक्षनिरपेक्षक्रिययोः** सर्वत्र सापेक्षेणैव भवितव्यं न तु निरपेक्षेण तस्य दयापरिणामाभावात् । विं० १ $^1/_4$ एवं सर्वप्रकारैर्जीववधनिवृत्तेर्विंशतिविंशोपकः साधुः । सपादविंशोपकश्च श्राद्धो दयाव्रतमाश्रित्येत्यर्थः । **ततोऽकार्ये** कारणाभावे **पृथिव्यादीनां** पृथिव्यप्तेजोवायु—

प्रत्येकवनस्पतीनां मनाक् संस्पर्शनं—**सङ्घट्टनम्** । अत्राह—ननु पृथिव्यादीनां चतुर्णां घटते सङ्घट्टनम् । अप्कायस्य तु कथं सङ्घट्टनं सम्भवति ? तस्य द्रवरूपत्वेन स्पर्शमात्रेऽपि विनाशसम्भवात् । उच्यते—घटादिस्थस्याप्कायस्यापि मनाक् करचरणादिना चालने सङ्घट्टः सम्भवति । **पीडा** परितापनमुच्यते । तच्च द्विधा—**अगाढं गाढं** च । तत्र संमर्दनचालनाद्यैर्बहुतरं पीडोत्पादनम**गाढं**, बहुतमपीडोत्पादनं च **गाढम्** । **वध** उपद्रवः सर्वथा जीवविनाशः । स च पृथिव्यग्न्योरत्यन्तसम्मर्दनाद्यैरप्कायस्य तु वह्नितापन—दण्डाद्यभिघातनपातनपादादिक्षालनादिना । वायोः तालवृन्ताभिघातादिना । वनस्पतेः पत्रपुष्पाङ्कुरादित्रोट—नादिभिः । ततश्चैषां **पृथिव्यादीनां** पञ्चानामपि प्रत्येकं **सङ्घट्टने भिन्नमासः** । **अगाढपीडायां लघुमासः** । **गाढपीडायां गुरुमासः** । **वधे चतुर्लघु** । **'दस पुरओ'** **'सव्वेहि वि दसगं'** ति । **दशानां परतस्तु** सर्वेषामप्येकादशाद्यसङ्ख्येयपर्यन्तानां सङ्घट्टनादिषु **दशकमेव** स्वप्रायश्चित्तानां दीयते । तथा चोक्तं यतिजीतकल्पवृत्तौ —

**'एगाइ—दसंतेसु एगाइदसंतयं सपच्छित्तं । तेण परं दसगं चिय बहुएसु वि सगलविगलेसु'** ।।

**(जइजीयकप्पो १५६)**

अस्या अर्थः—**एकादिषु दशान्तेषु** पृथिव्यादिषु द्वीन्द्रियादिषु वोपहतेषु **एकादि—दशान्तं स्वप्रायश्चित्तं** भवति । यद्यस्य पृथिव्यादेर्द्वीन्द्रियादेर्वोपघातेऽत्र जीतकल्पे प्रायश्चित्तं भणितमस्ति, तत्तस्य स्वप्रायश्चित्त—मुच्यते । तदेकस्य पृथिव्यादेर्द्वीन्द्रियादेर्वा उपघाते एकं स्वप्रायश्चित्तं भवति । द्वयोर्द्वे । त्रयाणां त्रीणि । यावद् दशानामुपघाते दश । **'तेने'** ति । पञ्चम्यर्थत्वात्तृतीयायाः । ततः **परमे**कादशादिषु **बहुष्वपि** यावद् सङ्ख्येयेष्वपि **सकलविकलेषु** पञ्चेन्द्रियविकलेन्द्रियेषु उपलक्षणत्वात् पृथिव्यादिषु वोपहतेषु **दशकमेव**—दशैव स्वप्रायश्चित्तानि दातव्यानि भवन्तीत्यर्थः ।।७०।।

अथ विकलेन्द्रियानन्तकाय—पञ्चेन्द्रियविषयं प्रायश्चित्तमाह —

**विगलाणं ते सहसाणाभोगे वि लहु गुरु—लहुग—गुरुगा ।**
**पंचेंदिए पमाया गुरु – लहुअ – गुरुग – छलहुगा ।।७१।।**

व्याख्या—**द्वित्रिचतुरिन्द्रियानन्तकायानां** **'सहसाणाभोगे वि'** त्ति । **अपिशब्दस्य** वाऽर्थत्वात् **सहसाकारा—दनाभोगाद्वा** प्रत्येकं सङ्घट्टनाऽगाढपरिताप—गाढपरितापोपद्रवेषु यथासङ्ख्यं **'लहु—गुरु—लहुग गुरुग'** त्ति । लघुमासगुरुमासचतुर्लघुचतुर्गुरूणि स्युः । अत्र **पञ्चेन्द्रियाणां प्रमादान्निष्प्रयोजनं** सङ्घट्टादिषु जातेषु **'गुरु—लहुअ—गुरुअ—छलहुग'** त्ति । यथाक्रमं **गुरुमास—चतुर्लघु—चतुर्गुरु—षड्लघूनि** प्रायश्चित्तानि स्युः । अत्र पञ्चेन्द्रियसङ्घट्टः तदहर्जातमूषकगृहकोलिकादिविषयो द्रष्टव्य इति गाथार्थः ।।७१।।

पुनरपि प्रथमाणुव्रतविषयमेव विशेषमाह —

**अगलिअजलछड्डण–ण्हाण–पाण धुअ–ताव–घट्टणाइ छगुरुअं ।**
**पणकल्लं संखारय कोलिअ – कीडिअघराईसु ।।७२।।**

व्याख्या–**अगलितजलस्य छर्दने** त्यागे **स्नाने** तेनैव शरीरस्य प्रक्षालने **'पाण'** त्ति । तस्यैव **पाने**, **धावने** तेनैव वस्त्रादिक्षालने, **तापने** तस्यैवोष्णीकरणे । **आदिशब्दादु**त्कालनाधिश्रयणादिदानेऽपि च **षड्गुरुकं** प्रायश्चित्तं भवति । तथा **'पणकल्लं'** ति । पञ्चाभक्तार्थाः पञ्चाचाम्लानि पञ्चैकाशनानि पञ्च पूर्वार्द्धाः पञ्च निर्विकृतिकानीत्येवंरूपं **पञ्चकल्यं** प्रायश्चित्तं भवति । केषु ? **'संखारये'** त्यादि । **'व्याख्यानतो विशेषार्थप्रतिपत्तिर्भवती'** ति न्यायात् **सड्ढारकस्य** शोषे त्यागे वा, **कोलिकानां** लूतानां **कीटिकानामु**पदेहिकादीनां च **गृहादिषु** भग्नेषु, **आदिशब्दाद्** शुषिरवृत्यादिषु स्नानजलोष्णाव–श्रावणादिवाहनेऽशोधितेन्धनस्याग्नौ क्षेपे शिरसि कङ्कतकक्षेपेऽपि च भूरिजीवविराधनासम्भवात् पञ्चकल्यं प्रायश्चित्तं भवतीत्यर्थः । केचित्तु चतुर्गुरुकमेवाहुः । अन्ये चैतेषु पर्युषितगोमयस्थापनादिषु च षड्लघुकमेव । अन्ये पर्युषित (मेवं) गोमयस्थापने, पुञ्जे वह्निदाने, त्रससंसक्तधान्यदलने, मत्कुणितशयनीयाद्यातपमोचने, चटकमालकभङ्गे, बहुवारं सूतिभवने तत्करणे चेति । निद्धंधसव्यापारत्वेन बहुजीवविराधनातश्च पञ्चकल्यम् । तथा सूतिकायां द्वी घरटिकोदूखलचूल्हिकादीनामप्रमार्जने भिन्नमासं प्रायश्चित्तं प्रतिपादयन्तीति गाथार्थः ।।७२।।

अथ बहूनां द्वीन्द्रियादीनामुपद्रवे प्रकारान्तरेण प्रायश्चित्तविधिमाह —

**दु–ति–चउ–पणकल्ला वा बहूसु दु–ति–चउ–पणिंदिएसु कमा ।**
**दसवारउवरि दस पण (? पण्णास) कल्ल संकप्प दप्पे अ ।।७३।।**

व्याख्या–वाशब्दः प्रकारान्तरवाचकः । ततः प्रागेकेन्द्रियविषयप्रायश्चित्तप्रतिपादनावसरे **'दस पुरओ सव्वेहि वि दसग'** मित्यत्र सर्वेषामपि पृथिव्यादीनां वक्ष्यमाणद्वीन्द्रियादीनां चैकाद्यसङ्ख्येयपर्यन्तानां सङ्घट्टादिषु दशकमेव स्वप्रायश्चित्तानां दीयत इत्यादिनैकः प्रकारः प्रतिपादितः तदपेक्षयाऽयमन्यः प्रकार इत्यर्थः । ततश्च समुदायेन **बहुषु द्वित्रिचतुरिन्द्रियेषूपहतेषु क्रमेण द्वित्रिचतुःपञ्चकल्यानि** प्रदेयानि । अयमर्थः द्वीन्द्रियेषु बहुषूपहतेषु द्वे कल्ये । त्रीन्द्रियेषु त्रीणि कल्यानीत्यादि । अथ सङ्कल्पदर्पाभ्यां द्वीन्द्रियादीनामुपद्रवे विशेषमाह– **दशानां वाराणामुपरि** एतेषु द्वित्रिचतुःपञ्चेन्द्रियेषु जीवेषूपहतेषु **सङ्कल्पतो दश कल्यानि** क्षपणविंशतिः । **दर्पतः** पुनः **पञ्चाशत्कल्यानि** क्षपणशतमित्यर्थः । अत्र **सङ्कल्पः** प्रयोजनं **दर्पो** धावनवल्गनवरण्डाद्युल्ल–ङ्घनमल्लयुद्धादिः । अत्र केचिच्चैवं वदन्ति–एकस्मिन् द्वीन्द्रिये उपहते क्षपणं, बहुषु क्षपणचतुष्कम् । त्रीन्द्रिये क्षपणत्रयं, बहुषु क्षपणषट्कम् । चतुरिन्द्रिये क्षपणचतुष्कं, बहुषु क्षपणाष्टकम् । पञ्चेन्द्रिये दर्पेण

प्रहारदाने गुरु, पीडने चतुर्लघु, मूर्च्छायां चतुर्गुरु, हस्तपादादिभङ्गे षड्लघु, उपद्रवे क्षपणदशकम् । दर्पेण पञ्चेन्द्रियोपद्रवे पञ्चकल्यम् । प्रमादेन पञ्चेन्द्रियोपद्रवे क्षपणपञ्चकम् । आकुट्ट्या क्षपणविंशतिः । कल्पेन षड्लघु । दर्पादिस्वरूपं त्विदम् —

**'आउट्टिआ उविच्चा दप्पो पुण होइ वग्गणाईओ । कंदप्पाइ पमाओ कप्पो पुण कारणे करणं' ।।**

**(यतिलक्षणसमुच्चय १००)**

एतस्या भावार्थः—**'संकप्प वग्गणाई'** त्यादिसप्तदशोत्तरशतगाथाव्याख्यावसरे सविस्तरं प्रतिपादयिष्यतीतीह नोच्यते इति गाथार्थः ।।७३।।

अथ यथोक्तप्रायश्चित्तकरणासामर्थ्ये तत्करणे प्रकारान्तरमाह —

**पणकल्लं पच्छित्तं अतरंते जहकमेण काउं जे ।**
**कारिंति दस चउत्थे दुगुणायंबिलतवे चेव ।।७४।।**

**(व्य०सू० ४१८५, जि०भा० ३०४)**

व्याख्या—कल्यं नि०पु०ए०आं०उ० रूपम् । तच्च पञ्चगुणं **पञ्चकल्यं प्रायश्चित्तं** पञ्चाभक्तार्थाः, पञ्चाचाम्लानि, पञ्चैकाशनानि, पञ्च पूर्वार्द्धाः, पञ्च निर्विकृतिकानीत्येवंरूपं बहुपञ्चेन्द्रियोपद्रवाद्यापन्नं **'अतरंते'** त्ति । आलोचकान् पुरुषानतरतो **यथाक्रमेण** निर्विकृत्यादि यथोक्तप्रकारेण **कर्त्तुम**शक्नुवतो **'जे'** इति पादपूरणे **'अजेराः पादपूरणे'** इतिवचनात् । **कारयन्ति दश चतुर्थान्** गीतार्था इतिशेषः । अयमर्थः— एतत् पञ्चकल्यं तपो यथोक्तक्रमेण कर्त्तुमशक्नुवतः पुरुषान् दश चतुर्थान् कारयन्तीति । तथा **'चेव'** त्ति । **चैव**शब्दस्य विकल्पार्थत्वात् **द्विगुणाचाम्लतपो** वा कारयन्ति । दशचतुर्थकरणासामर्थ्ये विंशतिमाचाम्लानि कारयन्तीति भावः ।।७४।।

तेषामपि करणासामर्थ्ये किं विधेयम् ? इत्याह —

**एगासण—पुरिमड्ढा निव्विइगा दुगुणदुगुण पत्तेयं ।**
**पत्तेयासहदाणं कारिंति व संनिगासं तु ।।७५।।**

**(व्य०सू० ४१८६, जि०भा० ३०५)**

व्याख्या—**एकाशनकानि पुरिमार्द्धानि निर्विकृतिकानि 'दुगुणदुगुण पत्तेयं'** ति । प्रत्येकं स्थानद्विगुणवृद्ध्या द्विगुणानि द्विगुणानि गीतार्थाः प्राक्तनप्राक्तनकरणासामर्थ्यवतः पुरुषान् कारयन्ति । अयमर्थः— विंशत्याचाम्लकरणाशक्तौ चत्वारिंशदेकाशनानि, तदशक्तावशीतिं पूर्वार्द्धान्, तदशक्तावपि षष्टिशतं निर्विकृतिकानां वा कारयन्ति । **'पत्तेयासहदाणं'** ति । एतत् पञ्चसु कल्येषु एकैक कल्यं प्रत्येकमनवस्थित्या कर्त्तुमसहस्याऽशक्तस्यालोचकस्य दानमुक्तम् । **'कारिंति व संनिगासं तु'** त्ति। तुः पुनरर्थे वा शब्दोऽथवार्थे।

अथवा पुनरयमन्यः प्रकारः—**सन्निकाशं** सन्निभं वा कारयन्ति । इयमत्र भावना—श्राद्धादिर्यत्र पञ्चकल्याण-मापन्नः तन्मध्यादाद्यं द्वितीयं तृतीयं वा यथाशक्त्यैकतरं द्वयादीनि वा यथोक्तप्रकारेण वहति, शेषमाचाम्लादिभिः प्रवेशयन्तीतिगाथाक्षरार्थः ।।७५।।

पुनरन्यथानुग्रहप्रकारमाह —

**चउ–तिग–दुगकल्लाणे एगं कल्लाणगं व कारिंति ।**
**जो जं तरइ तं तस्स दिंति असहस्स झोसंति ।।७६।।**

**(व्य०सू० ४१८७)**

व्याख्या—यः कश्चिदालोचकः पञ्चकल्यतप आपन्नः पञ्च कल्यानि कर्त्तुं न शक्नोति, तं **चत्वारि** कल्यानि कारयन्ति । तथाप्यशक्तौ **कल्यत्रिकं** कल्य**द्विकमेककल्याणकं वा कारयन्ति** । किं बहूच्यते । **यः** पुमान् **यद्** यादृशं यावन्मात्रं वा तप**स्तरति** कर्त्तुं शक्नोति, **तस्याशक्तस्य** प्रभूतस्याप्यापत्तौ **तत्ता**दृशं तावन्मात्रमेव च तपो **ददति**, गीतार्था इति गम्यते । यावन्मात्रं स्वशक्तिसद्भावं प्रवृत्तत्वेन तावत्तपसाऽपि तस्य शुद्धिसम्भवादन्यथा कदाचित्ततो गाढबाधासम्भवेन मनोविपरिणत्यादि-सद्भावात् । यस्तदपि **कर्त्तुं** न शक्नोति तस्य किं कर्त्तव्यम् ? इत्याह— **'असहस्स झोसिंति'** ' त्ति । **असहस्यै**ककल्याणकादितपःकरणेऽप्यसमर्थस्य सर्वं **झोषयित्वा** ह्रासयित्वा एकमभक्तार्थं ददति । अथवैकमाचाम्लं यावन्निर्विकृतिकं वा ददति । तदपि कर्त्तुमशक्तस्य न किमपि दद्यात् । मिथ्यादुष्कृतेनैव तस्य शुद्धिरादेश्येत्यर्थः । तथापि स शुद्धो भावशुद्ध्या प्रवृत्तत्वादिति ।।७६।।

एतदेव दृढयन्नाह —

**एवं सदयं दिज्जइ जेणं से संजमो थिरो होइ ।**
**न य सव्वहा न दिज्जइ अणवत्थपसंगदोसाओ ।।७७।।**

**(व्य०सू० ४१८८)**

व्याख्या— **'एव'** ' मिति । उक्तप्रकारेणालोचकस्य शक्तिमपेक्ष्य **सदयं** सानुकम्पं तपो दीयते **येन** तपसा प्रदत्तेन **'से'** ' त्ति । **तस्य संयमः स्थिरो भवति** संयमस्थैर्यं भवतीत्यर्थः । **न च सर्वथा न दीयते**ऽपि त्वेवं पूर्वोक्तप्रकारेण स्तोकं स्तोकतरं वा दीयते एवेति । कस्मादित्याह— **'अणवत्थे'** ' त्यादि । **अनवस्था–प्रसङ्गदोषात्** । यद्येवमेव शुद्धिर्भवति तर्हि पुनरप्येतत् प्रतिसेवामीत्य**नवस्थाप्रसङ्गः** । यद्वा—तद्दृष्ट्वाऽन्यस्यापि तत्पापकरणे निःशङ्कत्वं स्यादिति । भिन्न एव वा प्रसङ्गनामा दोषः । उपलक्षणत्वादाज्ञाभङ्गादयो भूयांसो दोषाः सम्भवेयुरिति गाथाक्षरार्थः ।।७७।।

अथ द्वितीयाणुव्रतविषयं प्रायश्चित्तमाह —

**गुरुमाइतिविहमोसे भिन्नं जाराइदोसदाणिन्ने ।**
**डाहणि (? डाइणि)–निहिलाहे लह गुरुगा चोरे जणसमक्खं ।।७८।।**

व्याख्या–इह किल द्रव्यक्षेत्रकालभावानाश्रित्योत्कृष्टादिभेदस्त्रिविधो मृषावादः । यदुक्तं **'निशीथचूर्णौ–मुसावाओ जाव राईभोअणम्, एएसिं इक्किकं तिविहम्, ते य इमे तिगभेदा–उक्कोसो मज्झिमो जहण्णो य । दव्वाइया चउहत्ति । उक्कोसमुसावाओ चउव्विहो-दव्वओ खेत्तओ कालओ भावओ । मज्झिमो वि चउव्विहो दव्वाइ । एवं जहण्णो वि चउव्विहो । एवं अदत्तादाणं दुवालसभेअम् । मेहुणंपि परिग्गहो वि राईभोयणंपि दुवालसभेदम् । उक्कोसं पुण दव्वं एवं भवइ । बहुत्तओ सारओ वा मूल्लओ वा । एवं मज्झिमे वि तिन्नि भेया । जहण्णे वि तिन्नि भेया । उक्कोसे दव्वावलावे उक्कोसो मुसावाओ, मज्झिमे मज्झो, जहन्ने जहन्नो । एवं अदत्ताइसु जोअणिज्जं । खित्तओ जं जत्थ खित्ते अर्चितं मज्झिमं जहन्नं वा । कालओ जं जत्थ काले अर्चितं मज्झिमं जहन्नं वा । भावओ वि वण्णाइगुणेहिं उक्कोसं मज्झिमं जहन्नं वा । एवं बुद्धीए आलोएउं जोअणा कायव्वा'** इति । तत्र त्रिविधेऽपि जघन्यमध्यमोत्कृष्टरूपे **मृषावादे गुर्वादि** प्रायश्चित्तं भवति । जघन्यमृषावादे गुरुमासः, मध्यममृषावादे चतुर्लघु, उत्कृष्टमृषावादे चतुर्गुरु च प्रायश्चित्तं भवतीति सर्वत्राऽपि भावना कार्या । केचिज्जघन्ये मध्यमे उत्कृष्टे पञ्चकल्यं च । अपरे पुनर्जघन्यादौ मासलघ्वादिकमाहुः । **'भिन्नं'** ' ति । **'जणसमक्ख'** ' मित्यस्य गाथापर्यन्तवर्त्तिनः सर्वत्राऽपि योगाज्जनसमक्षं जारविलासिन्यादिदोषदानेऽन्ये पुनराचार्या भिन्नं प्राहुः । **'डाइणि'** ' त्ति । लोकसमक्षमेवेयं डाकिनी, **लब्धो**ऽमुत्रामुना **निधिः**, उपलक्षणत्वात् स्थितो वाऽस्य समीपेऽमुकनिक्षेप इत्यादिभणने **लघुमासः**, **'गुरुगत्ति'** **जनसमक्षमेव चौरो**ऽयं यतोऽमुकस्यानेनामुकं चोरितमित्यादिभणने **गुरुकाश्चतुर्गुरव** इति । एके तु चौरजारप्रभृतिकलङ्कदाने राटिरटने च जघन्ये चतुर्लघु मध्यमे स्वजनादिसमक्षे चतुर्गुरु उत्कृष्टे राजपर्यन्ते क्षपणद्वयम् । दण्डापितेऽशीतिसहस्राधिकं लक्षस्वाध्यायं चाहुः । केचित्त्वक्षरमषीमन्त्रभेदे चतुर्लघु इति कथयन्तीति गाथार्थः ।।७८।।

**चउलहु परपरिवायाऽभक्खाणासऽभराडिपेसुन्ने ।**
**रायकुलंते कलहे पणकल्लं दप्पभणिए अ ।।७९।।**

व्याख्या–**परपरिवादे** स्वभावादन्यदोषप्रकाशने **अभ्याख्याने** प्रकटमसद्दोषाध्यारोपे **असभ्यराटिकादाने** असभ्यवचनोच्चारपूर्वककलहे **पैशून्ये** प्रच्छन्नं सदसद्दोषाध्यारोपे च **'चउलहु'** ' त्ति । प्रत्येकं **चतुर्लघु** । **'राय'** त्ति । **राजकुलान्ते** राजकुलं यावत् प्रसिद्धे **कलहे** कृते, **दर्पेण** च **भणिते पञ्चकल्यम्**, चशब्दाद् वक्ष्यमाणादत्तादानादिष्वपि दर्पेणाचरितेषु पञ्चकल्यमेव । यदुक्तम् —

**'मोसाइसु मेहुणवज्जिएसु दव्वाइवत्थुभिन्नेसु । हीणे मज्झुक्कोसे आसणमायामखमणाइं ।।१।।
अहवा मोसादत्ते परिग्गहे मेहुणे अ परदारे । पत्तेयं पत्तेयं, दप्पेणं पंचकल्लाण' ।।२।।**
मिति ।।७९।। अथ तृतीयाणुव्रतविषयं प्रायश्चित्तमाह —

**लहु सगिहतणुअदिन्ने मज्झि—अनाए गुरु—लहुग—नाए ।
जिट्ठे दसगमनाए सकलह—नाए त्थ (? छ) पण—कल्ला ।।८०।।**

व्याख्या—इह सामान्येन द्रव्यादि—चतुष्प्रकारेऽप्यदत्तादाने जघन्ये गुरु, मध्यमे चतुर्लघु, उत्कृष्टे चतुर्गुरु । यदुक्तं— **'मोसाइसु मेहुणवज्जिएसु'** त्तीत्यादि । एतत्सूत्रोक्तं तु विशेषतः पुनरेवं— **'लहु'** ' त्ति । **स्वगृहे तन्वदत्ते** जघन्यादत्तादाने लघुः लघुमासः । **'मज्झि'** ' त्ति । **मध्यमे** मध्यमादत्तादाने स्वगृहे**ऽज्ञाते गुरुः** गुरुमासः तस्मिन्नेव **ज्ञाते चतुर्लघु** मतान्तरेण चतुर्गुरु । **'जिट्ठि'** ' त्ति । स्वगृहे **उत्कृष्टा**दत्तादाने**ऽज्ञाते दशकं** क्षपणानामिति गम्यते । **'सकलह'** ' त्ति । **ज्ञाते चोत्कृष्टादत्तादाने** राजकुलपर्यन्ते च **कलहे** सम्पन्ने **षट् पञ्च कल्यानि** षष्टिः क्षपणानामित्यर्थः । अन्ये तु स्वगृहेऽन्नादिचोरणे लघु, वस्त्रद्रव्यादौ गुरु, ज्ञाते च चतुर्लघु । स्वर्णादौ परकीये चोरिते क्षपणदशकम् । ज्ञाते कलहे च क्षपणदशकं स्वाध्यायलक्षयुतमिति । केचित्तु शुल्कचौर्यां ४ विश्वासघाते ४ी च प्राहुरिति गाथार्थः ।।८०।।

अथ चतुर्थाणुव्रतविषयं प्रायश्चित्तविधिमाह —

**सहसापमायणाभोगि छलहु छगुरु अ चउगुरु सदारे ।
वेसाइ छलहु—छगुरु—छल्लहु इत्तरियवयभंगे ।।८१।।**

व्याख्या—**सहसाकारः** पूर्वातिप्रवृत्तक्रीडाभ्यासतोऽविमृश्यकरणम् । **प्रमादः** कषायविषयादिलक्षणः । यदुक्तम्—

**'मज्जं विसयकसाया निद्दा विगहा य पंचमी भणिआ । एए पंच पमाया जीवं पाडंति संसारे' ।।**
**(सम्बोधसित्तरि—७३, रत्नसञ्चयः ३२५)**

अथवाऽज्ञानसंशयादिस्वरूपः । तथा चोक्तम् —

**'पमाओ अ जिणिंदेहिं भणिओ अट्ठभेअओ । अन्नाणं संसओ चेव मिच्छानाणं तहेव य ।।
रागो दोसो मइब्भंसो धम्मंमि य अणायरो । जोगाणं दुप्पणीहाणं अट्ठहा वज्जिअव्वओ' ।।
(प्र०सा० १२०७, १२०८, प्रमादपरिहारकुलकम् – ७, ८)**

त्ति । **अनाभोगो**ऽत्यन्तविस्मृतिः । एतैः **'सदारे'** ' त्ति । **स्वकलत्रविषये इत्वरिकव्रतभङ्गः** कियत्कालावधि—गृहीतनियमलोपोऽष्टम्याद्यङ्गीकृतनियमभङ्गो वा, **तस्मिन्** जाते सति **षड्लघु—षड्गुरु—चतुर्गुरवो** भवन्ति ।

अयमभिप्रायः—सहसाकारेण स्वदारेषु नियमभङ्गे षड्लघु, प्रमादेन षड्गुरु, अनाभोगेन चतुर्गुरु। केचित् सामान्येनैव स्वकलत्रविषयेऽष्टम्यादिगृहीतनियमभङ्गे फ्र, मतेन फ्रा, आदेशान्तरेण ण्का। **'वेसाइ छलहु'** त्ति। **वेश्यायां** तु सहसाकारादिभिरित्वरिकनियमभङ्गे क्रमेण **षड्लघु—षड्गुरु—षड्लघूनि** भवन्ति। मतान्तरेण सहसाकारादिभिस्त्रिभिरपि नियमभङ्गे षड्गुरुकमेव। अन्ये त्वाहुः—स्वदारेत्वरव्रतभङ्गे वेश्येत्वरव्रतभङ्गे च षड्लघु **इत्वरायां** कियत्कालान्यपरिगृहीतायां स्वयं धृतायां वा गमने षड्गुरु। एवं स्त्रियाः स्वपुरुषेऽनाभोगादिभिरित्वरिकव्रतभङ्गे क्रमेण फ्र। फ्रा। ण्का। सपत्न्या वारके फ्र। इति गाथार्थः॥८१॥

पुनरत्रैव विशेषमाह —

**आभोगे पणकल्लं दुण्ह कुलवहूइ मूलमविसंकं।**
**सासंकमनाए पणकल्लं नाए छ पणकल्ला॥८२॥**

व्याख्या—**आभोगे** नियमोऽस्ति ममेत्युपयोगे जानानस्येत्यर्थः। स्वदारवेश्यादिनियमभङ्गे प्रत्येकं पञ्चकल्याणम्। उक्तं च **'आभोगे पञ्चकल्लमिक्किक्के'**'। इह च स्त्री पुरुषो वा यो बलात्कारं करोति तस्येदमितरस्य तु पूर्वोक्तमेव। उभयसम्मत्या तूभयोरपि पञ्चकल्यम्। **'दुण्ह कुलवहूइ'**' त्ति। तथा परस्त्रीकुलवधूगमने द्वयोरपि निःशङ्कयोर्मूलम्। पुनः श्रावकधर्मारोपः क्रियते, षाण्मासिकं वा तपो देयमिति **'छम्मासं बहुअपावे वी'**' ति वचनात्। श्रीमहावीरतीर्थे उत्कृष्टतोऽपि षण्मासान्तमेवातिचारशुद्ध्यर्थं तपः स्यादिति हेतोः। मृदुस्वभावस्य तु पञ्चकल्यमेव **'जइ संतप्पइ तो पंचकल्लाणमि'** ति वचनात्। तथा **'सासंकमनाए'** इत्यादि। **साशङ्कयोर्द्वयोरपि** लोकाऽज्ञाते सति पञ्चकल्यम्। **'नाए'** इत्यादि। **ज्ञाते** तु लोकप्रसिद्धे सति साशङ्कयोर्द्वयोरपि **षड् पञ्चकल्यानि** स्वाध्यायलक्षयुतं पञ्चकल्यं तपो देयमित्यर्थः॥८२॥

पूर्वोक्तमेवार्थं प्रकारान्तरेणाह —

**पण कल्ला दस कल्ला अनाय नाए बलाओकारिस्स।**
**खवणसयं तीसाइ व दसवेला जा उवरि मूलं॥८३॥**

व्याख्या—**बलात्कारिणः** पुरुषस्य स्त्रियो वा शीलभङ्गेऽ**ज्ञाते**—लोकाप्रसिद्धे सति **पञ्च कल्यानि**। **ज्ञाते** लोकप्रसिद्धे च **दश कल्यानि**। **'खवणसय'**' मित्यादि। वारंवारमेवं कुर्वतस्तु **दशवेला** दश वारान् यावत् क्षपणशतं प्रायश्चित्तं भवति। पात्राद्यपेक्षया तु **त्रिंशदादीनि** वा चतुर्थानि भवन्ति। **'उवरि मूलं'**' ति। दशवेलानामुपरि साशङ्कयोरपि **मूलं** प्रागुक्तलक्षणम्। मृद्वोः पश्चातापिनोश्च पुंस्त्रियोः पञ्चकल्याणं वेति गाथार्थः॥८३॥

अथ स्त्रीविशेषगमनमधिकृत्य पुंसः प्रायश्चित्तमाह —

**पणकल्ल व (? वु) ड्ढकुमारी—मयपइया ओहओ अ परदारे ।**
**छग्गुरुग दासियाइसु छल्लहु खत्तिअदिआईसु ।।८४।।**

व्याख्या—**बृहत्कुमारी** प्रतीता, **मृतपतिका** विधवा तासु **तथौघतः** सामान्येन वक्ष्यमाणदासिकादिजघन्या—दिपरस्त्रीविशेषं विना **परदारेष्वज्ञातकुलाङ्गनासु** गमने प्रत्येकं **पञ्चकल्यम्** । आदेशेन षड्गुरुकाः प्रायश्चित्तं भवति । विशेषतस्तु प्राह— '**छग्गुरु**' इत्यादि । **दासिकादिषु** जघन्यपरस्त्रीषु गमने **षड्गुरवः क्षत्रियाणीब्राह्मण्यादिषु** मध्यमपरदारेषु गमने च **षड्लघवश्च** प्रायश्चित्तं भवतीति गाथार्थः ।।८४।।

साम्प्रतमुत्तमपरस्त्रीगमनमधिकृत्य प्रायश्चित्तमाह —

**ठक्कुरपिआइ छग्गुरु दस पणकल्ला अनाय नाए वा ।**
**असिओ लक्खो मूलं पत्तं वाऽऽसज्ज पणकल्लं ।।८५।।**

व्याख्या—**ठक्कुरो** ग्रामाद्यधिपतिः **तत्प्रियायां** गमने, उत्तमपरदारगमने इत्येके । **वाशब्दस्य** चार्थत्वाद**ज्ञाते** जनाप्रसिद्धे, **ज्ञाते** जनप्रसिद्धे सति **षड्गुरवो दश पञ्चकल्यानि च** क्रमेण प्रायश्चित्तं भवन्ति । तथाहि लोकैर**ज्ञाते षड्गुरु, ज्ञाते** पुनर्दश **पञ्चकल्यानि** क्षपणशतमित्यर्थः । '**असिओ लक्खो**' इत्यादि । **वाशब्द** आदेशान्तरसूचकः । तत उत्तमपरकलत्रेण सह व्रतभङ्गेऽज्ञातेऽ**शीतिसहस्राधिकं** स्वाध्यायलक्षं पञ्चचत्वारिंशत्कल्यानीत्यर्थः । ज्ञाते पुनर्मूलं प्रागुक्तलक्षणं च प्रायश्चित्तं भवति । '**पत्तं वे**' त्यादि । **वाशब्दो**ऽथवार्थोऽथवेदमन्यदादेशान्तरं तृतीयमित्यर्थः । तत उत्तम**पात्रमासाद्य पञ्चकल्यमेव** वा । अतिप्रसिद्ध**पात्रस्य** तु मूलस्याप्यापत्तौ **पञ्चकल्यमेव** प्रायश्चित्तं प्रदेयम् न मूलमित्याप्तोपदेशः । अन्ये तु स्त्रियं प्रत्येवमाहुः— '**सीलस्स बला भंगे लक्ख इत्थीइ सपणकल्लाणमि**' ति गाथार्थः ।।८५।।

साम्प्रतमत्रैव विशेषमाह —

**पणकल्लमनाए तीस—कल्ल नाए अछिप्पजाईसु ।**
**कल्लमणुतावि कीवे तिव्वभिलासे य पणकल्लं ।।८६।।**

व्याख्या— '**अछिप्पजाईसु**' त्ति । **अस्पृश्यजातिषु** मातङ्ग्यादिपरस्त्रीषु गमने**ऽज्ञाते** जनाप्रसिद्धे पञ्चकल्याणम्, **ज्ञाते** तु **त्रिंशत्कल्यानि** स्वाध्यायलक्षयुतं पञ्चकल्याणमित्यर्थः । अन्ये तु केवलं स्वाध्यायलक्षमेवाहुः पञ्चाशत्क्षपणानीत्यर्थः । '**कल्लमणुतावि कीवे**' त्ति । '**व्याख्यानतो विशेषार्थप्रतिपत्ति**' रिति न्यायात् **क्लीबे** क्लीबसेवनायां—नपुंसकसेवनायां **अनुतापे** पश्चात्तापे सति कल्यम् । तथा '**तिव्वभिलासे य पणकल्ल**' मित्यादि । **तीव्राभिलाषे** तु **पञ्चकल्यं** प्रायश्चित्तं पुरुषस्य स्यादिति । यद्वा **अनुतापिनः** पश्चात्तापवतः **क्लीबस्य**

नपुंसकस्य कल्यम्। **तीव्राभिलाषे** तीव्रानुरागात् क्लिष्टाध्यवसायस्य तु **पञ्चकल्यम्,** चशब्दात् पुंस्त्रियोरपि हस्तभङ्ग्यां—हस्तकर्मादिकरणे चतुर्लघु । उभयोरपि गाढाऽऽकाङ्क्षायां सरागभाषायां च गुरोरालोचनं पुनरकरणेन च मिथ्यादुष्कृतदानमिति । स्वप्ने नियमभङ्गे नमस्काराधिकचतुर्विंशतिस्तवचतुष्ककायोत्सर्गः कार्य इति । **'सयमट्ठसयं चउत्थ'** मिति वचनादिति गाथार्थः ।।८६।।

अथ पञ्चमाणुव्रतविषयं प्रायश्चित्तविधिमाह —

**गुरु—लहुग—गुरुग तिविहे परिग्गहे उत्तमे व पणकल्लं ।**

**एगे असीअ लक्खं उविच्च भंगे इमं अन्ने ।।८७।।**

व्याख्या—द्रव्यादिविषये **परिग्रहे** जघन्यमध्यमोत्कृष्टभेदात्त्रिविधेऽपि यथाक्रमं **गुरुचतुर्लघुचतुर्गुरुकाः** प्रायश्चित्तं भवति । यदाह— **'मोसाइसु मेहुणवज्जिएसु'** ' इत्यादि । इह च पाठान्तरम् **'लहु—गुरु—चउलहु तिविहे परिग्गहे'** ' इति । तत्रेत्थं व्याख्या—**त्रिविधे**ऽपि जघन्यमध्यमोत्कृष्टरूपे द्रव्यादिविषये **परिग्रहे** क्रमेण **लघुमास—गुरुमास—चतुर्लघुकाः** प्रायश्चित्तं भवति । उत्तमपरिग्रहनियमभङ्गविषये आदेशान्तरद्वयमाह— **'उत्तमे वे'** ' त्यादि । **वा**शब्द आदेशान्तरसूचनार्थः । तत **उत्तमे** परिग्रहे आदेशेन **पञ्चकल्यं** प्रायश्चित्तं भवति । **'एगे'** इत्यादि । **एके** पुनराचार्या उत्कृष्टपरिग्रहनियमभङ्गे **अशीतिसहस्राधिकं** स्वाध्याय**लक्ष**माहुः । **'उविच्च भङ्गे'** इत्यादि । अन्ये पुनराचार्या इदमशीतिसहस्राधिकस्वाध्यायलक्षदानरूपं प्रायश्चित्त**मुपेत्य**—आकुट्ट्यादिना परिग्रहव्रत**भङ्गे** प्राहुः । अत्रापि दर्पेण परिग्रहव्रतभङ्गे पञ्चकल्याणं प्रायश्चित्तम् । **'अहवा मोसादत्ते'** ' इत्यादि वचनादिति गाथार्थः ।।८७।।

अथ गुणव्रतत्रयविषयं प्रायश्चित्तविधिमाह —

**दिसिवय अणत्थभंगे चउगुरु निक्कारणं च निसिभत्ते ।**

**कोहे पक्खाईए पगाढमायामयाईसु ।।८८।।**

व्याख्या—**दिग्व्रतविषयेषु** पञ्चस्वप्यतिचारेषु तथा अपध्यान—प्रमादाचरिता—ऽधिकरणप्रदानपापोपदेशरू—पचतुर्विधा**नर्थदण्डविरमणव्रतभङ्गे** च प्रत्येकं **चतुर्गुरुकं** प्रायश्चित्तं भवति । तथा भोगोपभोगगुणव्रते **निष्कारणं** रोगधरणादिकारणं विना रात्रिभोजने चतुर्गुरु । एके तु कारणे रात्रिभोजने चतुर्गुरून्निष्कारणे षड्गुरूँश्च प्रायश्चित्तं प्राहुः । अथानर्थदण्डविरमणव्रतविषये किञ्चिद्विशेषतः प्रायश्चित्तविधिमाह — **'कोहे'** इत्यादि । **क्रोधे पक्षातीते** पक्षाद्यतीते पक्षं चतुर्मासकं वाऽतिक्रम्यापि कृतावस्थाने तथा **प्रगाढेषु** पक्षाद्यतिक्रान्तेषु **मायामदादिषु,** लोभातिरेकतः परवञ्चनात्मिका **माया, मदो** जात्यादिरष्टप्रकारः पीठिकायां प्रागुक्तस्वरूपः, आदिशब्दात् प्रगाढलोभादिषु कलहादिषु च प्रत्येकं चतुर्गुरुकं प्रायश्चित्तं भवतीति ।

'चउगुरु' इत्येतस्य पूर्वार्द्धप्रतिपादितस्य सर्वत्रापि योगादिति गाथार्थः ।।८८।।

अथ यः श्राद्धादिः उपशामनशक्तौ क्रोधादीन् कुर्वन्तं पुमांसं नोपशामयति, तस्य किं प्रायश्चित्तम् ? इति प्रकरणागतं तत्प्रायश्चित्तविधिमाह—

**जो जम्हा उवसमई विज्झवणं तेण तस्स कायव्वं ।**
**जो उ उवेहं कुज्जा सो पावइ मासियं लहुयं ।।८९।।**

**(नि०भा० २७७९, बृ०क० २६९८)**

व्याख्याः—**यो यस्मादुपशाम्यति** निवृत्तानुशयो भवति, **तेन तस्य 'विज्झवणं'** विध्यापनं **कर्त्तव्यं**, प्रकरणात् क्रोधाग्नेरितिशेषः । शास्त्रान्तरेषु क्रोधादीनामग्न्याद्युपमानस्य सुप्रसिद्धत्वात् । **'जो उ उवेह'** मित्यादि। एवं सति **यस्तु** श्राद्धादिः तत्र शक्तोऽप्युपेक्षां **कुर्यात् स प्राप्नोति मासिकं लघुकम्**, तस्य लघुमासप्रायश्चित्त—शोध्यं दूषणं भवतीति भावः ।।८९।।

अथ भोगोपभोगगुणव्रतेऽभक्ष्यनियमभङ्गविषयं प्रायश्चित्तमाह —

**महु—पंचुंबरि—फल—फुल्लमाइवयभंगि गुरुग अन्नाए ।**
**नाए छगुरु अनियमे पिसिआसव—मक्खणे दसगं ।।९०।।**

व्याख्या—**मधु** प्रतीतम्, **पञ्चोदुम्बरी— 'उदुम्बरवटप्लक्ष—काकोदुम्बरशाखिनाम्' । पिप्पलस्य च नाश्नीयात् फलं कृमिकुलाकुलम्'** ।। **(योगशास्त्रम्० ३-४२)** इत्याद्युक्तरूपा । **फलं** वृन्ताकादि । **पुष्पं** मधूकादि। आदिशब्दादुषितद्विदलहिमविषादिपरिग्रहः । एतेषां **व्रतस्य** नियमस्य **भङ्गे 'अन्नाए'** त्ति । **अज्ञाते** ऽनाभोगेन इत्यर्थो, जाते सति **'गुरुग'** त्ति । **गुरुकाश्चतुर्गुरवः** प्रायश्चित्तं भवतीति । **'नाए छग्गुरु'** त्ति । **ज्ञाते** आभोगे सति मधुप्रभृतीनां नियमभङ्गे **षड्गुरु** प्रायश्चित्तं भवति । अन्ये तु सामान्येन पञ्चोदुम्बरीफलपुष्पादिव्रतभङ्गे लघु, नमस्काराष्टशतं त्वेके । अपरे तु नियमं विनाऽपि पञ्चोदुम्बर्यादिषु निषिद्धेषु भक्षितेषु चतुर्गुरु, नियमभङ्गे तु षड्गुरुकमाहुः । **'अनियमे'** इत्यादि । यस्य ब्राह्मणवणि—जादेर्जातिस्वभावादेव पिशितादीनि न भक्ष्यन्ते तस्य निर्विषयत्वात्कदाचिदकृत**नियमस्यापि** पिशितासवम्रक्षणानाम् । तत्र **पिशितं** मांसम्, **आसवो** मद्यं, **म्रक्षणं** नवनीतम् । एतेषां भक्षणे **दशकं** क्षपणानामिति गम्यत इति गाथार्थः ।।९०।।

अथ भोगोपभोगगुणव्रत एवानन्तकायप्रत्येकवनस्पतिनियमविषयं प्रायश्चित्तं किञ्चिन्मांसासवविषयं विशेषप्रायश्चित्तं चाह —

**चउगुरुणंते चउलहु परित्तभोगे सचित्तवज्जिस्स ।**
**मंसासववयभंगे छग्गुरु चउगुरु अणाभोगे ।।९१।।**

व्याख्या — **सचित्तवर्जकस्य** श्राद्धादेः **'अणंते'** त्ति । **अनन्तकायानां** मूलकार्द्रकादीनां भक्षणे **चतुर्गुरु** प्रायश्चित्तं भवति । यदागमः—

**'सोऊण जिणपडिकुट्ठो अणंतजीवाण गायनिप्फन्नो । गेहीपसंगदोसा अणंतकाए अओ गुरुगा'** ।।१।।

तथा **सचित्तवर्जकस्यैव** श्राद्धादेः **'परित्त''** त्ति । **प्रत्येकपरिभोगे** प्रत्येकाम्रादिफलपुष्पादिभोगे **चतुर्लघु** प्रायश्चित्तं भवति । तथा **मांसासवयोः** उपलक्षणत्वान्मधुनवनीतयोश्च **'वयभंगे''** त्ति । अनाभोगतः पृथग् वक्ष्यमाणत्वादत्राभोगतो ज्ञेयम् । ततश्चाभोगे सति **व्रतस्य भङ्गे षड्गुरु** । **'चउगुरु'** त्ति । **अनाभोगे** सति **मांसासवमधुनवनीतानां व्रतभङ्गे चतुर्गुरु** प्रायश्चित्तं भवतीति गाथाक्षरार्थः ।।९१।।

अथ भोगोपभोग एव विकृत्यादिनियमभङ्गविषयं देशावकाशिकव्रतविषयं पञ्चदशकर्मादानविषयं च प्रायश्चित्तमाह —

**विगई–ण्हाण–सचित्तासणाइ–भोगोवभोगभंगि लहु ।**
**चउलहु देसवगासे कम्मादाणे छगुरु गुरुगा ।।९२।।**

व्याख्या–**विकृति–स्नान–सचित्त**ग्रहणेन द्रव्याशनपानखादिमस्वादिमविलेपनपुष्पादीनां भोग्यानामुपादानम् **आसनादि**कथनेन च वस्त्राभरणयानवाहनशयनासनोपानहादीनामुपभोग्यानामङ्गीकरणम्, ततो **विकृति–स्नान–सचित्तासनादि–भोगोपभोगव्रतभङ्गे लघु** । तथा **देशावकाशिकव्रतभङ्गे चतुर्लघु** । तथा **पञ्चदशकर्मादाननियमभङ्गे षड्गुरु** प्रायश्चित्तम् । **'गुरुग'** त्ति । मतान्तरेण गुरुकाश्चतुर्गुरु प्रायश्चित्तं पञ्चदशकर्मादाननियमभङ्गे च भवतीति । पञ्चदशकर्मादानस्वरूपं च ग्रन्थान्तरोक्तमेवम् —

**'इंगालविक्कयं इट्टवायवुंभारलोहगाराणं । सोनारभाडभुंजाइयाण कम्मं तमिंगालं ।।१।।**
**फुल्लफलपत्ततणकट्ठपणियकंदाइयाण विक्कणयं । आरामकच्छियाकरणयं च वणकम्ममाहंसु ।।२।।**
**सगडाणं घडणघडावणेण तव्विक्कएण जा वित्ती । तं सागडियं कम्मं तदंगविक्किणणमवि नेयं ।।३।।**
**निअएणुवगरणेणं परकीयं भाडएण जो वहइ । तं भाडकम्ममहवा वसहाइसमप्पणमन्नेसिं ।।४।।**
**जवचणयगोहुममुग्गमासकरडिप्पभिईण धन्नाणं । सत्तुय–दालिकणिक्कातंदुलकरणाइ फोडणया ।।५।।**
**अहवा फोडीकम्मं सीरेणं भूमिफोडणं जं तु । सिलकुट्टणउल्लत्तं खणणं लवणागराईणं ।।६।।**
**नहदंतचम्मखल्ला भेरिकवड्डायसिप्पिसंखा य । कच्छूरियपूअसमाइयं च इह दंतवाणिज्जं ।।७।।**
**लक्खाधाहइगुलियामणसिलहरिआलवज्जलेवाणं । विक्किणण लक्खवणिजं तुअरिअसक्करडमाईणं ।।८।।**
**महुमज्जमंसमक्खण चउण्ह विगईण जमिह विक्कणणं । रसवाणिज्जं तह दुद्धतिल्लघयदहिअपभिईणं ।।९।।**
**मणुयाणं तिरियाणं विक्किणणं इत्थ अन्ने देसे वा । केसवणिज्जं भण्णइ गोगद्दहअस्समाईणं ।।१०।।**
**विसवाणिज्जं भण्णइ विसलोहप्पहरणाण विक्किणणं । धणुहसरखग्गछुरिया–परसुअकुद्दालिआईणं ।।११।।**
**सिलउक्खलमुसलघरट्टकंकयाईण जमिह विक्किणणं । उच्छुतिलपीलणं वा तं बिंती जंतपीलणयं ।।१२।।**
**कन्नाण फालणं नासवेहवद्धिअयडंभणं तिरिसु । कंबलपुच्छछेयणपभिईनिल्लंछणं भणियं ।।१३।।**
**वणदवदाणमरण्णे दवग्गिदाणं च जीववहजणयं । सरदहतलायसोसो बहुजलयरजीववहकारी ।।१४।।**
**मज्जारमोर–मक्कडकुक्कुड–सालहिअकुक्कुराईणं । दुट्ठित्थिनपुंसाईण पोसणं असइपोसणया ।।१५।।**

एवं सङ्क्षेपतः पञ्चदशकर्मादानस्वरूपमिति गाथार्थः ।।९२।।

अथ गाथानुलोम्येन देशावकाशिकदशमव्रतस्य प्रायश्चित्तविधेः पूर्वमुक्तत्वात् साम्प्रतं सामायिक—पौषधोपवासव्रतयोर्नवमैकादशयोः प्रायश्चित्तविधिमाह —

**नियमे पोसहसामाइअकरणे चउगुरु अपारणए ।**
**इह पुत्तीहारवणे चउगुरु लाहे पुणो भिन्नं ।।९३।।**

व्याख्या — **नियमे सति पौषधस्य सामायिकस्य चाकरणे चतुर्गुरवः** । तथा '**अपारणे**' त्ति । '**डमरुकमणि**' न्यायेन '**चउगुरु**' इत्यस्यात्रापि योगात् पौषधसामायिकयोर**पारणे**ऽपि **चतुर्गुरु** प्रायश्चित्तं भवति । मतान्तरेणापारणे चतुर्लघु । नियमाभावेऽपि सुश्रावकस्य सामग्र्यां सत्यां सामायिकाकरणे लघुमासः । तथा **इह** पौषधसामायिकयोरङ्गीकृतयोर्यदि **मुखवस्त्रिकां** सर्वथा नाशयति तदा चतुर्गुरु । मतान्तरेण चतुर्लघु । **लाभे** पुनस्तस्याः प्राप्तौ **भिन्नं** भिन्नमासः। **पुनः**शब्दाद् हस्ताद्यवग्रहाद् बहिःस्थितायामपि तस्यां **भिन्नमासः**। क्वचिन्नमस्कारावलिकानां नाशने च मासगुरु। इति गाथार्थः ।।९३।।

अथ विशेषतः पौषधविधिविषयं प्रायश्चित्तमाह —

**वसहि—अपमज्जणे तह सज्झाय—निसीहियावसिअकरणे ।**
**इरिआइ अपडिकमणे उवही थंडिल अपडिलेहे ।।९४।।**
**अपमज्जिउं कवाडुग्घाडे पिहणे अ कायकंडुअणे ।**
**कट्ठाइगहणमुअणे भिन्नं कुड्डाइवट्ठंभे ।।९५।।**

व्याख्या—यदि गृहितपौषधोपवासव्रतो द्विवेलं **वसतिं न प्रमार्जयति** । **तथा**शब्दाद्रात्रौ स्वपन् संस्तारकभूमिं कायोत्सर्गकरणभूमिं वा **न प्रमार्जयति**, चतुष्कालं **स्वाध्यायं न करोति**, वसत्यादौ प्रविशन्**नैषेधिकीं न कथयति**, उपलक्षणादौपग्रहिकरजोहरणेन पादौ न प्रमार्जयति, शिरस्यञ्जलिं न बध्नाति च, तथा निःसरन्**नावश्यकीं न करोति**, तथा कायिकादिपरिष्ठापने हस्तशतादागमने पयस्त्यागादौ **वेर्यापथिकीं न** प्रतिक्रामति, उभयकाल**मुपधिं स्थण्डिलानि** चागाढोच्चारप्रश्रवणपरिष्ठापनार्थं **न प्रत्युपेक्षते** । नैषेधिक्यादिस्वरूपं स्थण्डिलानां प्रमाणसङ्ख्यादिस्वरूपं च ग्रन्थान्तरतोऽवसेयम् । तथा '**अपमज्जिउं**' ति । पृथग् पृथग् सर्वत्र सम्बध्यते । ततश्च कपाटादीन् पूर्वं चक्षुषा निरीक्ष्य औपग्रहिकेन साधुसत्केन वा रजोहरणे**नाप्रमार्ज्योद्**घाटयति । **पिदधाति** स्थगयति वा । तथाऽ**प्रमार्ज्य कायं** शरीरकं **कण्डूयति** । तथा **काष्ठ**पीठफलकमात्रकदण्डका**दिकमप्रमार्ज्य गृह्णाति मुञ्चति** वा, **कुड्ये** भित्तौ **आदि**शब्दात् स्तम्भमालादाव**प्रमार्ज्यावष्टभ्नाति** । एतेषु सर्वेष्वपि स्थानेषु **भिन्नं** भिन्नमासः प्रायश्चित्तं भवतीति गाथाद्वयार्थः ।।९४-९५।।

**उवविट्ठपडिक्कमणे नासज्जपमज्ज–पुंजणुद्धरणे ।**
**जिणमुणिगेहागमणे लहुगमपारियजिमणपियणे ।।९६।।**

व्याख्या–अशक्तेरालस्यादेर्वा गृहीतपौषधेऽन्यथा वा श्राद्ध **उपविष्टः** सन् **प्रतिक्रमणं करोति** । तथा अन्धकारे परिभ्रमन् बाढ**मासज्जेति न** कथयति **न प्रमार्जयति** च । तथा द्विवेलमुपाश्रयप्रमार्जनानन्तरं **पुञ्जं नोद्धरति** । तथा **जिनमुनिगेहयो** र्देवालयोपाश्रययोर्देवगुरुवन्दनाय **न गच्छति** । तथा प्रत्याख्यन**मपारयित्वा भुङ्क्ते** पानीयं च **पिबति** । एतेषु सर्वेष्वपि **लघुकं** लघुमासः प्रायश्चित्तं भवतीति गाथार्थः ।।९६।।

**पुरिसस्सित्थीफासे चउलहु इत्थीइ होइ चउगुरुयं ।**
**लहुअं संतरफासे अंचलतिरिफासणे भिन्नं ।।९७।।**

व्याख्या–पौषधेऽङ्गीकृते **पुरुषस्य** निरन्तरं **स्त्रीस्पर्शे चतुर्लघु** प्रायश्चित्तम् । **स्त्रियस्तु** निरन्तरं पुरुषस्य स्पर्शे **चतुर्गुरु** प्रायश्चित्तम् । तथा **सान्तरे स्पर्शे** परम्परसङ्घट्टे द्वयोरपि स्त्रीपुंसोर्**लघुमासः** प्रायश्चित्तम् । तथा– **अञ्चलेन** वस्त्रप्रान्तादिना स्त्रियः सङ्घट्टे **तिरश्च्याः स्पर्शने** च **भिन्नं** भिन्नमासः प्रायश्चित्तं भवतीति गाथार्थः ।।

**तिविह जल–जलणफुसणे विज्जुप्फुसणे अ भिन्न–लहुगुरुगो ।**
**चउलहु वग्घारंमी तं चिय दग–मट्टियगमे य ।।९८।।**

व्याख्या–**त्रिविधे** जघन्यमध्यमोत्कृष्टभेदभिन्ने **जलस्य** जलदादिसत्कस्य **ज्वलनस्या**ऽग्निज्योतिषश्च **स्पर्शने, विद्युतः स्पर्शने च भिन्नं** लघुगुरु च । जलादीनां जघन्यस्पर्शने भिन्नं, मध्यमस्पर्शने लघुमासः उत्कृष्टस्पर्शने गुरुमासश्च प्रायश्चित्तं भवति । **'चउलहु वग्घारंमि'** त्ति । **वग्घारं** नाम या अविच्छिन्ना वृष्टिः । यद्वा–यस्यां वृष्टावुपरि प्रावृतं कम्बलादिकं श्चोतति, यद्वा–उपरितनकम्बलादिकं भित्त्वाऽन्तःकायमार्द्रयति । तथा **'तं चिय'** त्ति । **तदेव** चतुर्लघुकमेव प्रायश्चित्तं भवति । क्वेत्याह–**उदके मृत्तिकायां च उदकमिश्रमृत्तिकायां** वा **गमने** इति गाथार्थः ।।९८।।

**नववासवुट्ठि–किसलयविराहणा जत्तिआणि दिअहाणि ।**
**तावइया चउगुरुगा दसगं छपिआल–सुइनासे ।।९९।।**

**(जइजीयकप्पो ४३)**

व्याख्या–**अभिनववर्षाकालवृष्टौ** जातायां यानि **किशलयान्यनन्तकायरूपाणि** भवन्ति । तेषां **विराधना**

यावन्ति दिनानि स्यात्तावन्तश्चतुर्गुरुकाः प्रायश्चित्तम् । अयमभिप्रायः—**वर्षाकाले** किल **प्रथमवृष्टौ** जातायां दिनत्रयं यावत् सूक्ष्माङ्कुरा अन्तर्मुहूर्त्तमात्रकालमनन्तकायरूपाः प्रायः सर्वत्र भूतले प्रतिक्षणं प्रादुर्भवन्तो भवन्ति । ते च दुर्लक्ष्यतया परिहर्त्तुं दुःशका अतस्तदानीं तद्विराधनाभीरवो गृहीतपौषधा गृहीतसामायिकाश्चो—पासका दिनत्रयं यावत्तत्परिहाराय यथाशक्ति यतन्ते । यतमानानामपि च गृहीतपौषधादीनां श्राद्धानां **नवीनाङ्कुरविराधना यावन्ति दिनानि स्यात्तावन्तश्चतुर्गुरुकाः** प्रायश्चित्तं भवति । तथा ग्रन्थान्तरे सामान्यतो लोहनाशे चतुर्गुरुकस्योक्तत्वादत्र **'सुइ'** ' त्ति सूचिकालयस्य ग्रहणम् । ततश्च **षट्पद्यालयो** यूकागृहं **सूचा** सूचिकालयः तयोर्नाशने **दशकं** प्रत्यासत्तेश्चतुर्गुरुकाणां प्रायश्चित्तं भवतीति गाथार्थः ।।९९।।

**पुढवाइ—घट्टणाइसु भिन्नाइ अणंत—विगलि लहुगाइ ।**

**पंचिंदिसु गुरुमाइ दसगं सव्वेसु नवपुरओ ।।१००।।**

व्याख्या—**पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां** **'घट्टणाइसु'** ' त्ति । **सङ्घट्टना**नागाढपरितापगाढपरितापोपद्रवेषु जातेषु **'भिन्नाइ'** ' क्रमेण—**भिन्नमास—लघुमास—गुरुमास—चतुर्लघवः** प्रायश्चित्तं भवति । पृथिव्यादीनां सङ्घट्टादिस्वरूपं प्राक् प्रथमाणुव्रते (गाथा नं. ७०) प्रतिपादितमेव । तथाऽ**नन्तकायवनस्पतेर्विकलेन्द्रियाणां** च सङ्घट्टादिषु चतुर्ष्वपि **'लहुगाइ'** ' त्ति । यथासङ्ख्यं **लघुमास—गुरुमास—चतुर्लघु—चतुर्गुरवः** प्रायश्चित्तं भवति । तथा **पञ्चेन्द्रियविषयेषु** सङ्घट्टादिषु **'गुरुमाइ'** ' त्ति । **गुरुमास—चतुर्लघु—चतुर्गुरु—षड्लघवः** प्रायश्चित्तं गृहीतपौषधस्य श्राद्धस्य भवति । अत्रापि पञ्चेन्द्रियसङ्घट्टः तदहर्जातमूषकगृहकोलिकादिविषयो द्रष्टव्य इति । **'दसग'** ' मित्यादि **सर्वेष्वपि** पृथिव्यादिविषयेष्वेतेषु सङ्घट्टादिषु **नवानां** वाराणां **परतो** दशादिषु यावत्परःशतेष्वपि सञ्जातेषु **दशकं** स्वप्रायश्चित्तानां भवति । यथा दशभिरेकादशभिर्यावत्परःशतैश्च पृथिवीसङ्घट्टैर्भिन्नदशकमेव, नाधिकं तावता तस्य शुद्ध्यापत्तेरिति । नव यावत्तु यावन्तः सङ्घट्टादयः तावन्ति प्रायश्चित्तानि भवन्ति । एवमन्येषामपि भावना कार्येति गाथार्थः ।।१००।।

**वमणे निसि वोसिरणे जिमिऊणावंदणे असंवरणे ।**

**अनिमित्त दिवा सुअणे विकहा सावज्जभासाए ।।१०१।।**

**पोरिसिमभणिअ सागारमकरिउं गाहमभणिउं सुअणे ।**

**चउलहुअमपेहिअथंडिलेसु मोआइ वोसिरणे ।।१०२।।**

व्याख्या—गृहीतपौषधस्य **वमनं** जायते । **निशि व्युत्सर्जन**मकालसञ्ज्ञा भवति । तथा **भुक्त्वा अवन्दनं** गुरोः

कृतिकर्म न करोति । तथा **असंवरणं** प्रत्याख्यानं वन्दनकदानेऽपि चतुर्विधाहारप्रत्याख्यानरूपदिवस—चरिमस्वरूपं न विधत्ते । तथा **अनिमित्तं** ग्लानत्वादिकं कारणमन्तरेण **दिवा स्वपिति** । तथा **विकथाः** स्त्रीकथादिकाः करोति। तासां स्वरूपं ग्रन्थान्तरतोऽवसेयम् । तथा परोपघातिन्यादिकां सावद्यभाषां भाषते। तथा **पौरुषीं** पौरुषीचैत्यवन्दनाम**भणित्वा**ऽकृत्वेत्यर्थः । तथा **साकारं** '**पदैकदेशे पदसमुदायोपचारात्**'' साकारानशनप्रत्याख्यानम**कृत्वा** । तथा '**गाथा**'' मित्यत्रैकवचनं जात्यपेक्षमित्यतो गाथाः—संस्तारकगाथा—'अणुजाणह संथारमि'' त्यादिका **अभणित्वा** अकथयित्वा च **स्वपिति** । तथा दिवा **अप्रतिलिखितेषु** स्थण्डिलेषु **मोकादीनि** प्रश्रवणोच्चारादीनि व्युत्सृजति । एतेषु सर्वेष्वपि गाथाद्वयप्रतिपादितेष्वपराधस्थानेषु चतुर्लघु प्रायश्चित्तं भवतीति गाथाद्वयार्थः । एतच्च पौषधोपवासव्रतप्रायश्चित्तं प्राक् सामायिकव्रताधिकारे अनुक्तं यथासम्भवं तत्राऽप्यवगन्तव्यमिति ।। १०१-१०२।।

अथ अतिथिसंविभागव्रतविषयं तपआचारादिविषयं प्रायश्चित्तविधिमाह —

**चउगुरु अकारणं संविभाग—पच्चक्खाण अकरणे नियमे ।**
**अवए वि लहु सुसड्ढस्स निंदविग्घे य तव कुणओ ।।१०३।।**

व्याख्या—नियमे सति **कारणं** ग्लानत्वादिकं **विना संविभागं** न करोति । तथा पर्वतिथौ मया अमुकं प्रत्याख्यानं कर्त्तव्यं शेषतिथिषु चामुकमिति नियमे सति **प्रत्याख्यानं न** करोति, प्रत्येकं चतुर्गुरु प्रायश्चित्तं भवति । तथा **अव्रतेऽपि** नियमाभावेपि सुश्रावको यदि प्रमादेनातिथिसंविभागं तपश्च नमस्कारसहितादि न करोति **लघुमासः** प्रायश्चित्तम् । तथा तपः कुर्वतां निन्दाकरणे विघ्नकरणे अन्तरायकरणे, चशब्दात् **प्रत्यनीकता** प्रद्विष्टताऽऽशातनादिषु च प्रत्येकं **लघुमासः** । एवं सामान्येन पर्युषणादिष्वष्टमाद्यकरणे च लघु । विशेषतः पुनरेवम्—पक्खिए विसेसतवं अकरिंतस्स बालस्स पणगं, वुड्ढस्स लघु, तरुणस्स गुरु । चाउम्मासिए बालस्स लहु, वुड्ढस्स गुरु, तरुणस्स चउलहु । संवच्छरिए बालस्स गुरु, वुड्ढस्स चउलहु, तरुणस्स चउगुरु—इति ।।१०३।।

**संकेयद्धाभंगे अट्ठसयं लहू गुरू तदहियं वा ।**
**तम्मत्तं वा चरिमाकरणे भंगे लहू वमणे ।।१०४।।**

व्याख्या—**सङ्केतप्रत्याख्यान**मङ्गुष्ठग्रन्थिसहितादि । **अद्धाप्रत्याख्यानं** नमस्कारसहित—पौरुषीसार्द्धपौरुषी—पुरिमार्द्धादि । एतयोरुपलक्षणत्वाद् द्व्यासनैकासनादीनां च भङ्गेऽ**ष्टोत्तरशतं** नमस्काराणामिति शेषः । '**लहु**'' त्ति । अन्ये त्वेतेषां भङ्गे **लघुमासमाहुः** । '**गुरु**'' त्ति । अपरे तु गुरुमासम् । '**तदहियं व**' त्ति।

केचिन्नमस्कारसहित—पौरुषी—पुरिमार्द्धा—पार्द्ध—द्व्यासनै—कासन—निर्विकृतिका—चाम्ल—क्षपणानां भङ्गे **तदधिक**प्रत्याख्यानदानम् । **'तम्मत्तं व'** ' त्ति । इतरे पुनर्यदेवैकासनादि प्रत्याख्यानं भज्यते **तदेव** भणन्ति । एकासनादीत्यर्थः । क्वचिदेवं व्याख्या—सङ्केतभङ्गे नमस्काराणामष्टोत्तरशतम् । अन्ये तु लघुमासं चाहुः । अद्धाभङ्गे तदधिकम् , यथा क्षपणभङ्गे क्षपणद्वयम् , ग्रन्थिसहितादिभङ्गे नमस्कारशतद्वयं तावन्मात्रमेव वा स्यादिति । तथा **'चरिम'** ' त्ति । **'पदैकदेशे पदसमुदायोपचारात्'** ' दिवसचरिमप्रत्याख्यानस्याकरणे ग्लानत्वादिकारणाभावेऽप्यविधाने **भङ्गे** च प्रत्येकं **लघुमासः** । मतेन पञ्चकम् । अन्ये तु पानकासंवरणे पञ्चकम् । **वमनात्** प्रत्याख्यानभङ्गे लघु । मतेन पञ्चकम् । मतान्तरेण सर्वप्रत्याख्यानभङ्गे प्रत्येकं भिन्नमिति गाथार्थः ।।१०४।।

अथ वीर्याचारविषयं प्रायश्चित्तविधिमाह—

**भिन्नाइ सयं पारे पच्छकयाऽविहिकए अपुन्नकए ।**
**गुरुमासाइ अकरणे इग—दु—ति—चउवंदणुस्सग्गे ।।१०५।।**

व्याख्या—उत्सर्गतो गुरुसामग्रीसद्भावे गुरुणा सार्द्धं प्रतिक्रमणं कुर्यात् **'पडिकमणं सह गुरुणा'** इति वचनात् । तत्र गुरुभिः सार्द्धं प्रतिक्रमणं कुर्वन् श्राद्धो यदि गुरुणा कायोत्सर्गे अपारिते **स्वयं प्रथमं पारयति**, गुरुणा वा कायोत्सर्गे कृते **पश्चात्क्षण**मात्रेण करोति, **अविधिना** वा घोटकलताद्यावश्यकसूत्राद्युक्त—कायोत्सर्गैकोनविंशतिदोषैर्दुष्टं करोति, **अपूर्णं** वा निजनिजप्रमाणतो न्यूनमुपलक्षणादधिकं वा करोति । एतद्दोषदुष्टेष्वेकद्वित्रिचतुःसङ्ख्येषु कायोत्सर्गेषु **'भिन्नाइ'** ' त्ति । **भिन्नादि** प्रायश्चित्तं भवति । तथाहि—एकस्मिन्नुत्सर्गे स्वयं पारिते पश्चात्कृते अविधिना कृते अपूर्णकृते वा भिन्नमासः । एवं द्वयोरुत्सर्गयोर्लघुमासः । त्रिषु कायोत्सर्गेषु गुरुमासः । चतुर्षु कायोत्सर्गेषु चतुर्लघवः । तथा **'ऽकरणे'** ' त्ति । निद्रालस्यादिना सर्वथा पुनरकरणे एकस्योत्सर्गस्य लघुमासः । द्वयोर्गुरुमासः । त्रिषु चतुर्लघु । चतुर्षु चतुर्गुरु प्रायश्चित्तं भवति । एवं वन्दनकेऽपि प्रायश्चित्तविधिर्भावनीयः । तथाहि—वन्दनकं गुरोः पूर्वं पश्चाद्वा दत्ते, अविधिना न्यूनाधि—कावश्यकत्वादिना दत्ते, अपूर्णं वा पदवाक्यछन्दना (? आ) दिभिर्न्यूनं वा दत्ते । तत्रैकस्य वन्दनकस्य गुरोः पूर्वं पश्चाद्वा दानादौ भिन्नमासः । द्वयोर्वन्दकयोर्लघुमासः । त्रयाणां वन्दनकानां गुरुमासः । चतुर्णां वन्दनकानां चतुर्लघु । सर्वथा त्वदत्ते एकस्मिन् वन्दनके लघुमासः । द्वयोर्वन्दनकयोर्गुरुमासः । त्रिषु वन्दनकेषु चतुर्लघु । चतुर्षु वन्दनकेषु चतुर्गुरु प्रायश्चित्तं भवतीति गाथार्थः ।।१०५।।

**पडिकमणस्साकरणे चउगुरु चउलहु बइट्ठपडिकमणे ।**
**गुरु वंदणगाकरणे बइट्ठकरणे अ लहुमासो ।।१०६।।**

व्याख्या—श्राद्धो निष्कारणं **प्रतिक्रमणं न करोति चतुर्गुरु**, आलस्यादिनोपविष्टः सन् करोति **चतुर्लघु** प्रायश्चित्तं भवतीति । एवं **वन्दनकं न ददाति गुरुमासः, उपविष्टः** सन् **ददाति लघुमासः** प्रायश्चित्तं भवति । **चशब्दा**त्क्षमाश्रमणादेरविधिना दानादानयोर्भिन्नादि ज्ञेयमिति गाथार्थः ।।१०६।।

अथ वीर्यातिचारमेव सामान्येनाह —

**पडिकमण–दाण–पूआ–तव–सज्झायाइ थोवकरणंमि ।**
**गुरुगो बहुसामत्थे लहु नियमे मुणि–जिणानमणे ।।१०७।।**

व्याख्या—सामान्येन नियमे सति बहुकरणसामर्थ्येऽपि **प्रतिक्रमणं स्तोकं करोत्येक**वारमित्यर्थः । एवं **दाने** सप्तक्षेत्र्यादिविषये शक्तिं निगूहति । **पूजायाश्च** त्रिकालकरणसामग्र्यामेकवेलादिकरणे । एवं तपःस्वाध्यायसंविभागादिविषयेऽपि स्तोककरणे **गुरुमासः** । तथा **नियमे** सति दिनमध्ये **देव–गुरूणामवन्दने लघुमासः** प्रायश्चित्तं भवतीति गाथार्थः । इह च सामान्येन वीर्याचारे निगूहिते चतुर्लघु । विशेषतस्तु— **'नाणाइ निगूहि गुरू दव्वाइ अभिग्गहागहे य लहु'** । **नाणे** पढणगुणणाइसु आलस्सं करेइ । **दंसणे** वच्छल्लकरणाइसु न उज्जमइ । **चरित्ते** मूलउत्तरगुणेसु पमायं करेइ । **तवंमि** विणयवेयावच्चाइ न करेइ । मासगुरु प्रायश्चित्तं भवतीति । द्रव्यक्षेत्रकालभावाद्यभिग्रहाणामग्रहणे, तुशब्दाद्भङ्गे च लघु । **'मायाए अप्पाणं नाणतवविरिआइसंजुयं कहंतस्स लहु'** इति ।।१०७।।

अथ विस्मृताज्ञातकृतादिसर्वाचारातिचारानाश्रित्याह —

**चउम्मासिअवरिसे सामन्नालोअणासु पाएण ।**
**विम्हरिअन्नायकए सुद्धस्स वि पंचकल्लाणं ।।१०८।।**

व्याख्या—**चातुर्मासिकायां वार्षिकाया**मनिर्द्धारितवर्षसङ्ख्यबालालोचनारूपायां **सामान्यायां** वाऽऽ–**लोचनायां** प्रत्येकं **पञ्चकल्याणम्** । अन्ये त्वाहुः—प्रतिवर्षमालोचनाग्राहिणः पञ्चाचारान् प्रति प्रत्येकं **पञ्चकल्याणं** पञ्चाशच्चतुर्गुरुका इत्यर्थः । अपरे पुनः प्राहुः—आलोचनानन्तरं यावन्ति वर्षाणि यान्ति तावन्ति पञ्चकल्याणानि दीयन्ते । एतत्पञ्चकल्यादि प्रायश्चित्तं किंविषयम् ? इत्यत आह — **'विम्हरिए'** त्यादि । **विस्मृताज्ञातकृतविषये** । अयमर्थः—एतत्तप आलोचयतो यत्किमपि अनाभोगादिना विस्मृतम्, यच्च पूर्वमतिचारकरणकाले न ज्ञातं तदाश्रित्य ज्ञेयम्, न पुनर्मायादिना निगूहितातिचारविषयेऽपि ।

एतच्च कस्य ? इत्याह—'**सुद्धस्स वि**' ' त्ति । **शुद्धस्यापि** सामान्येन निरतिचारस्य, **अपिशब्दात्** सातिचारस्यैकं समासेवितानेकातिचारायातं प्रायश्चित्तम्, द्वितीयं च वर्षाद्यापन्नमिदं दीयते इति । आलोचनाप्रवेशावधिकाल उत्कर्षतोऽपि वर्षपर्यन्त एव दीयते नाधिक इत्येके । अन्ये त्वाहुर्बालालोचनाया वर्षत्रयमिति । अपरे पुनर्यथाशक्ति इतिगाथार्थः ।।१०८।।

सम्प्रति विशेषाभिधानाय प्रस्तावनामाह —

**पायमिमं ओहुत्तं विभागओ हीणमहिअ तम्मत्तं ।**

**दिज्जा नाउं दव्वाइ—पुरिस—पडिसेवणविसेसे ।।१०९।।**

व्याख्या—**प्रायो** बाहुल्येनेदं पूर्वोक्तं प्रायश्चित्तदानं **ओघेन** सामान्येन **उक्तं** द्रव्याद्यविभागतः प्रतिपादितम्, **विभागतो** विशेषतः पुनर्हीनमधिकं **तन्मात्रं** वा जीतोक्तमात्रमेव वा दद्यात् प्रायश्चित्तमितिशेषः । किं कृत्वेत्याह— '**नाउं**' ' ति । **ज्ञात्वा** अवगम्य द्रव्यादिपुरुषप्रतिसेवनाविशेषान् । अयमत्र भावार्थः—द्रव्यक्षेत्र—कालभावपुरुषप्रतिसेवनाविशेषेषु हीनेषु हीनम्, अधिकेष्वधिकम्, अहीनोत्कृष्टेषु **तन्मात्रं** जीतोक्तसममेव प्रायश्चित्तं दद्यादिति गाथार्थः ।।१०९।।

तत्र द्रव्यक्षेत्रकालाभिधित्सयाऽऽह —

**दव्वे सुलहे बलिए य अहिअमूणं व दुब्बले दुलहे ।**

**खित्ते ऊणहिअं रुक्ख सीयले एव काले वि ।।११०।।**

व्याख्या—आहारादिकं **द्रव्यं** यत्र देशे **सुलभं बलिकं** च स्यात् । यथा—अनूपदेशे शालिकूरो बलिकः स्वभावेनैव सुलभश्च तस्मिन् सत्यधिकं जीतोक्ताद् **बहुतरमपि** दद्यात् । यथा यत्र पुनर्वल्लचणक—काञ्जिकादिको रूक्षाहारो **दुर्लभो दुर्बलश्च** तस्मिन् सति ऊनं हीनं जीतोक्तादल्पमपि दद्यात्, **चशब्दात्** साधारणे द्रव्ये जीतोक्तमेव दद्यात् । न हीनमधिकं वेत्यनुक्तमपि ज्ञेयम् । तथा **क्षेत्रे** ग्रामादौ **ऊनमधिकं** तन्मात्रं वा दद्यात् । किंविशिष्टे ? इत्याह—**रूक्षे** स्नेहरहिते, उपलक्षणाद्वातिले वा हीनम् , **शीतले** पुनः स्निग्धे अनूपे वा क्षेत्रे जीतोक्तादधिकमपि दद्यात्, चशब्दात् साधारणं चानुक्तमपि ग्राह्यम् । तत्र साधारणे **मध्यस्थे** अस्निग्धरूक्षे जीतोक्तमात्रमेव दद्यान्न पुनरूनाधिकम् । तथा— '**एव काले वि**' त्ति । **एवममुनैवोक्तप्रकारेण** जीतोक्ताऽधिकसमहीनानि तपांसि **कालेऽपि** त्रिविधे—वर्षाशिशिरग्रीष्मलक्षणे यथासङ्ख्यं दद्यादिति सामान्यातिदेश इति गाथार्थः ।।११०।।

इति सामान्येन कालस्वरूपातिदेशमभिधाय विशेषतः कालस्वरूपाभिधित्सयाऽऽह —

**बहु–अबहु–थोवसीओ निद्धो उक्कोसमज्झिमजहन्नो ।**
**इअ रुक्खो उण्हतिगे काले गिम्हो सिसिरवासा ।।१११।।**

व्याख्या–अत्र सामान्येन कालो द्विधा–स्निग्धो रूक्षश्च । स च द्विरूपोऽप्युत्कृष्टमध्यमजघन्यभेदात्त्रिधा । तदेवाह–**बहु–अबहु–स्तोक–शीतः स्निग्धः । बहु** घनं **अबहु** मध्यमं **स्तोक**मल्पं च **शीतं** यस्मिन् स तथारूपः कालः **स्निग्धः । स चोत्कृष्टो मध्यमो जघन्यश्च ।** तत्रोत्कृष्टस्निग्धो बहुशीतः मध्यमस्निग्धोऽ–बहुशीतः । जघन्यस्निग्धः स्तोकशीतः । **'इय'** ' त्ति । **इतिः** पूर्वोक्तप्रकारसमावेशार्थः । ततश्चेति–पूर्वोक्त–प्रकारेण **रूक्षो**ऽपि त्रिविधः । क्व सति ? **उष्णत्रिके** बह्वबहुस्तोकोष्णत्वे सति । इदमुक्तं भवति–उत्कृष्टरूक्षो बहूष्णः । मध्यमरूक्षोऽबहूष्णः । जघन्यरूक्षः स्तोकोष्णः । स च स्निग्धो रूक्षोऽपि कालस्त्रिविधः । **ग्रीष्मः शिशिरो वर्षालक्षणश्च** । अयमर्थः–स्तोकशीतो जघन्यस्निग्धो बहूष्ण उत्कृष्टरूक्षश्च ग्रीष्मः । अबहुशीतो मध्यमस्निग्धोऽबहूष्णो मध्यमरूक्षश्च शिशिरः। बहुशीत उत्कृष्टस्निग्धः स्तोकोष्णो जघन्यरूक्षश्च वर्षा इति। इदमत्र तात्पर्यम्–ग्रीष्मशिशिरवर्षासु यथाक्रमं चतुर्थषष्ठाष्टमानि जघन्यानि, षष्ठाष्टमदशमानि मध्यमानि, अष्टमदशमद्वादशान्युत्कृष्टानि दद्यात् । एतच्चाग्रे स्वयमेव वक्ष्यति । इति गाथार्थः ।।१११।।

इत्युक्तं कालद्वारम् । साम्प्रतं भावविषयं प्रायश्चित्तं पुरुषस्वरूपं चाह —

**हट्ठस्स दिज्ज भावे न गिलाणस्स व सहिज्ज जं च तयं ।**
**दिज्ज सहिज्ज व कालं पुरिसा सह असह असढाई ।।११२।।**

व्याख्या–**भावे** भावतः कश्चिदालोचनाग्राही **हृष्टो** निरोगः समर्थः । कश्चिद् **ग्लानो** रोगी शक्तिविकलश्च । इत्येतद्विचार्य **हृष्टस्य** जीतोक्तादधिकमपि **दद्यात्, ग्लानस्य तु न दद्यात्, वा**शब्दाज्जीतोक्तादूनं वा दद्यात्। **यच्च वा यावन्मात्रं स सहते** कर्त्तुं शक्नुयात् तत्प्रायश्चित्तं **तावन्मात्रं** ग्लानादेरालोचनाग्राहिणो **दद्यात्** । **कालं वा सहते** यावता स प्रगुणो भवति, तावन्तं कालं प्रतीक्षेत, रोगनिवृत्तौ समर्थस्य सतो **दद्या**दित्यर्थः। उक्तो भावः । साम्प्रतं सङ्क्षेपेण पुरुषद्वारमाह–तत्र केचित् पुरुषा आलोचनाग्राहिणः **सहाः** सर्वप्रकारैः समर्थाः । अपरे **असहा** असमर्थाः । तथा केचिद**शठाः** सरलात्मानः, **आदि**शब्दात् केचिच्छठा मायाविनः। एवं गीतार्थपरिणामकादयश्च भवन्तीतिशेषः । ते च गीतार्थादयोऽमी । इह प्रवचने अनेकविधाः शिष्याः–गीतार्थाः परिणामका अपरिणामका अतिपरिणामकाः शैक्षा उच्छृङ्खलाश्चेति । तत्र गीतार्थो–**'गीयं भण्णइ सुत्त'** ' मित्यादिगाथोक्तस्वरूपः । तथोत्सर्गे उत्सर्गमपवादे चापवादं यथा भणितं ये श्रद्दधति आचरन्ति च ते परिणामकाः । ये पुनरुत्सर्गमेव श्रद्दधत्याचरन्ति च, अपवादं तु न श्रद्दधत्याचरन्ति वा ते

अपरिणामकाः । ये चापवादमेवाचरन्ति, नोत्सर्गं ते अतिपरिणामकाः । **शैक्षा** नवदीक्षिताः **उच्छृङ्खला** उल्लुण्ठाः, अपरिणामकादयोऽपात्रं न सिद्धान्तरहस्ययोग्या इति गाथार्थः ।।११२।।

एवं विचार्य किं कार्यम् ? इत्यत आह —

**जो जह सत्तो बहुतरगुणो अ तस्साहियंपि दिज्जाहि ।**

**हीणस्स हीणतरयं झोसिज्ज व सव्वहीणस्स ।।११३।। भणियं च ।**

व्याख्या—पूर्वोक्तपुरुषाणां सहाऽसहादीनां मध्याद्यो **यथा शक्तः** तपः कर्त्तुं क्षमः **बहुतरगुणो वा** धृतिसंहननादिसम्पन्नः परिणतादिर्वा भवेत्, **तस्याधिकमपि** जीतोक्तादतिरिक्तमपि दद्यात् । तथा **हीनस्य** धृतिसंहननादिरहितस्यापरिणतादेर्वा **हीनतरं** जीतोक्तादल्पतरं दद्यात् । तथा **सर्वहीनस्य** सर्वथा धृतिसंहननादिशक्तिविकलस्य झोषयित्वा मिथ्यादुष्कृतेनैव तस्य शुद्धिरादेश्येत्यर्थ इति गाथार्थः ।।११३।।

**'भणियं च'** 'त्ति । **भणितं** चागमे इतिशेषः । किमित्याह —

**पणगं मासविवड्ढिं मासगहाणीय पणगहाणीय ।**

**एगाहे पंचाहं पंचाहे दिंति एगाहं ।।११४।।**

**रागद्दोसविवड्ढिं हाणिं वा नाउं दिंति पच्चक्खी ।**

**चउदसपुव्वाई वि हु तह नाउं दिंति ऊणहिअं ।।११५।।**

व्याख्या— **'रागद्दोसे'** त्यादि द्वितीयगाथापूर्वार्द्धम् । **रागद्वेषयोर्विवृद्धिं हानिं वा ज्ञात्वा** अवगम्य **प्रत्यक्षिणः** प्रत्यक्षज्ञानिनः केवलमनःपर्यायावधिज्ञानिनोऽधिकं हीनं वा जीतोक्ताद्ददतीति क्रियासम्बन्धः। कथमित्याह—**'पणग'** ' मित्यादि । प्रत्यक्षागमज्ञानिनस्तुल्ये अपराधे सति **पञ्चक**योग्यपुरुषस्य स्वरूपं विचार्यैकस्य **पञ्चकं** भिन्नं **ददति**, अपरस्य तु **रागद्वेषविवृद्धिमुपलभ्य मासविवृद्धिं** मासेन मासाभ्यां मासैर्वा वृद्धिं **प्रयच्छन्ति** पञ्चकस्थाने लघुमासादिकं वा ददतीत्यर्थः । उपलक्षणमेतत् मूलमनवस्थाप्यं पाराञ्चिकं वा यच्छन्ति । तथा तुल्येऽपि पाराञ्चिकयोग्ये अपराधे एकस्य पाराञ्चिकमपरस्यानवस्थाप्यं मूलं छेदं वा **मासेन मासाभ्यां मासैर्वा हान्या** तपश्चशब्दात् पञ्चकं यावदन्ते नमस्कारसहितं, हा ! दुष्टं कृतं, हा ! दुष्टं कारितं, हा ! दुष्टं अनुमोदितं मयेत्येवं वैराग्यभावनातो **रागद्वेषहानिं** भूयसीमतिभूयस्तरा**मुपलभ्य प्रयच्छन्ति**। तथा कस्यचिन्मासिकप्रतिसेवनायामल्पां **रागद्वेषहानिमुपलभ्य पञ्चकहान्या** मासिकं **ददति** पञ्चविंशतिं दिनानि ददतीत्यर्थः । तथा एकाहं नामाऽभक्तार्थः तस्मिन् प्रतिसेविते कस्यचिद्रागद्वेषवृद्धिमुपलभ्य पञ्चाहं ददति । तथा अपरस्य **रागद्वेषहानिमुपलभ्य पञ्चाहे** प्रतिसेविते **एकाहमुपलक्षणत्वा**—

दाचाम्लमेकाशनं पूर्वार्द्धं निर्विकृतिकं पौरुषीं नमस्कारसहितं वा प्रयच्छन्तीति । नन्वेवं प्रत्यक्षागमज्ञानिन एव ददत्युतान्येऽपि ? इत्यत आह — **'चउदसपुव्वाई'** त्यादि द्वितीयगाथोत्तरार्द्धम् । हुर्निश्चये । एवं **चतुर्दशपूर्व्यादयोऽपि**, आदिशब्दान्नवदशादिपूर्वधरा एकादशाङ्ग–निशीथादिश्रुतधारिणोऽपि, **तथा** तेनैव प्रकारेण रागद्वेषयोर्वृद्धिं हानिं वा **ज्ञात्वा** जीतोक्ता**दधिकमूनं** वा प्रायश्चित्तं ददति । अत्राधिकशब्दस्य पुरोनिपातश्छन्दोनुरोधादवसेय इति गाथाद्वयार्थः ।।११४-११५।।

इदं च प्रायश्चित्तं पुरुषाणामिव स्त्रीणामपि दातव्यमित्यत आह —

**एयं पायच्छित्तं जह पुरिसाणं तहेव इत्थीणं ।**
**नाऊण सत्तमेसिं दिज्जाहि विसोहणट्ठाए ।।११६।।**

व्याख्या–**एतच्च प्रायश्चित्तं यथा** येनैव प्रकारेण **पुरुषाणां** दातव्यमुक्तं **तथैव** तेनैव प्रकारेण **स्त्रीणामपि** दातव्यम् । किं कृत्वेत्याह–**ज्ञात्वा सत्त्वं** शक्ति**मासां** स्त्रीणां प्रायश्चित्तं **दद्यात्** । किमर्थमित्याह **विशोध–नार्थाय** पूर्वकृतातिचारमलक्षालनायेति गाथार्थः ।।११६।।

उक्तं पुरुषद्वारमिदानीं प्रतिसेवनाद्वारमाह —

**संकप्प–वग्गणाई–कंदप्प–ण्णाणकारणाईआ ।**
**आउट्टि–दप्प–पमाय–कप्प–पडिसेवणा चउहा ।।११७।।**

व्याख्या–**आकुट्टिका–दर्प–प्रमाद–कल्पैः** क्रियमाणा **प्रतिसेवना चतुर्द्धा** चतुष्प्रकारा भवति । कथम्भूता? इत्याह–**सङ्कल्प** उपेत्य सावद्यकरणोत्साहात्मकः, **वल्गनादिः** वल्गनडेपनधावनादिः, **कन्दर्पो** हास्यजन–कवचनादिरूपः, **ज्ञानं** विशेषश्रुतज्ञानग्रहणं तदेव कारणं ज्ञानकारणम् । एतानि चत्वार्यप्यादौ यस्यां सा तथा । इह चादिशब्दः प्रत्येकं योज्यते । ततोऽयमर्थः–सङ्कल्पादिका आकुट्टिकाप्रतिसेवना । वल्गनादिका दर्पप्रतिसेवना। कन्दर्पादिका प्रमादप्रतिसेवना। **ज्ञानकारणादिका कल्पप्रतिसेवना** । एवं **चतुर्द्धा** प्रतिसेवनेति । इदमुक्तं भवति–**सङ्कल्पेन** या क्रियते साऽऽ**कुट्टिका प्रतिसेवना** । **वल्गनादिभिर्या** क्रियते सा **दर्पप्रतिसेवना** । **कन्दर्पेण** दिवा रात्रौ वा प्रतिलेखनाप्रमार्जनाद्यनुपयुक्ततया वा या क्रियते सा **प्रमादप्रतिसेवना** । **ज्ञानदर्शनादिना** चतुर्विंशतिभेदेन **कारणेन** गीतार्थेन कृतयोगिनोपयुक्तेन पुरुषेण यतनया या क्रियते सा **कल्पप्रतिसेवनेति** गाथार्थः ।।११७।।

उक्ताः स्वरूपतः प्रतिसेवनाः । सम्प्रति तास्वेव प्रायश्चित्तविधिमाह —

**भणियमिणं तु पमाए दप्पे वड्ढिज्ज ठाणमाउट्टिए ।**
**ठाणांतरं व दिज्जा कप्पे पडिकमणमुभयं वा ।।११८।।**

व्याख्या—**इदं तु** जीतव्यवहारेण यत्तपोदानं **भणितमुक्तम्**, तत् **प्रमाद** एवोक्तम् प्रमादप्रतिसेवनाकारिणः पुरुषस्यैवोक्तम् । **दर्पे** दर्पप्रतिसेवनाकारिणः पुरुषस्य पुनः **स्थानं** प्रमादप्रतिसेवकप्रायश्चित्तस्थानादेकं स्थानान्तरं **वर्द्धयेत्** । अयमर्थः—प्रमादप्रतिसेवनया भिन्नमास—लघुमास—गुरुमास—चतुर्लघु—चतुर्गुरु—षड्लघु—षड्गुरूणामापत्तौ निर्विकृतिक—पुरिमार्द्धैकाशनाचाम्ल—चतुर्थ—षष्ठाष्टमाख्यं तपो दीयते । दर्पप्रतिसेवनाकारिणस्तु भिन्नमासादीनामापत्तौ सत्यां स्थानान्तरवृद्धिः कार्या—निर्विकृतिकं मुक्त्वा पुरिमार्द्धादीनि दशमान्तानि तपांसि देयानीत्यर्थः । तथा **आकुट्टिकायाम्** आकुट्टिकाप्रतिसेवनायां पुनः **स्थानान्तरं वा दद्यात्**। दर्पप्रतिसेवाकारिणः सकाशात् स्थानवृद्ध्याऽधिकं तपःस्थानं वितरेत् । दर्पाऽऽसेविनो हि भिन्नमासाद्यापत्तौ पुरिमार्द्धादीनि दशमान्तानि दीयन्ते । अस्य त्वेकाशनादीनि द्वादशमान्तानि देयानि, वाशब्दात् स्वस्थानमेव वा दद्यात् । इहापत्तिरूपं प्रायश्चित्तं स्वस्थानमुच्यते । यथाऽऽकुट्टिकायां पञ्चेन्द्रियवधे मूलम् । अन्यत्रापि चाकुट्टिकायां यत्रापराधजाते यद्भिन्नमासादिकमुक्तं तत्तत्र स्वस्थानम् । तदेवाकुट्टिका—प्रतिसेविनो दद्यादित्यर्थः । तथा **कल्पे** कल्पप्रतिसेवनायां प्रतिसेवितायां **प्रतिक्रमणं** मिथ्यादुष्कृतं प्रायश्चित्तम् । **वा** अथवा **उभयम्** आलोचनामिथ्यादुष्कृतोभयरूपं प्रायश्चित्तं द्वयं दद्यादिति गाथार्थः ।।११८।।

अथ के ते कल्पचतुर्विंशतिभेदाः ? इत्याह —

**दंसणनाणचरित्ते तवपवयणसमिइगुत्तिहेउं वा ।**<br>
**साहम्मिअवच्छल्लत्तणेण (वावि) कुलओ गणस्सेव ।।११९।।**<br>
**संघस्सायरिअस्सा असहस्स गिलाणबालवुड्ढस्स ।**<br>
**उदयग्गिचोरसावय — भयकंतारावइवसणे ।।१२०।।**

व्याख्या—यद्यपि पूर्वं ज्ञानादयश्चतुर्विंशतिः कल्पस्य भेदा उक्ताः, तथाप्यत्र ज्ञानदर्शनयोः समानत्वख्यापनार्थं छन्दोनुरोधाच्च दर्शनादय उच्यमाना न दोषाय । ततो **'दंसण'** 'त्ति । **'व्याख्यानतो विशेषप्रतिपत्ति'**—रितिन्यायाद्**दर्शनं** दर्शनप्रभावकाणि प्रमाणशास्त्राणि गृह्णन्नसंस्तरे अकल्प्यमपि यतनया प्रतिसेवमानः शुद्धोऽप्रायश्चित्त इत्यर्थः । एवं सर्वत्र यथायोगं भावना कार्या १ । एवं **ज्ञानं** विशेषश्रुतज्ञानं तद् गृह्णन्नसंस्तरे अकल्प्यमपि यतनया प्रतिसेवमानः शुद्धः २ । तथा **चारित्र—तपः—प्रवचन—समिति—गुप्तिहेतुषु** पञ्चसु सम्यगाराध्यमानेष्वपि द्रव्यक्षेत्रादिवैषम्याद् बहुविराधनासम्भवमुत्पत्स्यमानं कञ्चिदुपद्रवं सम्भाव्य तत्परिहारार्थं यतनया कमप्युपायं कुर्वतः कापि स्वल्पा विराधना सम्भवेत् तथापि शुद्धः, प्रवचनार्थं विष्णुकुमारवत् ३-७। तथा **साधर्मिकवात्सल्येनापि** साधर्मिकवात्सल्यमाश्रित्य तत्समाधानाय किञ्चिन्निषिद्धमपि यतनया

कुर्वीत श्रीवज्रस्वामिवत् ८। **कुलगणकार्ययोः सङ्घकार्ये** वा समुत्पन्नेषु वशीकरणोच्चाटनाभिचारादीनि राजादिकमुद्दिश्य प्रयुङ्क्ते चूर्णयोगादीन् वा करोति ९-११। **आचार्यासहिष्णुग्लानबालवृद्धानां** येन समाधिर्भवति तदपि तदुपकाराय यतनया करोति । तत्र राजयुवराजामात्यश्रेष्ठिपुरोहिता असहिष्णवः पुरुषा भण्यन्ते १२-१६। **उदकाग्निचौरश्वापदादीनामागमनं** दृष्ट्वा उदकपूर—प्रदीपन—तस्कर—व्याघ्रादीन् स्तम्भनविद्यया स्तभ्नीयात् विद्याया अभावे पलायेत १७-२०। **भयं** व्याघ्रादेः (धाट्यादेः) तस्मिन् सति पलायमानः पृथिव्यादीन् विराधयेत् २१। **कान्तारे** चान्नपानाद्यप्राप्तौ निषिद्धमपि स्वल्पदोषमाहारादिकं सशङ्कः सन् यतनया गृह्णीयात् २२। **आपच्चतुर्द्धा**—द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्र **द्रव्यापत्** प्रासुकान्नपानाद्यलाभः, **क्षेत्रापत्** दीर्घाध्वप्रतिपन्नत्वम्, **कालापद्** दुर्भिक्षादिः, **भावापद्** ग्लानत्वादिः, तस्यां किञ्चित्प्रतिषिद्धमपि यतनया समाचरेत् २३। **व्यसनं** गीतताम्बूलाद्यभ्यासो, गीतव्यसनितया सामायिकपौषधस्थोऽपि गीतोच्चारं कुर्यात् ताम्बूलव्यसनितया वा निषिद्धताम्बूलोऽपि शुष्कपत्रादि मुखे प्रक्षिपेत् २४। एष चतुर्विंशतिभेदः कल्प इति गाथार्थः ।। ११९-१२० ।।

अथ पूर्वोक्तमेवार्थं दृढयन्नाह —

**इअ दव्वाइ बहुगुणे गुरुसेवाए य बहुअरं दिज्जा ।**
**हीणयरे हीणयरं हीणयरं जाव झोसत्ति ।।१२१।।**

व्याख्या—**इति** अमुना प्रकारेण **द्रव्यादौ** द्रव्यक्षेत्रकालभावाख्ये प्रतिसेव्ये **बहुगुणे** बहुगुणिते प्रचुरे दोषवत्त्वेन समर्थे वा विपरीतलक्षणया वा बहुदोषे **गुरुसेवायां** गुरुतरायां प्रतिसेवायां कृतायां **बहुतरं** प्रायश्चित्तं **दद्यात्** । तथा **हीनतरे** अल्पदोषे द्रव्यादिके प्रतिसेविते **हीनतरमल्पतरं** प्रायश्चित्तं दद्यात् । ततोऽपि हीनतरे **यावत्सर्वहीने** अत्यल्पदोषे द्रव्यादावल्पीयस्यां सेवायां **'झोस'** ' त्ति । **क्षपणा** ह्रासः कार्यः सर्वस्तोकं तपो देयमित्यर्थ इति गाथार्थः ।।१२१।।

इदं पूर्वव्यावर्णितस्वरूपं प्रायश्चित्तं परिणामानुरूपेणैव दद्यादित्याह —

**आलोअंते संकेससोहिओ नाउ दिज्ज तम्मत्तं ।**
**हीणं वा अहिअं वा छम्मासं बहुअपावेवि ।।१२२।।**

व्याख्या— **'आलोअंते'** ' इत्यत्र षष्ठ्यर्थे सप्तमी । ततश्चालोचयत आलोचनां गृह्णतः पुरुषस्य **सङ्क्लेश—विशुद्धितः** सङ्क्लिष्टविशुद्धपरिणामाभ्यां **ज्ञात्वा** स्वरूपमवगम्य **दद्यात्** । किमित्याह—**तन्मात्रं** जीतोक्तमात्रं प्रायश्चित्तम्, **हीनं वा** जीतोक्तादल्पं **वा, अधिकं** वा जीतोक्ताद् बहुतरं वा । **अयमर्थः— आलोचनाकाले—**ऽप्येकमप्यपराधविशेषं यः सर्वथा न प्रकाशयति, कथयन्नप्यर्द्धकथितं वा करोति स सङ्क्लिष्टपरिणाम इति कृत्वा तस्य जीतोक्तादधिकमपि दद्यात् । यः पुनः संवेगमुपगतो निन्दा—गर्हादिभिर्विशुद्ध—

परिणामः तस्य जीतोक्ताद्धीनमपि दद्यात् । यः पुनर्मध्यस्थपरिणामः तस्य जीतोक्तमात्रमेव दद्यादिति । तथा **बहुकेऽपि** मूलानवस्थाप्ययोग्येऽपि **पापे** कृते श्रीमहावीरस्यतीर्थे **षण्मासिकमेव** प्रायश्चित्तं दीयते नाधिकमिति । एतच्च प्रायश्चित्तं श्रावकाणां श्राविकाणां च शक्त्यादिकं विचार्य दातव्यमित्यर्थः ।।१२२।।

अथोक्तप्रायश्चित्तस्य भेदानाह —

**दाण—तव—कालपच्छित्तमिह तिहा गुरुलहुत्ति पुण दुविहं ।**
**गुरुमवि संतरदाणे लहु निरंतरि लहुवि गुरु ।।१२३।।**

व्याख्या—**दानतपःकालभेदात् प्रायश्चित्तमिह** जीते **त्रिधा** । दानप्रायश्चित्तं तपःप्रायश्चित्तं कालप्रायश्चित्तं चेति। एकैकं **गुरुकं लघुकं** च भवतीति **पुनरपि द्विविधम्** । तत्र दानप्रायश्चित्तद्वैविध्यमाह—**गुर्वपि** प्रायश्चित्तं **सान्तरदाने** अन्तरेण सह दीयमानं **लघु** भवति—दानमाश्रित्य लघुकमुच्यत इत्यर्थः । तथा **निरन्तरे** तु दाने **लघ्वपि** प्रायश्चित्तं **गुरुकं** भवति—दानमाश्रित्य दुष्करत्वाद् गुरुकमुच्यत इत्यर्थ इति गाथार्थः ।।१२३।।

उक्तं दानप्रायश्चित्तद्वैविध्यम्, सम्प्रति तपःकालप्रायश्चित्तद्वैविध्यं विवरीषुराह —

**छट्ठंतं तव लहुमट्ठमाइ तव गुरु जमुज्झई गिम्हे ।**
**तं लहुमवि कालगुरु गुरुवि लहुअं सिसिरवासे ।।१२४।।**

व्याख्या—भिन्नादिकं **षष्ठान्तं** षष्ठं यावद्दीयमानं प्रायश्चित्तं **तपो** लघु भण्यते, **अष्टमादिकं** तदेव दीयमानं **तपो गुरुर्भण्यते**—षष्ठान्तं तपो दीयमानं तप आश्रित्य लघुकमष्टमान्तं तपो दीयमानं तप आश्रित्य गुरुकमुच्यते इत्यर्थः । तथा **यद् ग्रीष्मे** निदाघकाले **ऊह्यते** तद् दानतपोभ्यां **लघ्वपि कालगुरु**, कालस्य दारुणत्वात् कालमाश्रित्य गुरुकमुच्यते । तथा दानतपोभेदाभ्यां **गुरुकमपि लघुकं** भवति, यत् **शिशिरे वर्षासु** चोह्यते, कालस्य स्निग्धत्वादिति भाव इति गाथार्थः ।।१२४।।

साम्प्रतं जीतव्यवहारयन्त्रकस्वरूपमभिधित्सुरिमां द्वारभूतां गाथामाह —

**ति—नव—सगवीस—इगसी पक्खे—आवत्ति—दाण—कालतिगे ।**
**नवतवसुअववहारे जंते दसरेह तिरिउड्ढं ।।१२५।।**

व्याख्या—अत्रैष नवविधतपोदानलक्षणः श्रुतव्यवहारस्त्रिभिर्नवभिः सप्तविंशतिभिरेकाशीतिभिश्च यथाक्रमं पक्षे आपत्तौ दाने कालत्रिके भवति । अयमर्थः—तत्र सङ्क्षेपतः तावदयं **त्रिभेदः** पक्षत्रयभेदात्, **आपत्तिभेदतः** पुनर्नवभेदः, **दानतपोभेदतस्तु सप्तविंशतिभेदः**, **कालत्रिकविशेषेण** पुनरेकाशीतिभेदश्च भवति । एतेषां सर्वेषामपि भेदानां स्वरूपं ग्रन्थकारः स्वयमेव पुरस्ताद् व्यक्तीकरिष्यति एवंविधभेदभिन्नश्च **नवविधत—पोदानलक्षणः श्रुतव्यवहारो यन्त्रके** स्थापितः सुखावसेयो भवतीत्यतो यन्त्रस्थापनामतिदिशति । यन्त्रे

स्थाप्यमाने तिर्यगूर्ध्वं च दश दश रेखा भवन्तीति । एतत्स्थापना च सकलभेदप्रतिपादनानन्तरं दर्शयिष्यते इति गाथार्थः ।।१२५।।

तत्र पूर्वं सामान्येन कालत्रयमाश्रित्य नवविधतपोदानश्रुतव्यवहारमेव दर्शयन्नाह —

**उववास–छट्ठअट्ठम जहन्न छट्ठट्ठमा दसममज्झा ।**
**अट्ठमदसमदुवालस जिट्ठ तिकाले तवो नवहा ।।१२६।।**

व्याख्या–अत्र विभक्तिलोपः प्राकृतत्वात्। ततस्त्रिकाले ग्रीष्मशिशिरवर्षालक्षणे कालत्रये **उपवासादिभिर्जघन्यमध्यमोत्कृष्टभेदेन नवधा** नवभेदं तपो भवति । तथाहि–ग्रीष्मशिशिरवर्षासु यथाक्रमं **चतुर्थषष्ठाष्टमानि जघन्यानि । षष्ठाष्टमदशमानि मध्यमानि । अष्टमदशमद्वादशान्युत्कृष्टानि** दीयन्ते । उक्तं च —

**'गिम्हासु चउत्थं दिज्जा छट्ठगं च हिमागमे । वासासु अट्ठमं दिज्जा तवो एस जहन्नगो ।।१।।**
**गिम्हासु छट्ठगं दिज्जा अट्ठमं च हिमागमे । वासासु दसमं दिज्जा एस मज्झिमगो तवो ।।२।।**
**गिम्हासु अट्ठमं दिज्जा दसमं च हिमागमे । वासासु दुवालसमं एस उक्कोसओ तवो' ।।३।।**

एष नवविधतपोदानलक्षणः श्रुतव्यवहारोपदेश उच्यते इतिशेष इति गाथार्थः ।।१२६।।

अथवा नवविधश्रुतव्यवहारोपदेशोऽयम् । तथैवाह —

**निविय–पुरिमासणंबिल–इगदुतिचउपंचखवण नवह तवो ।**
**सुयववहारुवएसा ओहेण विभागओ चेव ।। १२७ ।।**

व्याख्या–**निर्विकृतिकम्** १, **पुरिमार्द्धः** २, **एकाशनम्** ३, **आचामाम्लम्** १, **एकक्षपणं** चतुर्थम् २, **द्वे क्षपणे** षष्ठम् ३, **त्रीणि क्षपणानि** अष्टमम् १, **चत्वारि क्षपणानि** दशमम् २, **पञ्च क्षपणानि** द्वादशम् ३, **श्रुतव्यवहारोपदेशात्** श्रुतव्यवहारमाश्रित्य एवं प्रकारान्तरेण **नवधा** तपो भवति । अत्रापि विभक्तिलोपः प्राग्वत् । इदं च तपो द्विधा । **ओघेन** सामान्येन, **विभागतो** विशेषेण । **चैवशब्दौ** समुच्चये इति गाथार्थः ।।१२७।।

तत्रौघतः प्रागुक्तमेव । विभागतः पुनस्तपःस्वरूपप्रतिपादनार्थं **'यथोद्देशं निर्देश'** इति न्यायात् **'ति–नवे'** त्यादिपूर्वगाथोपन्यस्तेषु पक्षत्रयादिषु पूर्वं पक्षत्रयं स्पष्टयन्नाह —

**गुरु लहु लहुस तिपक्खा पिहो तिहाऽतिगुरु गुरुतरो गुरुओ ।**
**लहुतम लहुतर लहुओ लहुसतमो लहुसतर लहुसो ।।१२८।।**

व्याख्या–एष नवविधतपोव्यवहारः सङ्क्षेपतस्त्रिधा उत्कृष्टो मध्यमो जघन्यश्च । तत्र **गुरुतम–गुरुतर–गुरु–**रूपभेदत्रयात्मको गुरुपक्ष उत्कृष्टः, **लघुतम–लघुतर–लघु–**रूपभेदत्रयात्मको लघुपक्षो मध्यमः, **लघुस्वतम–लघुस्वतर–लघुस्वाख्यत्रिभेदो** लघुस्वपक्षो जघन्य इति । यदाह —

**'नवविहववहारे सो संखेवेणं तिहा मुणेयव्वो । उक्कोसो मज्झिमगो जहन्नगो चेव तिविहो सो ।।१।।**
**उक्कोसे गुरुपक्खो लहुपक्खो मज्झिमो मुणेयव्वो । लहुसपक्खो जहन्नो तिविगप्पो एस नायव्वो' ।।२।।**

व्याख्या—इदानीं प्रकृतगाथाक्षरार्थः—गुरुः १ लघुः २ लघुस्वः ३ लघुस्वशब्दश्चतुर्लघुकार्थः । स्वशब्दस्याल्पार्थ—कप्रत्ययार्थत्वादित्येते त्रयः पक्षाः **पृथक्** प्रत्येकं त्रिधा भवन्ति । त्रैविध्यं चैतेषां दर्शितमेवेति गाथार्थः ।।१२८।।

अथ नवविधापत्तितपोव्यवहारं दर्शयति —

**गुरुलहु छप्पणमासा चउतिगमासा दुमासगुरुमासो ।**
**लहुमास भिन्न वीसं पनरस दस पण तिपक्खकमा ।।१२९।।**
**उक्कोसमज्झहीण आवत्ति नव तिदाणकालतिगे ।**
**उक्कोसुक्कोसुक्कोसमज्झ उक्कोसगजहन्ना ।।१३०।।**
**मज्झुक्कोसा मज्झिममज्झिमगा तह य मज्झिमजहन्ना ।**
**जह उक्कोस जहन्नगमज्झा य जहन्नगजहन्ना ।।१३१।।**

व्याख्या—**'तिपक्ख'** ' त्ति । प्राकृतत्वात् सप्तमीसुपो लोपात्तेषु त्रिषु पक्षेषु गुरुलघुलघुस्वलक्षणेषु एता आपत्तय उत्कृष्टमध्यमजघन्यरूपाः क्रमादवगन्तव्याः । तथाहि—**गुरुपक्षे गुरुलघु षाण्मासिकपञ्चमासिकरूपा** उत्कृष्टापत्तिः । अयमर्थः—गुरुपक्षे उत्कृष्टापत्तौ गुरुभावेन षण्मासा लघुभावेन पञ्च मासाश्च भवन्तीति । एवमग्रेतनापत्तिद्वयेऽपि भावना कार्या । तथा गुरुपक्ष एव **चतुर्मासिकत्रिमासिकरूपा** मध्यमापत्तिः, **द्विमासिकगुरुमासरूपा** जघन्यापत्तिः । तथा उत्कृष्टापत्तौ लघुपक्षे **लघुमासः** सार्द्धसप्तविंशतिदिनरूपः उत्कृष्टापत्तिः। **भिन्नमासः** पञ्चविंशतिदिनानि मध्यमापत्तिः । **विंशतिदिनानि** जघन्यापत्तिः । तथा उत्कृष्टापत्तावेव लघुस्वपक्षे **पञ्चदश दिनान्युत्कृष्टापत्तिः** । **दश दिनानि** मध्यमापत्तिः । **पञ्च दिनानि** जघन्यापत्तिरित्येवं नवविधापत्तितपोरूपः श्रुतव्यवहारो दर्शितः । भणितं च —

**'गुरुपक्खे उक्कोसो मज्झजहन्नो य एव लहुएवि । एमेव य लहुसे वी इय एसो नवविहो होई ।।१।।**
**गुरुपक्खे छम्मासो पणमासो चेव होइ उक्कोसो । मज्झो चउतिमासो दुमासगुरुमासग जहन्नो ।।२।।**
**लहु—भिन्नमास—वीसा लहुपक्खोक्कोसमज्झिमजहन्ना । पनरसदसगं पणगं लहुसुक्कोसाइ तिविहो सो ।।३।।**
**आवत्तितवो एसो नवभेओ वण्णिओ समासेण । अहुणा उ सत्तवीसो दाणतवो तस्सिमो होइ'** ।।४।।

तथा **'तिदाण'** ' त्ति । तस्यापत्तितपसो नवविधस्य दानतपस्त्रिविधमुत्कृष्टमध्यमजघन्यलक्षणं सप्तविंशतिभेदं भवति । एकैकस्यामापत्तौ त्रीणि त्रीणि दानतपःस्थानानि भवन्तीति । तानि दानस्थानानि नवापत्तिभिर्गुणितानि सप्तविंशतिर्भवन्तीति भावः । **'कालतिग'** ' त्ति । तानि पुनः प्रत्येकं कालत्रिके वर्षाशिशिरग्रीष्मलक्षणे भवन्ति । **अत्रायमर्थः** सप्तविंशतिर्दानस्थानानि वर्षासु, सप्तविंशतिः शिशिरे, सप्तविंशतिर्ग्रीष्मे च भवन्तीति सप्तविंशतिस्त्रिभिर्गुणिता एकाशीतिर्भेदा भवन्तीति । तेषां च सप्तविंशतेर्दानतपःस्थानानां नामान्याह—तत्र गुरुपक्ष एकोऽपि नवधा । तद्यथा—**उत्कृष्टोत्कृष्टः उत्कृष्टमध्यमः उत्कृष्टजघन्यः, मध्यमोत्कृष्टः मध्यममध्यमः मध्यमजघन्यः, जघन्योत्कृष्टः जघन्यमध्यमः जघन्यजघन्यश्चेति** । एवं लघुपक्षोऽपि नवधा, लघुस्वपक्षोऽपि चैवमेव नवधा सर्वमीलने सप्तविंशतिर्भेदा भवन्ति । भणितं च —

'गुरु—लहु—लहुसगपक्खे इक्किक्को नवविहो मुणेयव्वो । उक्कोसुक्कोसो वा उक्कोसो मज्झिमजहन्नो ।।१।।
मज्झुक्कोसो मज्झिममज्झो तह होइ मज्झिमजहन्नो । इअ नेओ जहन्नो वि अ उक्कोसो मज्झिमजहन्नो ।।२।।
गुरुपक्खे नव एए नव चेव य हुंति लहुयपक्खेवि । नव चेव लहुसपक्खे सत्तावीसं भवंतेए' ।।३।।
इति गाथात्रयार्थः ।। १२९-३०-३१ ।।

अथैतेषु गुरु-लघु—लघुस्वलक्षणेषु त्रिषु पक्षेषु सप्तविंशतिविधं दानतपो व्यक्तीकरोति—

**तहिं बारस दसमट्ठम जिट्ठे मज्झि दसमट्ठमा छट्ठं ।**
**अट्ठमछट्ठचउत्थं जहन्नतिगि दाण गुरुपक्खे ।।१३२।।**

व्याख्या—तत्र पक्षत्रये क्रमेण तपः प्रतिपाद्यते, यथा—इह गुरुपक्षे षाण्मासिकपञ्चमासिकाख्योत्कृष्टापत्तौ सत्यामुत्कृष्टोत्कृष्टं द्वादशं तपः, उत्कृष्टमध्यमं दशमम्, उत्कृष्टजघन्यमष्टमम् । चातुर्मासिकत्रिमासिकाख्य—मध्यमापत्तौ मध्यमोत्कृष्टं दशमम्, मध्यममध्यममष्टमम्, मध्यमजघन्यं षष्ठम् । द्विमासिकगुरुमासाख्यजघन्या—पत्तौ जघन्योत्कृष्टमष्टमम्, जघन्यमध्यमं षष्ठम्, जघन्यजघन्यं चतुर्थम् । एवं गुरुपक्षे नवधा दानतपः प्रोक्तमिति गाथार्थः ।।१३२।।

अथ लघुपक्षे नवधा दानतपः प्रतिपादयति —

**इह दसमट्ठमछट्ठा अट्ठमछट्ठा चउत्थया कमसो ।**
**छट्ठचउत्थायामं लहुपक्खे दाण वासासु ।।१३३।।**

व्याख्या—लघुपक्षे लघुमासाख्योत्कृष्टापत्तावुत्कृष्टोत्कृष्टं दशमम्, उत्कृष्टमध्यममष्टमम्, उत्कृष्टजघन्यं षष्ठम्। भिन्नमासाख्यमध्यमापत्तौ मध्यमोत्कृष्टमष्टमम्, मध्यममध्यमं षष्ठम्, मध्यमजघन्यं चतुर्थम् । विंशत्याख्यज—घन्यापत्तौ जघन्योत्कृष्टं षष्ठम्, जघन्यमध्यमं चतुर्थम्, जघन्यजघन्यमाचामाम्लम् । इत्यमुनाप्रकारेण लघुपक्षे क्रमेण दानतपो नवविधमुक्तम् । एतच्च दानतपो वर्षास्ववगन्तव्यम् । पूर्वगाथोक्तमपि अग्रेतनगाथोक्तमपि चेति गाथार्थः ।।१३३।।

अथ लघुस्वपक्षे दानतपो नवविधं प्रतिपादयति —

**अट्ठमछट्ठचउत्थं छट्ठचउत्थंबिलं लहुसपक्खे ।**
**तह खवणंबिल आसण इअ अड्ढक्कंति सगवीसा ।।१३४।।**

व्याख्या—लघुस्वपक्षे पञ्चदशाख्योत्कृष्टापत्तावुत्कृष्टोत्कृष्टमष्टमम्, उत्कृष्टमध्यमं षष्ठम्, उत्कृष्टजघन्यं चतुर्थम् । दशकाख्यमध्यमापत्तौ मध्यमोत्कृष्टं षष्ठम्, मध्यममध्यमं चतुर्थम्, मध्यमजघन्यमाचामाम्लम् । पञ्चकाख्यजघन्यापत्तौ जघन्योत्कृष्टं चतुर्थम्, जघन्यमध्यममाचामाम्लम्, जघन्यजघन्यमेकाशनकम् । इत्येव—मर्द्धापक्रान्त्या वर्षासु सप्तविंशतिधा दानतपः । यदाह—

**'बारसमदसममट्ठम–छप्पणमासेसु तिविहदाणेणं । चउतेमासे दसमट्ठमछट्ठ उक्कोसगाइ तिहा ।।१।।**
**एमेवुक्कोसाई दुमासगुरुमासिए तिविह दाणं । अट्ठमछट्ठचउत्थं नवविहमेयं तु गुरुपक्खे ।।२।।**
**दसमं अट्ठमछट्ठं लहुमासुक्कोसगाइ तिह दाणं । अट्ठमछट्ठचउत्थं उक्कोसाई अ तिह भिन्नं ।।३।।**
**छट्ठचउत्थायामं उक्कोसाईण दाण वीसाए । लहुपक्खंमि नवविहो एसो बीओ भवे नवगो ।।४।।**
**अट्ठमछट्ठचउत्थं एसुक्कोसाइ दाण पन्नरसे । छट्ठचउत्थायामं दससु तिविहे य दाण भवे ।।५।।**
**खवणायामेगासण तिविहुक्कोसाइ दाण पणगंमि । लहुसे स तइअ नवगो सत्तावीसे सवासासु'।।६।।**

इति । अथ केयमर्द्धापक्रान्तिर्नाम । अर्द्धस्याऽसमप्रविभागरूपस्य एकदेशस्य एकपदात्मकस्यापक्रमणं–निवर्त्तनं शेषस्य तु द्व्यादिपदसङ्घातात्मकस्य एकदेशस्यानुवर्त्तनं यस्यां रचनायां सा समयपरिभाषयाऽर्द्धाप–क्रान्तिरुच्यते । यथा वर्षासु गुरुतमे उत्कृष्टतो द्वादशमम्, मध्यमतो दशमम्, जघन्यतोऽष्टमम् । एषां मध्यादेक–देशो द्वादशमलक्षणोऽपक्रामति, दशमाष्टमे गुरुतरं गच्छतः अग्रेतनं च षष्ठं मील्यते । ततश्च गुरुतरे उत्कृष्टतो दशमम्, मध्यमतोऽष्टमम्, जघन्यतः षष्ठम् । पुनरेषां मध्यादेकदेशो दशमलक्षणो निवर्त्तते, अष्टमषष्ठे गुरुकं गच्छतः अग्रेतनं च चतुर्थं मील्यते । ततश्च गुरुके उत्कृष्टतोऽष्टमम्, मध्यमतः षष्ठम्, जघन्यतश्चतुर्थमिति । यथा चेयमेकाशीतिके दानतपोयन्त्रके वर्षाद्यनवकेऽर्द्धापक्रान्तिर्दर्शिता । तथैव सर्वेष्वपि नवकेषु विलोकनीया । यदाह—

**'सिसिरे दसमाईणं चारणभेएण सत्तवीसेणं । ठायइ पुरिमड्ढंमि अड्ढक्कंतीइ तह चेव ।।१।।**
**अट्ठमगाई गिम्हे चारणभेएण सत्तवीसेण । तह चेव अड्ढक्कंती ठायइ नीव्विइए नवरं' ।।२।।**

इत्युक्ता वर्षासूत्कृष्टाद्यापत्तिनवके सति दानतपसो द्वादशममादौ कृत्वा एकाशनान्ताश्चारणिकया सप्त–विंशतिर्भेदा इति गाथार्थः ।।१३४।।

सम्प्रति शिशिरे ग्रीष्मे च तानेव दानतपसः सप्तविंशतिभेदानतिदिशन्नाह —

**दसमाई पुरिमंता सिसिरे २७ गिम्हिट्ठमाइ निविअंता २७ ।**
**असहि इक्किक्क हासो जा पंतिसु अंति इक्किक्कं ।।१३५।।**

व्याख्या—**'इअ अड्ढक्कंति सगवीसा'** इति पदमत्राऽप्यनुवर्त्तते । ततोऽयमर्थः—इत्येवं पूर्वोक्तप्रकारेणार्द्धा–पक्रान्त्या यथा वर्षासूत्कृष्टाद्यापत्तिनवके सति दानतपसो दशममादौ (द्वादशमादौ) कृत्वा एकाशनान्ताः सप्तविंशतिभेदाश्चारणिकया कथिताः तथा **शिशिरेऽपि दशमादयः पुरिमान्ता** कार्याः—दशममादौ कृत्वा पुरिमार्द्धान्ता इत्यर्थः । तथा ग्रीष्मेऽष्टमादयो निर्विकृतिकान्ताः सप्तविंशतिभेदाः कार्याः । यन्त्रकस्थापनातश्च ज्ञेया इति । वर्षाशिशिरग्रीष्माणां च सप्तविंशतित्रयमीलने एकाशीतिर्दानतपसो भेदा भवन्ति । अर्द्धापक्रान्तिश्चेयम् — 'अर्द्धस्यासम' इत्यादि प्राग्वत् । अत्र सूत्रानुपात्तान्यपि सौकर्यार्थं शिशिरग्रीष्मयोः सप्तविंशतिः सप्तविंशतिः दानतपांसि नामतो लिख्यन्ते । यथा—गुरुपक्षे षण्मासपञ्च–मासाख्योत्कृष्टापत्तावुत्कृष्टोत्कृष्टं दशमम्, उत्कृष्टमध्यममष्टमम्, उत्कृष्टजघन्यं षष्ठम् ।

चतुर्मासिकत्रिमासिकाख्यमध्यमापत्तौ मध्यमोत्कृष्टमष्टमम्, मध्यममध्यमं षष्ठम्, मध्यमजघन्यं चतुर्थम् । द्विमासिकगुरुमासाख्यजघन्यापत्तौ जघन्योत्कृष्टं षष्ठम्, जघन्यमध्यमं चतुर्थम् , जघन्यजघन्यमाचामाम्लमिति **'शिशिराद्यनवकतपांसि'** ' इति । लघुपक्षे लघुमासाख्योत्कृष्टापत्तौ उत्कृष्टोत्कृष्टमष्टमम्, उत्कृष्टमध्यमं षष्ठम्, उत्कृष्टजघन्यं चतुर्थम्, भिन्नमासाख्यमध्यमापत्तौ मध्यमोत्कृष्टं षष्ठम्, मध्यममध्यमं चतुर्थम्, मध्यमजघन्यमाचामाम्लम् । विंशत्याख्यजघन्यापत्तौ जघन्योत्कृष्टं चतुर्थम्, जघन्यमध्यममाचामाम्लम्, जघन्यजघन्यमेकाशनकमिति । **'शिशिरद्वितीयनवकतपांसि'** ' इति । लघुस्वपक्षे पञ्चदशाख्योत्कृष्टापत्तावुत्कृष्टोत्कृष्टं षष्ठम्, उत्कृष्टमध्यमं चतुर्थम्, उत्कृष्टजघन्यमाचामाम्लम् । दशाख्यमध्यमापत्तौ मध्यमोत्कृष्टं चतुर्थम्, मध्यममध्यममाचामाम्लम्, मध्यमजघन्यमेकाशनकम् । पञ्चाख्यजघन्यापत्तौ जघन्योत्कृष्टमाचामाम्लम्, जघन्यमध्यममेकाशनकम् , जघन्यजघन्यं पुरिमार्द्धः । इति **'शिशिरलघुस्वपक्षरूप–तृतीयनवकदानतपांसि'** इत्येवं शिशिरे सप्तविंशतिदानतपांसि लिखितानि ।

अथ ग्रीष्मसम्बन्धीनि लिख्यन्ते यथा–गुरुपक्षे षाण्मासिकाख्योत्कृष्टापत्तावुत्कृष्टोत्कृष्टमष्टमम्, उत्कृष्टमध्यमं षष्ठम्, उत्कृष्टजघन्यं चतुर्थम् । चतुर्मासिकत्रिमासिकाख्यमध्यमापत्तौ मध्यमोत्कृष्टं षष्ठम्, मध्यममध्यमं चतुर्थम्, मध्यमजघन्यमाचामाम्लम् । द्विमासिकगुरुमासाख्यजघन्यापत्तौ जघन्योत्कृष्टं चतुर्थम्, जघन्यमध्यम–माचामाम्लम्, जघन्यजघन्यमेकाशनकमिति। **'ग्रीष्माद्यनवकदानतपांसि'** इति। लघुपक्षे लघुमासाख्योत्कृष्टा–पत्तावुत्कृष्टोत्कृष्टं षष्ठम्, उत्कृष्टमध्यमं चतुर्थम्, उत्कृष्टजघन्यमाचामाम्लम् । भिन्नमासाख्यमध्यमापत्तौ मध्यमोत्कृष्टं चतुर्थम्, मध्यममध्यममाचामाम्लम्, जघन्यमध्यममेकाशनकम् । विंशत्याख्यजघन्यापत्तौ जघन्योत्कृष्टमाचामाम्लम्, जघन्यमध्यममेकाशनकम्, जघन्यजघन्यं पुरिमार्द्धः । इति **'ग्रीष्मद्वितीयनवक–दानतपांसि'** ' । लघुस्वपक्षे पञ्चदशाख्योत्कृष्टापत्तावुत्कृष्टोत्कृष्टं चतुर्थम्, उत्कृष्टमध्यममाचामाम्लम्, उत्कृष्ट–जघन्यमेकाशनकम् । दशाख्यमध्यमापत्तौ मध्यमोत्कृष्टमाचामाम्लम्, मध्यममध्यममेकाशनकम्, मध्यमजघन्यं पुरिमार्द्धः । पञ्चाख्यजघन्यापत्तौ जघन्योत्कृष्टमेकाशनकम्, जघन्यमध्यमं पुरिमार्द्धः, जघन्यजघन्यं निर्विकृतिकमिति । **'ग्रीष्मतृतीयनवकदानतपांसि'** ' इति ग्रीष्मसम्बन्धीनि सप्तविंशतिदानतपांसि लिखिता–नीत्यलं प्रसङ्गेन । साम्प्रतं गाथोत्तरार्द्धं व्याख्यायते–एवंविधापत्तिषु द्वादशमाद्यं तपः कर्त्तु**मसहिष्णोरसमर्थस्य एकैकस्वतपसो ह्रासः** तावत्कार्यो **यावन्नवस्वपि पङ्क्तिषु** पर्यन्ते कोष्ठकगतमेकैकं चतुर्थादिनिर्विकृति–कान्तं तपः स्थितम् । ततस्तस्य तद्दीयत इत्यर्थ इति गाथार्थः ।।१३५।।

अथ तत्करणेऽप्यशक्तस्य पुनस्तथैव ह्रासो भवतीति दर्शयति —

**असहस्स तंपि हसइ सट्ठाणाउ दिज्ज परठाणं ।**
**इअ हिट्ठमुहे हासे निव्विअं ठाइ सुद्धो वा ।।१३६।।**

व्याख्या–**असहस्य** तत्करणासमर्थस्य **तदपि** पङ्क्तिपर्यन्ते कोष्ठकगतमपि तपो **ह्रास्यते** । ततश्चायमर्थः– पूर्वं स्वस्थानतपो दीयते। **वर्षासु** वर्षाकालोक्तम्, शिशिरे शिशिरोक्तम्, ग्रीष्मे ग्रीष्मोक्तम् । तदपि कर्तुमक्षमस्य

ततः **स्वस्थानात्परस्थानं** परस्थानतपः । वर्षास्वपि शिशिरोक्तम्, शिशिरेऽपि च ग्रीष्मोक्तं तपो दीयते । **इत्येवमधोमुखे** ह्रासे स्थाने स्थाने वर्षाशिशिरग्रीष्मरूपे ह्रासयद्भिः तावन्नेयं **यावन्निर्विकृतिकमात्रमेव** देयतया **स्थितम्** । **शुद्धो वा** यः पुनर्निर्विकृतिकमात्रमपि तपःकर्त्तुमशक्तः स मिथ्यादुष्कृतेनैव शुद्ध्यतीत्यर्थ इति गाथार्थः ।।१३६।।

एष नवविधो व्यवहारः। अस्य च व्यवहारस्य व्यक्तीकरणाय यन्त्रकस्थापना। तत्र चोत्कृष्टादीनि जघन्यान्तानि तपांसि स्थाप्यन्ते । यथा सुखेन ह्रासः कर्त्तुं शक्यत इति । सूत्रे तु यथा कथञ्चिदुक्तानि विचित्रत्वात् सूत्ररचनाया इति । इति श्रुतव्यवहारयन्त्रकस्वरूपं तत्स्थापना चेयम् —

सम्प्रति निर्विकृतिकादीनां क्षपणत्रयान्तानां सञ्ज्ञानामान्याह —

**पण तव कल्लाण निवी–पुरिमासण–अंबिलेगदुतिखमणा ।**
**भिन्नं लहु गुरु चउलहु चउगुरु छल्लहु छगुरुमासा ।।१३७।।**

व्याख्या–**पञ्च तपांसि** निर्विकृतिकपुरिमार्द्धैकाशनाचामाम्लोपवासरूपाणि **समुदितानि पञ्च कल्याणमुच्यते**। किञ्चिदूनोपवासद्वयेनैकं कल्याणकमित्यर्थः । तद्द्विगुणवृद्ध्या द्विकल्याणकादीन्यप्यवसेयानि । तथा निर्विकृतिकपुरिमार्द्धैकाशनाचामाम्लैकद्वित्रिक्षपणानि क्रमेण भिन्नलघुमासादिसञ्ज्ञानि भवन्ति । अयमर्थः— निर्विकृतिकस्य **भिन्नमासः** १, पुरिमार्द्धस्य **लघुमासः** २, एकाशनकस्य **गुरुमासः** ३, आचामाम्लस्य चतुर्लघुमासः ४, **एकक्षपणस्य** चतुर्थस्य चतुर्गुरुमासः ५, **क्षपणद्वयस्य** षष्ठस्य षड्लघुमासः ६, **क्षपणत्रय–स्याष्टमस्य षड्गुरुमासः** ७ इति सञ्ज्ञानामानि यथाक्रमं जीतपरिभाषयोच्यन्त इति गाथार्थः ।।१३७।।

पुनस्तेषामेव क्रमेण सञ्ज्ञान्तराण्याह —

**इगचउछ सुन्न लहुगुरु रित्तभरिय केवलीसरा अंका ।**
**चउछलहू ण्क फ्र गुरू सागरा भिन्नि पणगन्ना ।।१३८।।**

व्याख्या–**एकं चत्वारि षट्** च **शून्यानि** स्थाप्यन्ते । तानि **लघुगुरुभेदेन** द्विधा भवन्तीति **रिक्तानि भृतानि** च क्रियन्ते । तत्र यानि मध्ये **रिक्तानि** शून्यानि तानि क्रमेण लघुचतुर्लघुषड्लघून्युच्यन्ते । यानि पुनर्मध्ये **भृतानि** पूरितानि क्रमेण गुरुचतुर्गुरुषड्गुरूण्युच्यन्ते । अथवा–**केवलाः** स्वरसंयोगरहिताः **ईस्वराः** ईकारः स्वरो येषु ते **ईस्वराः** ईकारस्वरसहिता इत्यर्थः ।५ **अङ्का** एकक–चतुष्क–षट्करूपा भवन्ति । अयमर्थः— यदि ते एककचतुष्कषट्करूपा अङ्काः केवलाः १।४।६। तदा क्रमेण लघुचतुर्लघुषड्लघव उच्यन्ते । अथ ईस्वरयुक्ताः १ी।४ी।६ी। यदि भवन्ति तदा गुरुचतुर्गुरुषड्गुरव उच्यन्ते । तथा **चतुर्लघुषड्लघू ण्क–फ्र** शब्दाभ्यां क्रमेणोच्येते । तावेव **गुरू साकारौ** आकारस्वरयुक्तावित्यर्थः । ण्का चतुर्गुरुः, फ्रा षड्गुरुरित्यर्थः । **भिन्ने** पुनः **पञ्चको** ५ **ना**शब्दश्च सञ्ज्ञान्तरद्वयं भवतीति शेषः । अयं च गाथाद्वयार्थो यन्त्रकस्थापनातः सम्यगवसीयते । तस्य स्थापना चेयम् इति गाथार्थः ।।१३८।।

## यन्त्र–स्थापना

| | | | | |
|---|---|---|---|---|
| **६।५ उत्कृष्टापत्तौ** | | | **४।३ मध्यमापत्तौ** | |
| गुरुतमपक्षे उ०उ० | गुरुतमपक्षे उ०म० | गुरुतमपक्षे उ०ज० | गुरुतरपक्षे म०उ० | गुरुतरपक्षे म०म० |
| १२ | १० | ८ | १० | ८ |
| **२७½ उत्कृष्टापत्तौ** | | | **२५ मध्यमापत्तौ** | |
| लघुतमपक्षे उ०उ० | लघुतमपक्षे उ०म० | लघुतमपक्षे उ०ज० | लघुतरपक्षे म०उ० | लघुतरपक्षे म०म० |
| १० | ८ | ६ | ८ | ६ |
| **१५ उत्कृष्टापत्तौ** | | | **१० मध्यमापत्तौ** | |
| लघुस्वतमपक्षे उ०उ० | लघुस्वतमपक्षे उ०म० | लघुस्वतमपक्षे उ०ज० | लघुस्वतरपक्षे म०उ० | लघुस्वतरपक्षे म०म० |
| ८ | ६ | ४ | ६ | ४ |

| | | | | |
|---|---|---|---|---|
| **६।५ उत्कृष्टापत्तौ** | | | **४।३ मध्यमापत्तौ** | |
| गुरुतमपक्षे उ०उ० | गुरुतमपक्षे उ०म० | गुरुतमपक्षे उ०ज० | गुरुतरपक्षे म०उ० | गुरुतरपक्षे म०म० |
| १० | ८ | ६ | ८ | ६ |
| **२७½ उत्कृष्टापत्तौ** | | | **२५ मध्यमापत्तौ** | |
| लघुतमपक्षे उ०उ० | लघुतमपक्षे उ०म० | लघुतमपक्षे उ०ज० | लघुतरपक्षे म०उ० | लघुतरपक्षे म०म० |
| ८ | ६ | ४ | ६ | ४ |
| **१५ उत्कृष्टापत्तौ** | | | **१० मध्यमापत्तौ** | |
| लघुस्वतमपक्षे उ०उ० | लघुस्वतमपक्षे उ०म० | लघुस्वतमपक्षे उ०ज० | लघुस्वतरपक्षे म०उ० | लघुस्वतरपक्षे म०म० |
| ६ | ४ | आं० | ४ | आं० |

| | | | | |
|---|---|---|---|---|
| **६।५ उत्कृष्टापत्तौ** | | | **४।३ मध्यमापत्तौ** | |
| गुरुतमपक्षे उ०उ० | गुरुतमपक्षे उ०म० | गुरुतमपक्षे उ०ज० | गुरुतरपक्षे म०उ० | गुरुतरपक्षे म०म० |
| ८ | ६ | ४ | ६ | ४ |
| **२७½ उत्कृष्टापत्तौ** | | | **२५ मध्यमापत्तौ** | |
| लघुतमपक्षे उ०उ० | लघुतमपक्षे उ०म० | लघुतमपक्षे उ०ज० | लघुतरपक्षे म०उ० | लघुतरपक्षे म०म० |
| ६ | ४ | आं० | ४ | आं० |
| **१५ उत्कृष्टापत्तौ** | | | **१० मध्यमापत्तौ** | |
| लघुस्वतमपक्षे उ०उ० | लघुस्वतमपक्षे उ०म० | लघुस्वतमपक्षे उ०ज० | लघुस्वतरपक्षे म०उ० | लघुस्वतरपक्षे म०म० |
| ४ | आं० | ए० | आं० | ए० |

# यन्त्र–स्थापना

## वर्षासु तपोदानयन्त्रकम्

| | | | | |
|---|---|---|---|---|
| | | २।१ जघन्यापत्तौ | | |
| गुरुतरपक्षे म०ज० ६ | गुरुपक्षे ज०उ० ८ | गुरुपक्षे ज०म० ६ | गुरुपक्षे ज०ज० ४ |
| | | २० जघन्यापत्तौ | | |
| लघुतरपक्षे म०ज० ४ | लघुपक्षे ज०उ० ६ | लघुपक्षे ज०म० ४ | लघुपक्षे ज०ज० आं० |
| | | ५ जघन्यापत्तौ | | |
| लघुस्वतरपक्षे म०ज० आं० | लघुस्वपक्षे ज०उ० ४ | लघुस्वपक्षे ज०म० आं० | लघुस्वपक्षे ज०ज० ए० |

## शिशिरे तपोदानयन्त्रकम्

| | | | |
|---|---|---|---|
| | | २।१ जघन्यापत्तौ | |
| गुरुतरपक्षे म०ज० ४ | गुरुपक्षे ज०उ० ६ | गुरुपक्षे ज०म० ४ | गुरुपक्षे ज०ज० आं० |
| | | २० जघन्यापत्तौ | |
| लघुतरपक्षे म०ज० आं० | लघुपक्षे ज०उ० ४ | लघुपक्षे ज०म० आं० | लघुपक्षे ज०ज० ए० |
| | | ५ जघन्यापत्तौ | |
| लघुस्वतरपक्षे म०ज० ए० | लघुस्वपक्षे ज०उ० आं० | लघुस्वपक्षे ज०म० ए० | लघुस्वपक्षे ज०ज० पु० |

## ग्रीष्मकाले तपोदानयन्त्रकम्

| | | | |
|---|---|---|---|
| | | २।१ जघन्यापत्तौ | |
| गुरुतरपक्षे म०ज० आं० | गुरुपक्षे ज०उ० ४ | गुरुपक्षे ज०म० आं० | गुरुपक्षे ज०ज० ए० |
| | | २० जघन्यापत्तौ | |
| लघुतरपक्षे म०ज० ए० | लघुपक्षे ज०उ० आं० | लघुपक्षे ज०म० ए० | लघुपक्षे ज०ज० पु० |
| | | ५ जघन्यापत्तौ | |
| लघुस्वतरपक्षे म०ज० पु० | लघुस्वपक्षे ज०उ० ए० | लघुस्वपक्षे ज०म० पु० | लघुस्वपक्षे ज०ज० नि० |

| निवि<br>भिन्नमास | पुरिमार्द्ध<br>लहुमास | एकाशन<br>गुरुमास | आचामाम्ल<br>चउलहुमास | चउत्थ<br>चउगुरुमास | छट्ठ<br>छल्लहुमास | अट्ठम<br>छग्गुरुमास |
|---|---|---|---|---|---|---|
| ५ | ○ | ● | ○○<br>○○ | ●●<br>●● | ○○○<br>○○○ | ●●●<br>●●● |
| ना | १ | १ी | ४<br>ण्क | ४ी<br>ण्का | ६<br>फ्र | ६ी<br>फ्रा |

सम्प्रति कतिभिर्नमस्कारसहितादिभिः प्रत्याख्यानैरुपवासो भवतीति गाथाद्वयेनाह —

**अडयाल नमुक्कारा पोरुसि चउवीस सोलपुरिसड्ढा ।**
**इह चउ अवड्ढ दुगभत्त अट्ठ सज्झायसहसदुगं ।।१३९।।**
**इगभत्त चउ दुगंबिल ति निवि अ सुद्धछ (सुद्धच्छ) अंबिलं एगं ।**
**उववासो जीएणं केवलनिवि सोल पुरिमड्ढा ।।१४०।।**

व्याख्या—**अष्टाचत्वारिंशन्नमस्कारा** नमस्कारसहितान्युपवासो भवति । अष्टाचत्वारिंशता नमस्कारसहित—प्रत्याख्यानैरुपवासो भवतीति । प्रथमान्तान्यपि नमस्कारसहितादिपदानि सुखावबोधाय तृतीयान्तानि व्याख्येयानि । प्राकृतत्वाद्विभक्तिव्यत्ययो वा । तथाहि—**चतुर्विंशत्या पौरुषीभि**रुपवासः । एवं सर्वत्र योज्यम् । ततश्च **षोडशभिः 'पुरिसड्ढ'** ' त्ति सार्द्धपौरुषीभिः । तथा **'इह'** जीतव्यवहारे **चतुर्भिरपार्द्धैः** । तथा—**द्विभक्तैर्द्वा—सनैरष्टभिः** तथा **स्वाध्यायसहस्रद्विकेन** चोपवासो भवति । तथा **चतुर्भिरेकभक्तैरे**कासनैः तथा **द्वाभ्यामाचा—माम्लाभ्यां** तथा **त्रिभिर्निर्विकृतिकै**रेकासनविशेषैः । तथा **'सुद्धछ अंबिलं'** ' ति **शुद्धाछा**(शुद्धाच्छा)चा—माम्लेनाचामाम्लविशेषेणैकेन उपवासो भवतीति शेषः । **जीतेन** गीतार्थसमाचीर्णसामाचारीरूपेण **'केवल निवि सोल'** ' त्ति । तथा षोडशभिः केवलैनिर्विकृतिकैरेकासनाद्युच्चारमन्तरेणापि रूक्षाहारप्रत्याख्यानरूपैः । तथा **'पुरिमड्ढ'** ' त्ति । अष्टभिः पुरिमार्द्धैरुपवासो भवतीत्युक्तमेवेति गाथाद्वयार्थः ।। १३९—१४० ।।

अथ शास्त्रार्थमुपसंहरन्नाह —

**इअ एस जीअकप्पो समासओ सुविहियाणुकंपाए ।**
**कहिओ देओ अ पुणो पत्ते सुपरिक्खिअगुणंमि ।।१४१।।**

व्याख्या—**इति**—पूर्वोक्तप्रकारेण प्रथमं गाथाचतुःपञ्चाशता शास्त्रप्रस्तावनामभिधाय **'तणुमज्झुक्कोसा—सायणाइ मुणिनाणदेवगुरुबिंबे'** इति गाथातः (गाथा-५५ तः) प्रारभ्य **'असहस्स तं पि हसइ'** त्ति गाथा (गाथा-१३६) पर्यन्तीकृत्यैकाशीत्या गाथाभिर्ज्ञानाद्यतिचारपञ्चकगोचरस्य तपःप्रायश्चित्तस्य । तथा गाथाद्वयेन प्रायश्चित्तसञ्ज्ञायाः । तथा गाथाद्वयेनोपवासप्रमाणस्य च व्याख्यानेन **एष** सर्वसमुदायात्मको **जीतकल्पः** श्रावकाणां जीतमाचरितं तस्य **कल्पो** वर्णना—प्ररूपणा **समासतः** सङ्क्षेपतः **सुविहितानुकम्पया** शोभनं विहितमनुष्ठानं येषां ते सुविहिताः तेषामनुकम्पया **कथितः** प्ररूपितः । **देयः पुनरयं पात्रे सुपरीक्षितगुणे** जात्यकाञ्चनवत्तापच्छेदनिकषसहे संविग्नगीतार्थे न पुनरन्यस्मिन् । येन जीतकल्पदायक—ग्राहकौ द्वावपि कर्मनिर्जरया शुद्ध्यतः—सिद्ध्यतश्चेति गाथार्थः ।।१४१।।

**सिरिदेविंदमुणीसरविणेअ—सिरिधम्मघोससूरीहिं ।**
**इअ सपरजाणणट्ठा रइअं सोहिंतु गीअत्था ।।१४२।।**

व्याख्या—**श्रीदेवेन्द्रमुनीश्वराणां विनेयैः** शिष्यैः **श्रीधर्मघोषसूरिभिरितीदं** श्राद्धजीतकल्पशास्त्रं **स्वपर—ज्ञानार्थाय** स्वपरपरिज्ञानहेतवे सूत्ररूपतया (रचितं) ग्रथितम् । इदं हि यद्यपि श्रुतानुसारादेवोक्तं न पुनर्निजमनीषिकल्पनाविजृम्भितम् । तथापि **गीतार्थाः** श्रीनिशीथादिछेदग्रन्थसूत्रार्थधराः **शोधयन्तु** प्रमादा—दिजनितं दूषणं व्यपनयन्तु शुद्धिं जनयन्त्विति गाथार्थः ।।१४२।।

## इति श्रीजीतकल्पवृत्तिः समर्थिता

प्रत्यक्षरं गणनया श्लोकमानं विनिश्चितम् । षड्विंशतिशतीयुक्ता षट्चत्वारिंशता पुनः ।।१।।

अङ्कतोऽपि श्लोकाः २६४६

## परिशिष्टम् – १

सङ्घ–जीयकप्पो मूलगाथायाः पूर्वार्धोत्तरार्धयोः अकारादिक्रमः (पू. = पूर्वार्धः, उ. = उत्तरार्धः)

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः |
|---|---|
| अगलिअजलछड्डुण–ण्हाण | ७२ पू. |
| अग्गीओ न वियाणइ | २० पू. |
| अज्झोयराइ गुरुगो लह | ५९ उ. |
| अट्ठमछट्ठचउत्थं जहन्नतिगि | १३२ उ. |
| अट्ठमछट्ठचउत्थं | १३४ पू. |
| अट्ठमदसमदुवालस जिट्ठ | १२६ उ. |
| अडयाल नमुक्कारा | १३९ पू. |
| अणणुत्तावि अमाई | १७ उ. |
| अणवट्ठप्पो तवसा | ५१ पू. |
| अणालोइअं तु | ४३ उ. |
| अनिमित्त दिवा सुअणे | १०१ उ. |
| अपमज्जिउं कवाडुग्घाड | ९५ पू. |
| अपरिच्छि अकडजोगा | ४२ उ. |
| अपरिस्सावी निज्जव | ९ उ. |
| अप्पंपि भावसल्लं | २५ पू. |
| अवए वि लहु | १०३ उ. |
| अविराहिअसामण्णस्स साहुणा | ५३ पू. |
| असहस्स तंपि हसइ | १३६ पू. |
| असहि इक्किक्क हासो | १३५ उ. |
| असिओ लक्खो मूलं | ८५ उ. |
| आउट्टि–दप्प–पमाय | ११७ उ. |
| आकम्पइत्ता अणुमाणइत्ता | १८ पू. |
| आभोगे पणकल्लं | ८२ पू. |
| आयरिअपायमूले इअ | ५२ पू. |
| आयरिअपायमूले | ५ उ. |
| आयरियाइ सगच्छे | १२ पू. |
| आयारवमाहारव | ९ पू. |
| आराहणा ससल्लस्स | ११ उ. |
| आलोअण दिज्ज कया | २ पू. |
| आलोअणापरिणओ सम्मं | ३९ पू. |
| आलोअंते संकेससोहिओ | १२२ पू. |
| आलोइज्ज अकज्जं न | ३२ उ. |
| आलोयणा सपक्खे | ३ पू. |
| आसायण मिच्छत्तं | २२ पू. |
| आसायणानिमित्तं कुव्वइ | २२ उ. |
| इअ एस जीअकप्पो | १४१ पू. |
| इअ दव्वाइ बहुगुणे | १२१ पू. |
| इअ रुक्खो उण्हतिगे | १११ उ. |
| इअ सपरजाणणट्ठा | १४२ उ. |
| इअ हिट्ठमुहे हासे | १३६ उ. |
| इगचउछ सुन्न लहुगुरु | १३८ पू. |
| इगभत्त चउ दुगंबिल | १४० पू. |
| इरिआइ अपडिकमणे | ९४ उ. |
| इह चउ अवड्ढ दुगभत्त | १३९ उ. |
| इह दसमट्ठमछट्ठा | १३३ पू. |
| इह पुत्तीहारवणे | ९३ उ. |
| उक्कोसमज्झहीण आवत्ति | १३० पू. |
| उक्कोसुक्कोसुक्कोसमज्झ | १३० उ. |
| उदयग्गिचोरसावय | १२० उ. |
| उद्धरिअसव्वसल्लो | ४ उ. |
| उद्धरियसव्वसल्लो | ५४ पू. |
| उपन्नकारणंमि किइकम्मं | ६२ पू. |
| उववास–छट्ठअट्ठम | १२६ पू. |
| उववासो जीएणं | १४० उ. |
| उवविट्ठपडिक्कमणे | ९६ पू. |
| एगासण–पुरिमड्ढा | ७५ पू. |
| एगाहे पंचाहं | ११४ उ. |
| एगे असीअ लक्खं | ८७ उ. |
| एयं पायच्छित्तं जह | ११६ पू. |
| एवं जाणंतस्सवि | १५ उ. |
| एवं सदयं दिज्जइ | ७७ पू. |
| एवं सारणियाणं | २३ उ. |
| ओमे अ बीअभत्तं | ४९ उ. |
| कंकणिअ–कंडगाई | ६१ पू. |
| कट्ठाइगहणमुअणे | ९५ उ. |
| कन्नाहल–संडविवाहमाइ | ६३ पू. |
| कयपवयणप्पणामो | १ पू. |
| कयपावो वि मणूसो | २८ पू. |
| कल्लमणुतावि कीवे | ८६ उ. |
| कहिओ देओ अ | १४१ उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः |
|---|---|
| कहेहि सव्वं जो | २९ पू. |
| कारिंति दस चउत्थे | ७४ उ. |
| कारिंते पणकल्लं | ६१ उ. |
| काले बारस वरिसा | ७ उ. |
| कोहे पक्खाईए | ८८ उ. |
| खवणसयं तीसाइ व | ८३ उ. |
| खित्ते ऊणहिअं | ११० उ. |
| खेअन्नो अविसाई | ८ उ. |
| गंतूण गुरुसमीवं | १४ पू. |
| गीअत्थो कडजोगी | ८ पू. |
| गुरुग अ ममत्ताइसु | ५८ उ. |
| गुरुग जईणमगाढ | ५९ पू. |
| गुरुगो बहुसामत्थे लहु | १०७ उ. |
| गुरुमवि संतरदाणे लहु | १२३ उ. |
| गुरुमाइतिविहमोसे | ७८ पू. |
| गुरुमासाइ अकरणे | १०५ उ. |
| गुरु वंदणगाकरणे | १०६ उ. |
| गुरु—लहुग—गुरुग | ८७ पू. |
| गुरुलहु छप्पणमासा | १२९ पू. |
| गुरु लहु लहुस तिपक्खा | १२८ पू. |
| चउगुरु अकारणं | १०३ पू. |
| चउगुरुणंते चउलहु | ९१ पू. |
| चउछलहू ण्क फ्र गुरू | १३८ उ. |
| चउ—तिग—दुगकल्लाणे | ७६ पू. |
| चउदसपुव्वधरंमि धरंति | ५१ उ. |
| चउदसपुव्वाई वि हु | ११५ उ. |
| चउम्मासिअवरिसे | १०८ पू. |
| चउलहुअमपेहिअथंडिलेसु | १०२ उ. |
| चउलहु गुरु | ५६ उ. |
| चउलहु देसवगासे | ९२ उ. |
| चउलहु | ७९ पू. |
| चउलहु वग्घारंमी तं | ९८ उ. |
| छग्गुरुग दासियाइसु | ८४ उ. |
| छट्ठचउत्थायामं लहुपक्खे | १३३ उ. |
| छट्ठंतं तव लहुमट्ठमाइ | १२४ पू. |
| छत्तीसगुणसमन्ना—गएणवि | १६ पू. |
| छन्नं सद्दाउलयं | १८ उ. |
| जइ अंतरावि कालं | ३९ उ. |
| जाइकुलविणयउवसम | १७ पू. |
| जइदव्वभोगि इय | ६८ उ. |
| जं किंचि कयमकज्जं | २७ पू. |
| जं कुणइ भावसल्लं | ३७ पू. |
| जंतं व दुप्पउत्तं | ३६ उ. |
| जह अप्पणो तह | १४ उ. |
| जह उक्कोस जहन्नगमज्झा | १३१ उ. |
| जह बालो जंपंतो | १३ पू. |
| जह मन्ने पढमं | ४५ पू. |
| जह सरणमुवगयाणं | २३ पू. |
| जह सुकुसलो वि विज्जो | १५ पू. |
| जायं कडुयविवागं किं | २५ उ. |
| जिट्ठे दसगमनाए | ८० उ. |
| जिणमुणिगेहागमणे | ९६ उ. |
| जे न कहंति गुरूणं | २४ उ. |
| जो अमुणंतो सुद्धिं | २१ पू. |
| जो उ उवेहं कुज्जा | ८९ उ. |
| जो जं तरइ तं तस्स | ७६ उ. |
| जो जम्हा उवसमई | ८९ पू. |
| जो जह सत्तो बहुतरगुणो | ११३ पू. |
| जो भणइ नत्थि इण्हि | ४७ पू. |
| ठक्कुरपिआइ छग्गुरु | ८५ पू. |
| ठवणगुरुंमि अठविए | ६६ पू. |
| ठाणांतरं व दिज्जा | ११८ उ. |
| डाहणि (? डाइणि) | ७८ उ. |
| तं तह आयरियव्वं | ४४ उ. |
| तं तह आलोइज्जा | १३ उ. |
| तं तह पडिक्कमियव्वं | २७ उ. |
| तं दसविहमालोयण | ४६ पू. |
| तं न खमं खु पमाओ | ५ पू. |
| तंमि धरंते अज्जवि | ५० पू. |
| तं लहुमवि कालगुरु | १२४ उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| तणुमज्झुक्कोसासायणाइ | ५५ | पू. |
| तत्तोच्चिअ (विय) | ४८ | उ. |
| तत्थन्नत्थ व दिन्ने | ६९ | उ. |
| तम्मत्तं वा चरिमाकरणे | १०४ | उ. |
| तयभावम्मि आलोए | ११ | पू. |
| तव—छेय—मूल—अणवट्ठया | ४६ | उ. |
| तह खवणंबिल आसण | १३४ | उ. |
| तह मन्ने चरिमं | ४५ | उ. |
| तह संघाणुववूहाइसु | ५८ | पू. |
| तहिं बारस दसमट्ठम | १३२ | पू. |
| ता तस्स पायच्छित्तं जं | ४४ | पू. |
| तावइया चउगुरुगा | ९९ | उ. |
| ता सहसन्नाणेण व | २६ | पू. |
| ति—नव—सगवीस—इगसी | १२५ | पू. |
| तिविह जल—जलणफुसणे | ९८ | पू. |
| तो अप्पाणं आलोअगं | २० | उ. |
| तो उद्धरंति गारवरहिआ | ३८ | पू. |
| दप्प अकप्प निरालंब | ४२ | पू. |
| दव्वाइ य सहसाईहिं | ४० | उ. |
| दव्वे सुलहे बलिए | ११० | पू. |
| दसमाई पुरिमंता सिसिरे | १३५ | पू. |
| दसवारउवरि दस | ७३ | उ. |
| दाण—तव—कालपच्छित्तमिह | १२३ | पू. |
| दाणादाणे वा किं | २ | उ. |
| दिज्ज सहिज्ज व | ११२ | उ. |
| दिज्जा नाउं दव्वाइ | १०९ | उ. |
| दिव्वं वाससहस्सं उ | ३५ | उ. |
| दिसिवय अणत्थभंगे | ८८ | पू. |
| दुक्करकरणं आणा | १९ | उ. |
| दुगुणं करेइ पावं | ३१ | उ. |
| दु—ति—चउ—पणकल्ला | ७३ | पू. |
| दुल्लहबोहीअत्तं | ३७ | उ. |
| दंसणनाणचरित्ते | ११९ | पू. |
| न तस्स दिंति पच्छित्तं | २९ | उ. |
| न य सव्वहा न | ७७ | उ. |
| नवतवसुअववहारे जंते | १२५ | उ. |
| नववासवुट्ठि—किसलयविराहणा | ९९ | पू. |
| नवि तं सत्थं व विसं व | ३६ | पू. |
| न संभरेइ जे | ३० | पू. |
| न हु सुज्झई ससल्लो | ४ | पू. |
| नाऊण सत्तमेसिं | ११६ | उ. |
| नाए छगुरु अनियमे | ९० | उ. |
| नाणाइसु मूलुत्तरगुणेसु | ४० | पू. |
| निअमा आलोइज्जा | ६ | उ. |
| निट्ठवियपावपंका सम्मं | ३३ | पू. |
| नियमे पोसहसामाइअकरणे | ९३ | पू. |
| निविय—पुरिमासणंबिल | १२७ | पू. |
| पंचिंदिसु गुरुमाइ | १०० | उ. |
| पंचेंदिए पमाया | ७१ | उ. |
| पक्खिय चाउम्मासे | ६ | पू. |
| पच्चक्खी साहए ते उ | ३० | उ. |
| पच्छित्ते अइमत्तं | २१ | उ. |
| पट्टिअ—पुत्थाईण वि | ६७ | उ. |
| पडिकमण—दाण—पूआ | १०७ | पू. |
| पडिकमणस्साकरणे चुउगुरु | १०६ | पू. |
| पडिमाइ भंगदाहे | ६७ | पू. |
| पणकल्लं पच्छित्तं | ७४ | पू. |
| पणकल्लं संखारय | ७२ | उ. |
| पणकल्लमनाए तीस—कल्ल | ८६ | पू. |
| पणकल्ल व (? वु) | ८४ | पू. |
| पण कल्ला दस | ८३ | पू. |
| पणगं मासविवड्ढिमासगहाणीय | ११४ | पू. |
| पण तव कल्लाण | १३७ | पू. |
| पत्ता अणंतसत्ता | ३३ | उ. |
| पत्तेयासहदाणं कारिंति | ७५ | उ. |
| परसक्खिया विसोही | १६ | उ. |
| पायच्छित्तस्स ठाणाइं | ४३ | पू. |
| पायमिमं ओहुत्तं | १०९ | पू. |
| पावं काऊण सयं | ३१ | पू. |
| पासत्थाईआणं उग्घाया | ६२ | उ. |

| पूर्वार्धः / उत्तरार्धः | मूलगाथाङ्कः | |
|---|---|---|
| पुढवाइ—घट्टणाऽगाढ | ७० | पू. |
| पुढवाइ—घट्टणाइसु | १०० | पू. |
| पुरिसस्सित्थीफासे चउलहु | ९७ | पू. |
| पूअंतपडिअबिंबे | ६४ | पू. |
| पोरिसिमभणिअ | १०२ | पू. |
| बलि—पिंड—सद्ध—बारसि | ६३ | उ. |
| बहु—अबहु—थोवसीओ | १११ | पू. |
| बालाईणणुकंपा | ४९ | पू. |
| भणियमिणं तु पमाए | ११८ | पू. |
| भय—दप्प—पमायतिअं | ४१ | उ. |
| भिन्न—लहु पडणाइसु | ६६ | उ. |
| भिन्नाइ सयं पारे | १०५ | पू. |
| भिन्नं लहु गुरु | १३७ | उ. |
| भिन्नं लहु-गुरु लहुगा | ७० | उ. |
| मंसासववयभंगे छग्गुरु | ९१ | उ. |
| मज्झुक्कोसा मज्झिममज्झिमगा | १३१ | पू. |
| मरणाराहणजुत्ता | ५४ | उ. |
| मरिउं ससल्लमरणं | ३४ | पू. |
| महु—पंचुंबरि—फल | ९० | पू. |
| मायाइदोसरहिओ | ३२ | पू. |
| मिच्छादंसणसल्लं | ३८ | उ. |
| मुहपत्ति—आसणाइसु | ६८ | पू. |
| रागद्दोसविवड्ढिं हाणिं | ११५ | पू. |
| रायकुलंते कलहे | ७९ | उ. |
| लज्जाइ गारवेण य | २४ | पू. |
| लहुअं संतरफासे | ९७ | उ. |
| लहुआ ह्लाईजणणं | १९ | पू. |
| लहु—गुरु—चउलहु | ६५ | उ. |
| लहु—गुरु—चउलहू सुत्ते | ५५ | उ. |
| लहु—गुरुमासो थुक्काइ | ६४ | उ. |
| लहुतम लहुतर लहुओ | १२८ | उ. |
| लहुमास भिन्न वीसं | १२९ | उ. |
| लहु सगिहतणुअदिन्ने | ८० | पू. |
| वमणे निसि वोसिरणे | १०१ | पू. |
| वसणेण पमाएण व | २६ | उ. |
| वसहि—अपमज्जणे तह | ९४ | पू. |
| विगई—ण्हाण—सचित्तासणाइ | ९२ | पू. |
| विगलाणां ते सहसाणाभोग | ७१ | पू. |
| विम्हरिअन्नायकए | १०८ | उ. |
| वुच्छिन्नं पच्छित्तं | ५० | उ. |
| वेसाइ छलहु—छगुरु | ८१ | उ. |
| संकप्प—वग्गणाई | ११७ | पू. |
| संकाइ मूढदिट्ठी | ५७ | पू. |
| संकेयद्धाभंगे अट्ठसयं | १०४ | पू. |
| संघस्सायरिअस्सा | १२० | पू. |
| संथव पसंस | ५७ | उ. |
| संविग्गपक्खिआणं | १० | उ. |
| संविग्गभाविएणं | ३ | उ. |
| सपरहिअधारणट्ठा | १ | उ. |
| सल्लुद्धरणनिमित्तं खित्तंमि | ७ | पू. |
| सव्वंपि अ पच्छित्तं | ४८ | पू. |
| ससल्लो जइवि | ३५ | पू. |
| सहसाऽणाभोगाउर—आवय | ४१ | पू. |
| सहसापमायणाभोगि छलहु | ८१ | पू. |
| सामण्णं दुसु वि गुरू | ६५ | पू. |
| सारूवी—पच्छाकड | १२ | उ. |
| सासंकमनाए पणकल्लं | ८२ | उ. |
| साहम्मिअवच्छल्लत्तणेण (वावि) | ११९ | उ. |
| साहारण—जिणदव्वं | ६९ | पू. |
| साहूहिं लेहसाल | ६० | पू. |
| सिरिदेविंदमुणीसरविणेअ | १४२ | पू. |
| सिसुकीलण—घरकम्मं | ६० | उ. |
| सुइरं भमंति जीवा | ३४ | उ. |
| सुगुरूण अलाभंमि | १० | पू. |
| सुयववहारुवएसा ओहेण | १२७ | उ. |
| सो कुव्वइ संसारं | ४७ | उ. |
| सो जइ न जाइ मुक्खं | ५२ | उ. |
| सोहम्मे उववाओ | ५३ | उ. |
| हट्ठस्स दिज्ज भावे न | ११२ | पू. |
| हीणक्खराइ लहु | ५६ | पू. |
| हीणयरे हीणयरं हीणयरं | १२१ | उ. |
| हीणस्स हीणतरयं | ११३ | उ. |
| हीणं वा अहिअं वा | १२२ | उ. |
| होइ अइरेगलहुआ | २८ | उ. |

## परिशिष्टम् – २

### सङ्घ–जीयकप्पो अवान्तरगाथानां अकारादिक्रमः


| अवान्तरगाथाप्रथमपद | पृष्ठाङ्कः |
|---|---|
| अइसेसि–इड्ढि–धम्मकहि | ४ ३ |
| अग्गियए पव्वयए | ३ ९ |
| अट्ठमगाई गिम्हे | ९ ७ |
| अट्ठमछट्ठचउत्थं | ९ ७ |
| अट्ठविहा गणिसंपय | १ ६ |
| अट्ठहिं ठाणेहिं संपन्ने | ९ |
| अणमप्पेण कालेणं | ३ ७ |
| अद्धमसणस्स सव्वंजणस्स | ५ ७ |
| अन्नयरपमाएणं असंपउत्तस्स | २ ३ |
| अपच्छित्ते अ | २ ० |
| अप्पडिविरओसन्नो न | ३ ३ |
| अप्पाहारस्स न | ५ ७ |
| असीइसयं किरिआणं | ४ ४ |
| अहवा फोडीकम्मं | ८ ० |
| अहवा मोसादत्ते | ७ ५ |
| आउट्टिआ उविच्चा | ७ २ |
| आगम–सुअ–आणा | ३ |
| आमे घडे निहित्तं | १ |
| आयके उवस्सग्गे | ५ ८ |
| आयारपकप्पाई सेसं | ३ |
| आलोअणयाए णं भंते ! | १ ९ |
| आलोयणापरिणओ सम्मं | १ ० |
| आवत्तितवो एसो | ९ ५ |
| आवस्सय–सज्झाए | ६ ३ |
| आहाकम्मुद्देसिय पूईकम्मे | ४ ७ |
| इअ कम्मं उद्देसिअतिअ | ४ ९ |
| इंगालविक्कयं | ८ ० |
| इंदपुर इंददत्ते | ३ ९ |
| उक्कोसे गुरुपक्खो | ९ ४ |
| उग्गमकोडिकणेणवि | ४ ८ |
| उग्गमकोडिकणेणवि | ४ ९ |
| उदुम्बरवटप्लक्ष | ७ ९ |
| उद्धावणा–पहावण | १ ४ |
| उस्सुत्तमणुवइट्ठं | ६ ५ |
| उस्सुत्तमायरंतो उस्सुत्तं | ६ ५ |
| एगग्गया य झाणे | १ २ |
| एगाइ–दसंतेसु | ७ ० |
| एगाइदसंतेसु | ६ १ |
| एगूणवीसगस्स उ | ३ १ |
| एमेवुक्कोसाई | ९ ७ |
| एय गुणसंपउत्तो | ३ ४ |
| एस तवं पडिवज्जइ | ३ ५ |
| एएसु च्चिअ | ४ ३ |
| ओसन्नो वि अ | ६ ३ |
| कन्नाण फालणं | ८ ० |
| कयपावोवि मणूसो | १ ९ |
| कहेहि सव्वं | ३ |
| कामं सभावसिद्धं | ४ ३ |
| काया वया य तेच्चिय | ३ ४ |
| कीरइ अणवट्ठप्पो | ३ ३ |
| कुलनिस्साए विहरइ | ६ २ |
| केवल–मणो–हि | ३ |
| कोउअ भूईकम्मे | ६ ४ |
| क्षणिकाः सर्वसंस्कारा | ४ ५ |
| खंडइ पीसइ भुंजइ | ५ २ |
| खमणे वेयावच्चे | ४ ३ |
| खवणायामेगासण | ९ ७ |
| गंभीरो अणुवत्ती | १ ६ |
| गिम्हासु अट्ठमं | ९ ४ |
| गिम्हासु चउत्थं | ९ ४ |
| गिम्हासु छट्ठगं | ९ ४ |
| गीअत्थो कडजोगी | ९ |
| गीअं भन्नइ सुत्तं | ८ |
| गीयत्थेणं दिन्नं | ४ |
| गुरुपक्खे उक्कोसो | ९ ५ |
| गुरुपक्खे नव एए | ९ ६ |
| गुरुपक्खे छम्मासो | ९ ५ |
| गुरु–लहु–लहुसगपक्खे | ९ ६ |
| गोभत्तालंदा विव | ६ ५ |
| घित्तव्वमलेवकडं | ५ ४ |
| चउदसवासस्स तहा | ३ १ |
| छक्कायदयावंतो वि | ५ ३ |
| छक्कायवग्गहत्था समणट्ठा | ५ ४ |
| छट्ठचउत्थायामं | ९ ७ |

| अवान्तरगाथाप्रथमपद | पृष्ठाङ्कः |
|---|---|
| जं केवलिणा भणियं | ३ १ |
| जत्तिअमित्तं कालं | ३ ६ |
| जत्तियमित्तं कालं | ३ ३ |
| जत्थुप्पन्नो दोसो | ३ ६ |
| जवचणयगोहुममुग्गमास | ८ ० |
| जाईकुले गणे अ | ६ ४ |
| जावइया वयणपहा | ४ ४ |
| जावंतियमुद्देसं | ४ ७ |
| जियपरिसो जियनिद्दो | १ ५ |
| जीहाए विलिहंतो न | २ १ |
| जूआइ होए वसणं | २ ३ |
| जो उ असंते | ३ ७ |
| जो उ धारिज्ज | ३ ७ |
| जो उ सलिंगे दुट्ठो | ३ ५ |
| जो पुण सहई | ३ ७ |
| णिवेत्त्यासश्रत्थे | ४ ३ |
| णेगविहा इड्ढीओ | ४ ३ |
| तं चेव असंथरणे | ४ ९ |
| तवनियमविणयगुणनिहि | १ ३ |
| तिअ सीअं समणाणं | ५ ५ |
| तिलतुसतिभागमित्तो वि | ३ ४ |
| तिवरिसपरियागस्स उ | ३ १ |
| तिविहो होइ | ६ ४ |
| तिंतिणिए चलचित्ते | १ |
| तित्थयर—पवयण—सुअं | ३ ५ |
| ते तेण परिचत्ता | ३ ८ |
| थिरकरणा पुण थेरा | १ ४ |
| थूला सुहुमा जीवा | ६ ९ |
| थेरऽपहु—पंड वेविर | ५ २ |
| दव्वाइं चिंतिऊणं | ४ |
| दसकप्पववहारा | ३ १ |
| दसमं अट्ठमछट्ठं | ९ ७ |
| दसवासस्स विवाहा | ३ १ |
| दसहिं ठाणेहिं संपण्णे | १ ७ |
| देस—कुल—जाइ—रूवी | १ ५ |
| देसन्नू आदेओ | १ ६ |
| देसंमि य पासत्थो | ६ २ |
| धर्मलाभ इति | ६ ८ |
| धाई दूई निमित्ते | ४ ९ |
| नवविहववहारे सो | ९ ४ |
| न संभरेइ | ३ |
| नहदंतचम्मखल्ला | ८ ० |
| नाणे नाणायारं | ६ ४ |
| नासेइ अगीअत्थो | ८ |
| निअएणुवगरणेणं | ८ ० |
| निरविक्खो तिण्णि | ३ ७ |
| निव १ सिट्ठि २ इत्थि ३ | २ ६ |
| पंचविहे आयारे जुत्तो | १ ५ |
| पंचासवप्पवत्तो जो | ६ ५ |
| पगामं च निगामं | ५ ७ |
| पमाओ अ जिणिंदेहिं | ७ ५ |
| पम्हट्ठे सारणा वुत्ता | २ १ |
| परियट्टिए अभिहड्डुब्भिन्ने | ४ ७ |
| पावं छिंदइ जम्हा | २ |
| पासत्थ अहाछंदे | ६ ५ |
| पिंडविसोही ४ समिई ५ | २ ७ |
| पुव्वं अपासिऊणं | २ ३ |
| पुव्विंपच्छासंथव | ५ ० |
| फुल्लफलपत्ततणकट्ठ | ८ ० |
| मंगलमूलीण्हवणाइ | ५ ० |
| बत्तीसं किर कवला | ५ ७ |
| बहुदिट्ठो नयनिउणा | १ ६ |
| मज्जं विसयकसाया | ७ ५ |
| बहुसो बहुस्सुएहिं जो | ४ |
| मज्झुक्कोसो मज्झिममज्झो | ९ ६ |
| मज्जारमोर—मक्कडकुक्कुड | ८ ० |
| बारसमदसममट्ठम | ९ ७ |
| बारसवासस्स तहा | ३ १ |
| मणुयाणं तिरियाणं | ८ ० |
| बारसविहं विभागे | ४ ७ |
| महुमज्जमंसमक्खण चउण्ह | ८ ० |
| बालस्त्रीमन्दमूर्खाणां नृणां | ४ २ |
| भवेत्सैत्रं त्वहोरात्रं | २ ६ |
| मोसाइसु मेहुणवज्जिएसु | ७ ५ |

| अवान्तरगाथाप्रथमपद | पृष्ठाङ्कः |
|---|---|
| रसहेउं संजोगा | ५७ |
| रागो दोसो मइब्भंसो | ७५ |
| लक्खाधाहइगुलियामण | ८० |
| लहु—भिन्नमास—वीसा | ९५ |
| वंदइ न य वंदावइ | ९ |
| वंदइ न य वंदिज्जइ | ३४ |
| वणदवदाणमरण्णे | ८० |
| वत्तो नामं इक्कसि | ४ |
| वय ५—समणधम्म १० | २७ |
| *वसहिनिवेसणपाडगसाहिनि—* | २६ |
| वत्तणुवत्तपवत्तो बहुसो | ४ |
| विणओ सासणे मूल | ११ |
| वासं बारस वासा | ३४ |
| विसवाणिज्जं भण्णइ | ८० |
| वेअणवेयावच्चे इरिअट्ठाए | ५८ |
| संकिअ मक्खिअ | ५१ |
| संखडिभत्तुव्वरियं | ४७ |
| संघयणधिईहीणा | ३८ |
| संघयणवीरिय आगम | ३४ |
| संजमतवनियमेसुं जा | १३ |
| संजोअणा पमाण | ५६ |
| संतविभवो उ जाह | ३७ |
| संत—विभेवेहिं तुल्ला | ३७ |
| संविग्गो मज्झत्थो | १६ |
| संविग्गो मद्दविओ | १३ |
| सगडाणं घडणघडावणेण | ८० |
| सच्छंदमइविगप्पिय | ६६ |
| सम्मत्तनाणसंजम—जुत्तो | १३ |
| ससमय—परसमयविऊ | १५ |
| साहम्मिवच्छल्लं | ४३ |
| साहारण—चोरियगं | ५२ |
| सिलउक्खलमुसलघरट्ट | ८० |
| सिसिरे दसमाईणं | ९७ |
| सुत्तत्थतदुभएहि उवउत्ता | १२ |
| सुत्तत्थतदुभयविऊ उज्जुत्ता | १२ |
| सुत्तत्थविऊ लक्खणजुत्तो | १२ |
| सुत्तत्थेसु थिरत्तं | १३ |
| सुद्धं सुसाहुधम्मं | ९ |
| सुविणगविज्जाकहियं | ६४ |
| सोऊण जिणपडिकुट्ठो | ८० |
| सो कीरइ पारंचिय | ३६ |
| सो पासत्थो दुविहो | ६२ |
| सोलसवासाईसु अ | ३१ |
| सोहग्गाइनिमित्तं परेसिं | ६४ |
| *हिआहारा मिआहारा* | ५७ |

જે કદાચિત લાગે વ્રતે,
અતિચાર પંક કલંક,
આલોયણેં તે શોધતાં,
મુનિધરે હો શ્રદ્ધા નિઃશંકઃ

૩૫૦ ગાથા સ્તવન
ઢાળ-૧૪ ગા. ૧૩

જીવનમાં પાપ કર્યા પછી
અથવા થયા પછી
પશ્ચાત્તાપ કરવાથી પાપ ધોવાય છે.
અને
પ્રાયશ્ચિત કરવાથી વિશુદ્ધ થવાય છે.



ARYA GRAPHICS - 9925801910